॥ कोबातीर्थमंडन श्री महावीरस्वामिने नमः ॥

॥ अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ॥ ॥ गणधर भगवंत श्री सुधर्मास्वामिने नमः ॥

॥ योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ॥ ॥ चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ॥

आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

पुनितप्रेरणा व आशीर्वाद

राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

श्री महावीर जैन आराधना केन्द्र

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
Websiet : www.kobatirth.org
Email : Kendra@kobatirth.org

शहर शाखा

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रीहेमचन्द्राचार्यग्रन्थावली नं० २०

ॐ अर्हम्

श्री राजशेखरसूरिविरचितः

चतुर्विंशतिप्रबन्धः

आचार्यमहाराजश्रीविजयनीतिसूरीश्वरसमुपदिष्टचाणस्मावास्तव्यश्राद्धवर्य
" शाह पूनमचन्द नगीनदास " इत्येतत्साहाय्येन पटनस्थश्रीहेमचन्द्राचार्यसभायाः सेक्रेटरी
" शा. जगजीवनदास उत्तमचन्द " इत्यनेन प्रकाशितः
श्रावकपण्डितवीरचन्द्रप्रभुदासाभ्यांच संशोधितः
मुद्रितस्तु पट्टनस्थ " केशव " जैन मुद्रालयाधिपतिदोलतचन्द्रात्मजकेशवलालेन प्रकाशककृते
संवत १९७७ प्रतय. ३०० ता. २०-१०-१९२१
मूल्यं रूप्यकमात्रम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रबन्धानुक्रमणिका

विषयः	पृष्ठाङ्कः
१ भद्रबाहुवराहप्रबन्धः....	१-४
२ आर्यनन्दिलप्रबन्धः....	५-७
३ जीवदेवसूरिप्रबन्धः....	७-१०
४ आर्यखपटाचार्यप्रबन्धः....	१०-१२
५ पादलिप्ताचार्यप्रबन्धः...	१३-१६
६ वृद्धवादिसिद्धसेनसूरिप्रबन्धः	१६-२३
७ मल्लवादिप्रबन्धः....	२३-२५
८ हारिभद्रसूरिप्रबन्धः....	२६-२८
९ बप्पभट्टसूरिप्रबन्धः....	२८-५१
१० हेमचन्द्रसूरिप्रबन्धः....	५१-६०
११ हर्षकविप्रबन्धः....	६०-६४
१२ हरिहरप्रबन्धः....	६४-६७
१३ अमरसुरिप्रबन्धः....	६८-७०
१४ मदनकीर्तिप्रबन्धः....	७०-७३
१५ सातवाहनप्रबन्धः....	७३-८२
१६ वङ्कचूलप्रबन्धः....	८२-८६
१७ विक्रमादित्यप्रबन्धः....	८६-९१
१८ नागार्जुनप्रबन्धः....	९१-९३
१९ वत्सराजोदयनप्रबन्धः....	९३-९५
२० लक्ष्मणसेनकुमारदेवप्रबन्ध..	९६-९७
२१ मदनवर्मप्रबन्धः....	९७-९९
२२ रत्नश्रावकप्रबन्धः....	१००-१०४
२३ आभडप्रबन्धः....	१०४-१०७
२४ वस्तुपालप्रबन्धः....	१०७-१३८

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रीहेमचन्द्राचार्यग्रन्थावली नं० २०

ॐ अर्हम्

श्री राजशेखरसूरिविरचितः

चतुर्विंशतिप्रबन्धः

आचार्यमहाराजश्रीविजयनीतिसूरीश्वरसमुपदिष्टचाणस्मावास्तव्यश्राद्धवर्य
"शाह पूनमचन्द नगीनदास" इत्येतत्साहाय्येन पटनस्थश्रीहेमचन्द्राचार्यसभायाः सेक्रेटरी
"शा. जगजीवनदास उत्तमचन्द" इत्यनेन प्रकाशितः
श्रावकपण्डितवीरचन्द्रप्रभुदासाभ्यां च संशोधितः
मुद्रितस्तु पट्टनस्थ "केशव" जैन मुद्रालयाधिपतिदोलतचन्द्रात्मजकेशवलालेन प्रकाशककृते

संवत १९७७ प्रतय. ३०० ता. २०-१०-१९२१

मूल्यं रूप्यकमात्रम्

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्रबन्धानुक्रमणिका

विषयः	पृष्ठाङ्कः
१ भद्रबाहुवराहप्रबन्धः....	१–४
२ आर्यनन्दिलप्रबन्धः....	५–७
३ जीवदेवसूरिप्रबन्धः....	७–१०
४ आर्यखपटाचार्यप्रबन्धः....	१०–१२
५ पादलिप्ताचार्यप्रबन्धः...	१३–१६
६ वृद्धवादिसिद्धसेनसूरिप्रबन्धः	१६-२३
७ मल्लवादिप्रबन्धः....	२३–२५
८ हारिभद्रसूरिप्रबन्धः....	२६–२८
९ बप्पभट्टसूरिप्रबन्धः....	२८–५१
१० हेमचन्द्रसूरिप्रबन्धः....	५१–६०
११ हर्षकविप्रबन्धः....	६०–६४
१२ हरिहरप्रबन्धः....	६४–६७
१३ अमरसुरिप्रबन्धः....	६८–७०
१४ मदनकीर्तिप्रबन्धः....	७०–७३
१५ सातवाहनप्रबन्धः....	७३–८२
१६ वङ्कचूलप्रबन्धः....	८२–८६
१७ विक्रमादित्यप्रबन्धः....	८६–९१
१८ नागार्जुनप्रबन्धः....	९१–९३
१९ वत्सराजोदयनप्रबन्धः....	९३–९५
२० लक्ष्मणसेनकुमारदेवप्रबन्ध..	९६-९७
२१ मदनवर्मप्रबन्धः....	९७–९९
२२ रत्नश्रावकप्रबन्धः....	१००–१०४
२३ आभडप्रबन्धः....	१०४–१०७
२४ वस्तुपालप्रबन्धः....	१०७–१३८

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यद्दत्ताऽऽगमशुद्धबीजकबलादद्यापि तत्त्वाभिधाः
लभ्यन्ते निधयो बुधैर्भरतभुव्यस्यां स वीरः श्रिये ॥ ४ ॥
देयासुर्वाङ्मयं मे जिनपगणभृतो भारती सारतीव्रा
भारत्याः सौम्यदृष्ट्या विलसतु मम सा सन्तु सन्तः प्रसन्नाः ।
सूरिर्मे सद्गुरुः श्रीतिलक इति कलाः स्फोरयत्वस्तविघ्नः
शिष्याः स्फूर्जन्तु गर्जन्त्वविरलसुकृतश्रेणयः श्रावकौघाः ॥ ५ ॥

इह किल शिष्येण विनीतविनयेन श्रुतजलधिपारङ्गमस्य क्रियापरस्य गुरोः समीपे विधिना सर्वमध्येतव्यम् । ततो भव्योपकाराय देशना क्लेशनाशिनी विस्तार्या । तद्विधिश्चायम्—अस्खलितम्, अमिलितम्, अहीनाक्षरं सूत्रम्, अग्राम्यललितभङ्ग्यार्थः कथ्यः, कायगुप्तेन परितः सभ्येषु दत्तदृष्टिना यावदर्थबोधं वक्तव्यम् । वक्तुः प्रायेण चरितैः प्रबन्धैश्च कार्यम् । तत्र श्री ऋषभादिवर्धमानान्तानां जिनानाम्, चक्रयादीनां राज्ञाम्, ऋषीणां चार्यरक्षितान्तानां वृत्तानि चरितानि उच्यन्ते । तत्पश्चात्कालभाविनां तु नराणां वृत्तानि प्रबन्धा इति ।

इदानीं वयं गुरुमुखश्रुतानां विस्तीर्णानां रसाढ्यानां प्रबन्धानां सङ्ग्रहं कुर्वाणाः स्म । तत्र सूरिप्रबन्धा

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ॐ अर्हम्

श्रीहेमचन्द्राचार्यग्रन्थावली नं० २०

श्रीराजशेखरसूरिविरचित-

चतुर्विंशतिप्रबन्धः ॥

राज्याभिषेके कनकासनस्थः सर्वाङ्गदिव्याभरणेऽभिरामः ।
श्रियेऽस्तु वो मेरुशिरोऽवतंसः कल्पद्रुकल्पः प्रथमो जिनेन्द्रः ॥ १ ॥
विवेकमुच्चैस्तरमारुरोह यस्ततोऽद्रिशृङ्गं चरणं ततस्तपः ।
ततःपरं ज्ञानमथोत्तरं पदं श्रियं स नेमिर्दिशतूत्तरोत्तराम् ॥ २ ॥
यस्मै स्वयंवरसमागतसप्ततत्त्वलक्ष्मीकरग्रहणमाचरतेति भक्त्या ।
सप्त व्यधात्फणिपतिः फणमण्डपान्कि वामाङ्गभूः स भगवान्भवतान्मुदे वः ॥ ३ ॥
अर्थेन प्रथमं कृतार्थमकरोद्यो वीरसंवत्सरे
दाने च व्रतपर्वजेऽथ परमार्थेनापि विष्वग् जनम् ।

For Private And Personal

दश, कविप्रबन्धाश्चत्वारः, राजप्रबन्धाः सप्त, राजाङ्गश्रावकप्रबन्धास्त्रयः, एवं चतुर्विंशतिः । १ भद्रबाहु-वराहयोः, २ आर्यनन्दिलक्षपणकस्य, ३ श्रीजीवदेवसूरीणाम्, ४ आर्यखपटाचार्याणाम्, ५ पादलिप्तप्रभूणाम्, ६ वृद्धवादिसिद्धसेनयोः, ७ मल्लवादिनः, ८ हरिभद्रसूरीणाम्, ९ बप्पभट्टिसूरीणाम्, १० हेमसूरीणाम्, ११ श्रीहर्षकवेः, १२ हरिहरकवेः, १३ अमरचन्द्रकवेः, १४ दिगम्बरमदनकीर्तिकवेः, १५ सातवाहन-१६ वङ्कचूल-१७ विक्रमादित्य-१८ नागार्जुन-१९ उदयन-२० लक्षणसेन-२१ मदनवर्मणाम्, २२ रत्न-२३ आभड-२४ वस्तुपालानां चेति ।

(१)

तेषु प्रथमं भद्रबाहुवराहप्रबन्धः—

दक्षिणापथे प्रतिष्ठानपुरे भद्रबाहु-वराहाह्वौ द्वौ द्विजौ कुमारौ निर्धनौ निराश्रयौ प्राज्ञौ वसतः । तत्र यशोभद्रो नाम चतुर्दशपूर्वी समागतः । भद्रबाहुवराहौ तद्देशनां शुश्रुवतुः ।

यथा—भोगा भङ्गुरवृत्तयो बहुविधास्तैरेव चायं भवः, तत्कस्येह कृते परिभ्रमत रे! लोकाः! कृतं चेष्टितैः ।
आशापाशशतोपशान्तिविशदं चेतः समाधीयताम्, काप्यात्यन्तिकसौख्यधामनि यदि श्रद्धेयमस्मद्वचः ॥१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एतच्छ्रवणमात्रत एव प्रतिबुद्धौ गृहं गत्वा तौ मन्त्रयेते स्म–"जन्म कथं वृथा नीयते ? तावद्भोगसामग्री नास्ति, तर्हि योगः साध्यते ।

अग्रे गीतं सरसकवयः पार्श्वतो दाक्षिणात्याः पृष्टे लीलावलयरणितं चामरग्राहिणीनाम् ।
यद्यस्त्येवं कुरु भवरसास्वादने लम्पटत्वं नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥ १ ॥"

इति विमृश्य द्वावपि बान्धवौ प्रवव्रजतुः ।

भद्रबाहुश्चतुर्दशपूर्वी षट्त्रिंशद्गुणसम्पूर्णः सूरिरासीत् । दशवैकालिक–उतराध्ययन–दशाश्रुतस्कन्ध–कल्प– व्यवहार– आवश्यक– सूर्यप्रज्ञप्ति –सूत्रकृत –आचाराङ्ग –ऋषिभाषिताख्यग्रन्थदशकप्रतिबद्धदशनिर्युक्तिकारतया प्रपथे, भद्रबाहवीं नाम संहितां च व्यरचयत् । तदा आर्यसंभूतिविजयोऽपि चतुर्दशपूर्वी वर्तते । श्रीयशोभद्रसूरीणां स्वर्गगमनं जातम् । भद्रबाहुसंभूतिविजयौ स्नेहपरौ परस्परं भव्याम्भोरुहभास्करौ विहरतो भरते पृथक् पृथक । वराहोऽपि विद्वानासीत्, केवलमखर्वगर्वपर्वतारूढः सूरिपदं याचते भद्रबाहाहसहोदरपार्श्वात् । भद्रबाहुना भाषितः सः–" वत्स! विद्वानसि, क्रियावानसि, परं सगर्वोऽसि, सगर्वस्य सूरिपदं न दद्मः " एतत्सत्यमपि तस्मै न सस्वदे । यतो गुरुवचनममलमपि महदुपजनयति श्रवणस्थितं शूलमभव्यस्य । ततो व्रत तत्याज । मिथ्यात्वं गतः पुनर्द्विजवेषं जग्राह ।

For Private And Personal

व्रतावस्थाऽधीतशास्त्रार्थज्ञतया वाराहसंहितादिनवीनशास्त्ररचनायां प्रगल्भे, लोकेषु च जगाद—" अहं बाल्ये लग्नमभ्यस्यामि स्म। तद्विचार एव लीनस्तिष्ठामि स्म। एकदा प्रतिष्ठानाद्बहिः शिलायामेकस्यां लग्नं मण्डयामि स्म। सायममृष्ट एव तस्मिन्स्वस्थानमागत्य स्वपिमि स्म। सुप्तोऽहं तल्लग्नममृष्टं स्मरामि स्म। ततो मार्ष्टुं तत्र यामि स्म। तत्र लग्नाधिष्ठिते शिलातले पञ्चानन उपविष्टोऽभूत्। तथापि तदुदरदेशे करं निक्षिप्य मया तल्लग्नं मृष्टम्। तावता पञ्चाननः साक्षाद्भास्कर एवाभूत्। तेनाहं भाषितः—' वत्स! तव दृढनिश्चयतया लग्नग्रहभक्त्या च तुष्टोऽस्मि, रविरहम्, वरं वृणीष्व।' अथ मयोक्तम्—स्वामिन्! यदि प्रसन्नोऽसि, तदा निजविमाने चिरं मामवस्थापय, सकलमपि ज्योतिश्चक्रं मे दर्शय। अथाहं मिहरेण चिरं स्वविमानस्थः खे भ्रामितोऽस्मि। सूर्यसंक्रमितामृतसंतर्पितेन च मया क्षुत्तृषादिदुःखं न किञ्चिदनुभूतम्। कृतकृत्यश्च सूर्यमापृच्छ्य ज्ञानेन च जगदुपकर्त्तुं महीलोकं भ्रमन्नस्मि। अहं ' वराहमिहरः ' इति वाच्यः। " इत्यादि स्वैरं प्रख्यापयामास। संभाव्यत्वात् लोके पूजां परमामाप्य प्रतिष्ठानपुरे शत्रुजितं भूपालं कलाकलापेन रञ्जयामास। तेन निजपुरोहितः कृतः।

यतः—

गौरवाय गुणा एव न तु ज्ञातेयडम्बरः। वानेयं गृह्यते पुष्पमङ्गजस्त्यज्यते मलः॥ १॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अथ श्वेताम्बरान्निन्दति—" किममी वराकाः काका विदन्ति ? मक्षिकावद्भिणिहणायमानाः कारास्था इव कुचेलाः कालं क्षपयन्ति, क्षपयन्तु।" तच्छृण्वतां श्रावकाणां शिरःशूलमुत्पेदे। धिगिदमस्माकं जीवितम्। येन गुर्ववज्ञां सहामहे। किं कुर्मः ? अयं कलावानिति नरपतिना पूज्यते। राजभिः पूज्यते यश्च सर्वैरपि स पूज्यते। भवतु। तथापि भद्रबाहुमाह्वयामस्तावत्। इति संमन्त्र्य तथैव चक्रुः। आगताः श्रीभद्रबाहवः। कारितः श्रावकैः सस्पर्द्धप्रवेशमहः। स्थापिता गुरवः सुस्थाने। नित्यं व्याख्यारसमास्वादयामासुः सभ्याः। भद्रबाह्वागमे वराहो बाढं मम्लौ। तथापि तेभ्यो नापकर्तुमशकदसौ।

अत्रान्तरे वराहमिहरगृहे पुत्रो जातः। तज्जन्मतुष्टः प्रभूतं धनं व्ययति स्म। लोकाच्च पूजामाप्नोति स्म। 'पुत्रस्य वर्षशतमायुः' इति तेन नरेन्द्रादिलोकाग्रसभासमक्षं प्रख्यापितम्। गृहे उत्सवोदयस्तस्य। एकदा सदसि वराहः प्राह स्म—" अहो ! सहोदरोऽपि भद्रबाहुर्मे पुत्रजन्मोत्सवे नागात्, इति बाह्या एते" एतदाकर्ण्य श्रावकैर्भद्रबाहुर्विज्ञप्तः। एवं एवं असौ वदन्नास्ते। गम्यतां भवद्भिरेकदा तद्गृहम्। मावृधन्मुधा क्रोधः। भद्रबाहुनाऽऽदिष्टम्—" द्वौ क्लेशौ कथं कारयध्वे ? अयं बालः सप्तमे दिने निशीथे बिडालिकया घानिष्यते। तस्मिन्मृते शोकविसर्जनायापि गन्तव्यमेव तावत्।" श्रावकैरूचे—" तेन विप्रेणोपराजसभस्य समाशतमायुरुक्तम्। भवद्भिः पुनरिदमादिश्यते। किमेतत् ?"।

For Private And Personal

श्रीभद्रबाहुस्वामिना भणितम्—"ज्ञानस्य प्रत्ययः सारम्, स चासन्न एवास्ते"। स्थितास्तूष्णीं श्रावकाः। आगतं सप्तमं दिनम्। तत्रैव द्विप्रहरमात्रायां रात्रौ बालं स्तन्यं पाययितुं धात्र्युपविष्टा। द्वारशाखाग्रन्यस्ताऽर्गला बालमस्तके पतिता जनान्तरसञ्चारात्। प्रमृतो बालः। रुद्यते वराहगृहे मिलितो लोकः। भद्रबाहुनाऽपि श्रावका उक्ताः—शोकापनोदो धर्माचार्यैः, इति तत्रास्माभिरधुना गन्तव्यम्।" श्रावकशतवृता गतास्तत्राचार्याः। वराहशोकसङ्कुलोऽप्यभ्युत्थाद्युचितमकरोत्। अभ्यदधाच—"आचार्याः! भवतां ज्ञानं मिलितम्, केवलं बिडालीतो मृत्युर्न, किन्त्वर्गलातः" भद्रबाहुना निजगदे—"तस्या अर्गलाया लोहमय्या अग्रभागे रेखामयी बिडाल्यस्ति, नासत्यं ब्रूमः।" आनीताऽवलोकिताऽर्गला तथैवास्ते। अथोवाच वराहः—"तथा पुत्रशोकेन न खिद्येऽहम्, यथा राजविदिताख्यातपुत्रशतायुस्त्ववैफल्येन खिद्ये। धिगमीषां निजपुस्तकानां प्रत्ययेनास्माभिर्ज्ञानं प्राकाशि, एतान्यसत्यानि तस्मात्तु मृज्मः।" इत्युक्त्वा कुण्डानि जलैरपूपुरत्। पुस्तकानि मार्ष्टुं स यावदारभते, तावद्भद्रबाहुना बाहौ धृत्वा वारितः, "आत्मप्रमादेन ज्ञानं विनाश्य कथं पुस्तकेभ्यः कुप्यसि? एते पुस्तकाः सर्वज्ञोक्तमेव भाषन्ते, ज्ञाता तु दुर्लभः। अमुकस्मिन्स्थाने त्वं विपर्यस्तमतिर्जातः, आत्मानमेव निन्द।

प्रभुप्रसादस्तारुण्यं विभवो रूपमन्वयः। शौर्यं पाण्डित्यमित्येतदष्टकं मदकारणम् ॥ १ ॥

मत्तस्य कुतो विचारसूक्ष्मेक्षिका: ? तस्मान्माभाङ्क्षीः पुस्तकान् ।" इति निषिद्धः विलक्षीभूय स्थितो वराहः । तत्रान्तरे पूर्वं तत्कृतार्हन्मतगर्हापीडितमनसा केनापि श्रावकेण पठितम्—

"युष्मादृशाः कृपणकाः कृमयोऽपि यस्यां भान्ति स्म संतमसमय्यगमन्निशाऽसौ ।
सूर्यांशुदीप्तदशदिग्दिवसोऽधुनाऽयं भात्यत्र नेन्दुरपि कीटमणे ! किमु त्वम् ॥ १ ॥

इति वदन्नेव नष्टः सः ।" बाढं पीडितो वराहः । अत्रान्तरे स्वयमागतो राजा । राज्ञोक्तम्—"मा स्म शोचीः, भवस्थितिरियं विद्वन् !" । तदा जिनभक्तेन राजमन्त्रिणैकेन भणितम्—"ते आचार्या नवा याताः सन्ति, यैर्डिम्भस्य सप्ताहमात्रमायुरभाणि ते सङ्गतवाचो महात्मानः" केनापि दर्शिता भद्रबाहवः, "एते ते" तदा द्विजस्तथा दूनः, यथा स एव विवेद । गतो राजाऽपि, भद्रबाहुरपि, लोकोऽपि स्वस्थानम् । राजा श्रावकधर्मं प्रतिपेदे । वराहोऽपमानाद्भागवतीं दीक्षां गृहीत्वाऽज्ञानकष्टानि महान्ति कृत्वा जैनधर्मद्वेषी दुष्टो व्यन्तरोऽभूत् । ऋषिषु द्वेषवानपि न प्रबभूव । तपो हि वज्रपञ्जरप्रायं महामुनीनां परप्रेरितप्रत्यूहपृषत्कदुर्भेद्यतरम् । अतः श्रावकानुपद्रोतुमारेभे । गृहे गृहे रोगानुत्पादयामास । श्रावकैः पीडार्त्तैर्भद्रबाहुरादरेण विज्ञप्तः—"भगवन् ! भवति सत्यपि यद्वयं रुग्भिः पीड्यामहे, तत्सत्यमिदम्–कुञ्जरस्कन्धाधिरूढोऽपि भषणैर्भक्ष्यते" इति । गुरुभिरभाणि–"मा भैष्ट, सोऽयं वराहमिहरः पूर्ववैरात्सङ्घाय द्रुह्यति । रक्षामि पाणेरपि वज्रपाणेः ।"

ततः पूर्वेभ्य उद्धृत्य ' उवसग्गहरं पासम् ' इत्यादि स्तवनं गाथापञ्चकमयं संदृब्धं गुरुभिः, पठितं च तल्लोकैः, सद्य शान्तिं गताः क्लेशाः । अद्यापि कष्टापहारार्थिभिस्तत्पठ्यमानमास्ते, अचिन्त्यचिन्तामणिप्रतिमं च तत् । श्रीभद्रबाहुनां विद्योपजीवी चतुर्दशपूर्वी श्रीस्थूलभद्रः परमतान्यचुचूर्णदिति ।

॥ श्रीभद्रबाहुवराहप्रबन्धः प्रथमः ॥

(२)

अथार्यनन्दिलप्रबन्धः—

पद्मिनीखण्डपत्तने पद्मप्रभनामा राजा । तस्य भार्या पद्मावती । तस्मिन् पुरे पद्मदत्तनामा श्रेष्ठी वसति । तस्य कान्ता पद्मयशानामा । तयोः सुतः पद्मनामाऽभूत् । वरदत्तेन सार्थवाहेन स्वकीया वैरोट्या नाम पुत्री तस्य दत्ता । स तां व्यवाहयत् ।

अन्यदा वरदत्तो वैरोट्याजनकः सपरिवारो देशान्तरं गच्छन् वनदवेन दग्धः । वैरोट्यां श्वश्रूः शुश्रूष्यमाणाऽपि निष्पितृकां भणित्वाऽपमानयति । यतः—

" रूपं रहो धनं तेजः सौभाग्यं प्रभविष्णुता । प्रभावात्पैतृकादेव नारीणां जायते ध्रुवम् ॥ १ ॥ "

मा श्वश्रूवचनैः कुकुलानलकर्कशैः पीडिताऽपि दैवमुपालभते, न श्वश्रूं निन्दति, चिन्तयति च—

" सव्वो पुव्वकयाणं कम्माणं पावए फलविवागं ।
अवराहेसु गुणेसु य निमित्तमित्तं परो होइ ॥ १ ॥ "

अन्यदा वैरोट्या भोगीन्द्रस्वप्नसूचितं गर्भं बभार । पायसभोजनदोहद उत्पन्नः । तदाऽऽचार्यनन्दिलनामा सूरिरुद्याने समवासार्षीत्, सार्द्धनवपूर्वधरआर्यरक्षितस्वामिवत् । वैरोट्यायाः श्वश्रूरिति वक्ति– " अस्या वध्वाः सुता भविष्यति, न तु सुतः, " इति कर्णक्रकचकर्कशतद्वचःपीडिता मती सा सती वधूः सूरिवन्दनार्थं गता । सूरयो वन्दिताः । ततः स्वस्य श्वश्र्वा सह विरोधोऽकथि ! सूरिभिरुक्तम्–" पूर्वकर्मदोषोऽयम्, क्रोधो न वर्द्धनीयः भवहेतुत्वात्, वत्से !

इह लोए च्चिय कोवो सरीरसंतावकलहवेराइं । कुणइ पुणो परलोए नरगाइसुदारुणं दुक्खं ॥ १ ॥

पुत्रं च लप्स्यसे । पायसदोहदस्ते जातोऽस्ति । सोऽपि यथातथा पूरयिष्यते । " इति सा सूरिवचसाऽऽनन्दितचित्ता निजगृहमागच्छत्, अचिन्तयच्च—

" अस्माभिश्चतुरम्बुराशिरसनाविच्छेदिनीं मेदिनीं, भ्राम्यद्भिः स न कोऽपि निस्तुषगुणो दृष्टो विशिष्टो जनः ।
यस्याग्रे चिरसञ्चितानि हृदये दुःखानि सौख्यानि वा, व्याख्याय क्षणमेकमर्द्धमथवा निःश्वस्य विश्रम्यते ॥१॥

एते तु गुरवस्तादृशाः सन्ति ।"

पद्मयशा अपि चैत्रपूर्णिमायामुपोषिता पुण्डरीकतपसि क्रियमाणे उद्यापनमारेभे । तद्दिने पायसपूर्णः प्रतिग्रहो यतिभ्यो दीयते, साधर्मिकवात्सल्यं च क्रियते । तया सर्वं कृतम् । वध्वाः पुनर्वैरभावात्कुलत्थादि कदशनं दत्तम् । वधू पुनः स्थाल्यामुद्धृतं पायसं प्रच्छन्नं कृत्वा वस्त्रे बद्ध्वा घटे क्षिप्त्वा जलाशयं जलाय गता । वृक्षमूले कुम्भं मुक्त्वा यदा हस्तपादप्रक्षालनार्थं गता, तावताऽलिञ्जरनाम्ना नागः पातालेऽस्ति, तस्य कान्तायाः पायसदोहदः समजनि, पृथिव्यामायाता क्षीरान्नं गवेषयति, तत्र तरोर्मूले घटमध्ये क्षीरान्नं दृष्टम्, भुक्तं च । येन मार्गेणागता, तेनैव गता नागपत्नी । यदा वैरोट्या पादशौचं कृत्वा समायाति, तावत् क्षीरान्नं न पश्यति । तथापि न चुकोप । न विरूपं बभाषे । किन्त्वेवं बभाण—" येनेदं भक्षितं भक्ष्यं, पूर्यतां तन्मनोरथः " इत्याशिषं ददौ । इतश्चालिञ्जरपत्न्या तर्वन्तरितस्थितया तस्यास्तदाशीर्वचनं श्रुतम् । स्वस्थानमेत्य स्वभर्त्रे निवेदितं च । वैरोट्या स्वगृहमागता । ततो रात्रौ वैरोट्याप्रातिवेश्मिकयाः स्त्रियाः स्वप्ने नागपत्न्या कथितम्—" भद्रे ! अहं अलिञ्जरनागपत्नी । मदीया तनया वैरोट्या । तस्याः पायसदोहदोऽस्ति । स तस्यास्त्वया पूरणीयः । तथा तस्याग्रे कथनीयम्–" तवपितृकुलं नास्ति, परमहं पितृसमानोपकारं करिष्यामि, श्वश्रूपराभवाग्नितापमुपशमयिष्यामि । " तया प्रातिवेश्मिकया प्रातर्वैरोट्या क्षीरान्नं भोजिता, सम्पूर्णदोहदा

सुतमजीजनत् । नागकान्तयाऽपि सुतशतमसूयत । वैरोट्यापुत्रनामकरणदिने पन्नगेन उत्सवः कारितः । यत्र पितृगृहं पूर्वं स्थितम् । तत्र धवलगृहं कारयित्वा पातालवासिभिर्नागैरलङ्कृतम् । गजाऽश्ववरवाहनपदातिवर्गसहिता नागलोकाः समाययुः । तस्या गृहं लक्ष्म्या संकीर्णं चक्रुः । अलिञ्जरपत्नी पतिना पुत्रैश्च युता दिव्यवस्त्रपट्टकूलस्वर्णरत्नखचितसर्वाङ्गाभरणादिकं सर्वं मनोज्ञं वस्तुसमुहं वैरोट्यायाः प्रतिपन्नसुतात्वेन पूरयति । वैरोट्या अलिञ्जरपत्नीगृहे नित्यं यात्यायाति च । अलिञ्जरपत्न्याऽतीव मान्यते, पूज्यते वैरोट्या । श्वश्रूस्तथाविधं पितृगृहं मेलापकमिव दृष्टवा तां वैरोट्यां वधूं सत्कर्तुमारेभे । 'लोकः पूजितपूजकः'। वैरोट्याया रक्षार्थं नागवध्वा स्वकीयलघवः शतं पुत्राः सर्पकाः समर्पिताः । तया सर्पा घटे क्षिप्ताः । तत्र च कयापि कर्मकर्या अग्नितप्तस्थालीमुखे सर्पघटो दत्तः । तत्क्षणमेव वैरोट्ययोत्तारितः । पानीयेनाभिषिक्तास्ते ततः स्वस्थाः सम्पन्नाः । एकस्तु शिशुर्विपुच्छो जातः । यदा स स्खलति क्षितौ, तदा वैरोट्या ब्रूते– "बण्डो जीवतु" वैरोट्या जातकस्य स्नेहेन मोहितास्ते सर्वे बान्धवरूपाः सर्पाः क्षौमरत्नस्वर्णादि दत्त्वा नामकरणं च कारयित्वा यथास्थानं ययुः । वैरोट्या नागप्रभावात् गौरवपात्रं जाता ।

अन्यदाऽलिञ्जरः स्वपुत्रं पुच्छरहितं दृष्टवा चुक्रोध । मम पुत्रः केन दुरात्मना विपुच्छः कृतः । ततो 'वैरोट्यया कृतो विपुच्छो मे पुत्रः ।' इत्यवधिना ज्ञात्वा वैरोट्याया उपरि पूर्वं सुप्रसन्नोऽपि चुकोप ।

For Private And Personal

कुपितः सन् विरूपं कर्तुं वैरोट्यागृहमगमत्। अलिञ्जरो गृहतनुर्गृहमध्ये स्थितः। यदा वैरोट्या ध्वान्तभरे सति गृहापवरकमध्ये प्रविष्टा, तदा तयोक्तम्—"बण्डो जीवतु चिरम्" तच्छ्रुत्वा नागराजः सन्तुष्टस्तस्यै नुपूरे ददौ। "अद्य प्रभृति वत्से! त्वया पाताले आगन्तव्यम्, नागाश्च त्वद्गृहमेष्यन्ति" इति प्रसादः कृतः। सा वैरोट्या पाताले गमनागमनं करोति। नागवरात् 'नागदत्तः' इति नाम दत्तं पुत्रस्य। तदा पद्मदत्तो वैरोट्याश्वशुरः श्रीआर्यनन्दिलक्षपकैरेवमुक्तः—"त्वया स्ववध्वाऽग्रे कथनीयम्—नागाश्रयं गतया त्वया नागा वक्तव्याः—"भवद्भिर्लोकस्यानुग्रहः कर्तव्यः। कोऽपि न दंष्टव्यः। तत्सूरिवचनं श्वशुरेण तस्यै, तया च नागेभ्यः कथितम्। तत्र गता च वैरोट्या एवमुच्चैर्जगौ—"साऽलिञ्जरपत्नी जीयात्। सोऽलिञ्जरो जीयात्। येनाहमपितृगृहाऽपि सपितृगृहा कृता। अनाथाऽपि सनाथा सञ्जाता। भो भो नागकुमाराः! आर्यनन्दिलेन महात्मना एवमादिष्टम्—'लोको न पीडयितव्यः, लोकस्यानुग्रहः कार्यः।' वैरोट्या पुनरपि स्वगृहं गता। गुरुणा वैरोट्यास्तवो नवो विरचितः। यो वैरोट्यास्तवं पठति, तस्य पन्नगभयं नास्ति। पन्नगाः सर्वे वैरोट्यया गुरोः पार्श्वमानीताः। उपदेशं श्राविता उपशान्तचित्ताः संवृत्ताः। नागदत्तनामा वैरोट्या-पुत्रः सौभाग्यरङ्गभूरभूत्। पद्मदत्तेन प्रियासहितेन व्रतं गृहीतम्। तपस्तप्त्वा स्वर्गं गतः। पद्मयशा अपि तस्य देवत्वं प्राप्तस्य इच्छासिद्धियुजो देवी सञ्जाता। वैरोट्या च फणीन्द्राणां ध्यानान्मृत्वा धरणेन्द्रपत्नी-त्वेनोत्पन्ना। तत्रापि 'वैरोट्या' इति नामाऽस्याः।

॥ इति आर्यनन्दिलप्रबन्धः ॥

अथ श्रीजीवदेवसूरिप्रबन्धः—

गूर्जरधरायां वायुदेवतास्थापितं वायटं नाम महास्थानम्। तत्र धर्मदेवनामा श्रेष्ठी धनवान्। तस्य शीलवती नामा गेहिनी गेहश्रीरिव देहिनी। तयोः सुतौ महीधरमहीपालौ। महीपालः क्रिडाप्रियो न कलाऽभ्यासं करोति। ततः पित्रा हक्कितो रुष्टो देशान्तरमसरत्। धर्मदेवश्रेष्ठी परलोकं प्राप्तः। महीधरोऽपि श्रीजिनदत्तसूरीणां वायटगच्छीयानां पादमूले प्रवव्राज। स राशिल्लसूरिर्नाम सूरीन्द्रो बभूव। महीपालोऽपि पूर्वस्यां दिशि राजगृहे पुरे दिगम्बराचार्यदीक्षां प्राप्याचार्यपदमवाप। 'सुवर्णकीर्तिः' इति नाम पप्रथे। श्रुतकीर्तिना गुरुणा तस्मै द्वे विद्ये प्रदत्ते चक्रेश्वरीविद्या परकायप्रवेशविद्या च। धर्मदेवे दिवंगते शीलवती दुःखिन्यासीत्। यतः—

यथा नदी विनाऽम्भोदाद्यामिनी शशिनं विना। अम्भोजिनी विना भानुं भर्त्रा कुलवधूस्तथा ॥१॥

राजगृहागतपरिचितमनुष्यमुखेन स्वपुत्रं स्वर्णकीर्तिं तत्रस्थं ज्ञात्वा तन्मिलनाय गता। मिलितः सुवर्णकीर्तिस्तस्याः। उन्मीलितो मातापुत्रस्नेहः। एकदा तया सुवर्णकीर्तिर्भाषितः—"तव पिता दिवमगमत्।

For Private And Personal

त्वमत्र सूरिः। महीधरस्तु राशिल्लसूरिर्नाम श्वेताम्बरसूरिपदे वर्तते। वायटप्रदेशे विहरति। युवां द्वावेकमतीभूय एकं धर्ममाचरतम्।" वायटमानीतस्तया सः। द्वौ बान्धवावेकत्रमीलितौ। सुवर्णकीर्तिर्भाषितो मात्रा, वत्स! त्वं श्वेताम्बर एधि। सुवर्णकीर्तिर्वदति—"राशिल्लसूरिर्दिगम्बराचार्यो भवतु मदनुसरणात्।" एवं वर्तमाने मात्रा द्वे रसवत्यौ कारिते। एका विशिष्टा। द्वितीया मध्यमा कुटुम्बार्था। दिग्वासाः पूर्वमाकारितः। स विशिष्टां रसवतीं भुङ्क्ते स्वैरम्, कुरसवतीं पश्यत्यपि न। राशिल्लसूरिशिष्यौ द्वावागतौ। ताभ्यां निर्जरार्थिभ्यां कुरसवतीं विजह्रे। मात्रा भोजनादनु दिगम्बरः प्रोक्तः—"वत्स! एते श्वेताम्बराः शुद्धाः, त्वमाधाकर्मचिन्तां न करोषि। एते तु वदन्ति—

भुञ्जइ आहाकम्मं सम्मं न य जो पडिकम्मइ लुद्धो। सव्वजिणाणाविमुहस्स तस्स आराहणा नत्थि ॥१॥

तथैव च पालयन्ति। तस्मादेतेषां मिल, मोक्षमिच्छसि चेत्।" सुवर्णकीर्तिर्मातृवचसा प्रबुद्धः श्वेताम्बरदीक्षामाददे। 'जीवदेवसूरिः' इति नाम तस्य दशसु दिक्षु विस्तृतम्। यतिपञ्चशतीसहचरो विहरन् भव्यानां मिथ्यात्वादिरोगान् सुदेशनापीयुषप्रवाहेण निर्दलयति। श्रीसूरेरेकदा देशनायां योगी कश्चिदागतः। स त्रैलोक्यजयिनीं विद्यां साधयितुं द्वात्रिंशल्लक्षणभूषितं नरं विलोकयति। तस्मिन्समये ते त्रय एव। एको विक्रमादित्यः, द्वितीयो जीवसूरिः, तृतीयः स एव योगी, नान्यः। राजाऽवध्यः। नरकपाले एकपुटी षण्मासीं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

यावद्भिक्षा याच्यते भुज्यते च, ततः सिद्ध्यति। तेन सूरिं छलयितुमायातः। सूरीणां सूरिमन्त्रप्रभावाद्वस्त्राण्येव नीलीभूतानि न पुनर्वपुः। ततो गुरुसमीपस्थवाचकजिह्वा स्तम्भिता। श्रीजीवदेवसूरिदृष्टौ स्वजिह्वाया योगपट्टपर्यस्तिकां बबन्ध। सभ्यलोको बिभाय। प्रभुभिः स कीलितः। ततस्तेन खटिकया भूमौ लिखितम्—

" उवयारह उवयारडउ सव्वउ लोउ करेइ। अवगुणि कियइ जु गुणु करइ विरलउ जणणी जणेइ ॥१॥

अहं तव छलनार्थमागतोऽभूवम्। त्वया ज्ञातः, स्तम्भितः, प्रसीद, मुञ्च, कृपां कुरु," इत्यादि। ततः प्रभुभिर्मुक्तोऽसौ वायटनगरे बहिर्मठीं गत्वा तस्थौ। प्रभुभिः स्वगच्छः समाकार्योक्तः—" योगी दुष्टो बहिर्मठेऽस्ति अमुकदिशि। तस्यां दिशि केनापि साधुना साध्व्या वा न गन्तव्यमेव"। तथेति तन्मेने सर्वैः। साध्व्यौ तु द्वे ऋजुतया कुतूहलेन तामेव दिशं गते। योगिना समेत्य चूर्णशक्त्या वशीकृते तत्पार्श्वं न मुञ्चतः। प्रभुभिः स्ववसतौ दर्भपुत्रकः कृतः। तत्करच्छेदे योगिनोऽपि करच्छेदः। मुक्ते साध्व्यौ। मस्तकक्षालनात्परविद्याविदलनेन सुस्थीभूते ते।

अथान्यदोज्जयिन्यां विक्रमादित्येन संवत्सरः प्रवर्तयितुमारेभे। तत्र देशानामनृणीकरणाय मन्त्री निम्बो गुर्जरधरादिशि प्रहितो विक्रमेण। स निम्बो वायटे श्रीमहावीरप्रासादमचीकरत्। तत्र देवं श्रीजीवदेवसूरीन्द्रः प्रत्यतिष्ठिपत्। अन्येद्युर्वायटे लल्लो नाम श्रेष्ठी महामिथ्यादृग्। तेन होमः कारयितुमारब्धः। विप्रा मिलिताः।

For Private And Personal

आसन्नादाचाम्लिकाद् द्रुमात्धूमाकुलोऽहिः कुण्डासन्नोऽपतत्। निर्घृणैर्विप्रैः स वराक उत्पाट्य वह्नौ जुहुवे। लल्लस्तद्दृष्ट्वा विरक्तो विप्रेषु उवाच च—"अहो! निष्ठुरत्वमेतेषाम्। एवं जीवहिंसारता ये तस्मादलमेभिर्गुरुभिः।" एवं वदन् विप्रान् विसृज्य स्वगृहमगमत्। सर्वदर्शनानामाचारान्विलोकते। एकदा मध्याह्ने श्रीजीवदेवसूरीणां साधुसङ्घाटकस्तद्गृहे भिक्षार्थं गतः। तयोः शुद्धभिक्षाग्रहणात्तुष्टः। लल्लेन तौ मुनी आलापितौ। युवयोः के गुरवः?। ताभ्यां श्रीजीवदेवसूरयः कथिताः लल्लस्तत्र गतः। श्रावकद्वादशव्रतीं ससम्यक्त्वां ललौ। अन्यदा लल्लेनोक्तम्—"सूर्यपर्वणि मया द्रव्यलक्षं दाने कथितम्। तस्यार्द्धं व्ययितम्, शेषमर्द्धं गृह्णीत।" न गृह्णन्ति ते निर्लोभाः। लल्लो बाढं प्रीतः। गुरुभिरुक्तम्—"अद्य सायं प्रक्षालितैकपादस्य तव यत्प्राभृतमायाति तदस्मत्पार्श्वे आनेयम्"। इति श्रुत्वा गृहं गतो लल्लः। सायं केनापि द्वे वृषभौ प्राभृतीकृतौ। लल्लेन गुरुपार्श्वमानीतौ। गुरुणोक्तम्—"यत्रैतौ स्वयं यात्वा तिष्ठतः। तत्रैतद्द्रव्यव्ययेन चैत्यं काराप्यम्।" तच्छ्रुत्वा तेन वृषौ स्वच्छन्दं मुक्तौ पिप्पलानकग्रामे गतौ क्वचित् स्थितौ। तत्र भूमौ लल्लेन चैत्यमारब्धम्। निष्पन्नम्। तत्रावधूतः कोऽप्यायातः। तेनोक्तम्—"अत्र प्रासादे दोषोऽस्ति।" जनैरुक्तम्—"को दोषः" तेनोक्तम्—"स्त्रीशल्यमास्ते"। लल्लेन तच्छ्रुत्वा गुरवो विज्ञप्ताः। गुरुभिरुक्तम्—"निःशल्यां भूमिं कृत्वा पुनः प्रासादः कार्यते। लल्ल! त्वया द्रव्यचिन्ता न कार्या। तदधिष्ठात्र्यो धनं पूरयिष्यन्ति।" प्रसाद् उत्कीलयितुमारेभे। शब्द उत्पन्नः, 'चैत्यं नोत्कीलनीयम्।' गुरवो विज्ञप्ताः।

तैर्ध्यानं दध्रे। अधिष्ठात्री देव्यायया। तयोक्तम्—"कन्यकुब्जराजसुताऽहं महणी नाम्नी पूर्वं गूर्जरदेशे वसन्ती म्लेच्छसैन्ये समागते पलायमाना तेषु पृष्ठापतितेषु भियाऽत्र कूपेऽपतम्। मृत्वा व्यन्तरी जाता। अतः स्वाङ्गास्थिशल्याकर्षणं नानुमन्ये। प्रतोल्यां मामधिष्ठात्रीं त्वं कुरु। यथा ऋद्धिं वृद्धिं कुर्वे।" गुरुभिः प्रतिपन्नं तत्। तद्दत्तभूमौ तद्योग्या देवकुलिका कारिता। तत्र धामितं धनं लब्धम्। लल्लो निष्प्रतिमल्लसुखभाजनमभवत्। सङ्घश्च तुष्टः। लल्लद्वेषाद् द्विजैर्मुमूर्षुर्गौश्चैत्ये क्षिप्ता। सा तत्र मृता। श्रावकैर्विज्ञप्तं तद् गुरवे। गुरुणा विद्याबलाद्गौर्ब्रह्मभवने क्षिप्ता। 'यच्चिन्त्यते परस्य तद्वायाति संमुखमेव'। ब्राह्मणैरनन्योपायत्वाज्जीवदेवसूरयोऽनुनीताः। जीवदेवसूरे! तारय नः। श्रीसूरिभिस्ते तर्जिताः, उक्ताश्च—"यदि मच्चैत्ये मत्पट्टसूरेश्च श्रावकवत् सर्वां भक्तिं कुरुध्वे, मत्सूरेः सूरिपदप्रस्तावे हेममययज्ञोपवीतं दत्थ, तत्सुखासनं स्वयं वहथ, तदा गामिमां ब्रह्मालयादाकृषामि अन्यथा तु न"। तैरपि कार्यातुरैः सर्वमङ्गीकृतम्। अक्षरादिभिः स्थैर्यमुत्पादितम्। ततो गौराकृष्याचार्यैर्बहिः क्षिप्ता। तुष्टं चातुर्वर्ण्यम्। कालान्तरे मरणासत्तौ सूरिभिस्तस्माद्योगिनो बिभ्यद्भिः स्वकीयाखण्डकपालस्य सर्वसिद्धिहेतोर्भञ्जनं श्रावकाग्रे कथितम्। अन्यथा विद्यासिद्धौ सङ्घोपद्रवं करिष्यति। तथैव तैस्तदा चक्रे। योगी निराशश्चिरमरोदीत् ॥

॥ इति श्रीजीवदेवसूरिप्रबन्धः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अथार्यखपटाचार्यप्रबन्धः—

क्वापि गच्छेऽनेकातिशयलब्धिसम्पन्नाः श्रीआर्यखपटा नाम आचार्यसम्राजः। तेषां शिष्यो भागिनेयो भुवनो नाम। ते सूरयो भृगुकच्छं विजह्रुः। तत्र बलमित्रो नाम बौद्धभक्तो राजा, बौद्धाश्च महाप्रामाणिकास्ताद्दग्यजमानगर्विताश्च दुर्दान्ताः। 'एकं वानरी, अपरं वृश्चिकेन जग्धा' इति न्यायात् श्वेताम्बराणां धर्मस्थानेषु तृणपूलकान्निक्षेपयन्ति, 'यूयं पशवः' इति भावः। अनयाऽवज्ञया खपटाचार्या न चुक्रुधुः, गुरुत्वात्। यतः—

उपद्रवत्सु क्षुद्रेषु न क्रुध्यन्ति महाशयाः। उत्फालैः शफरैः किं स्याल्लोलः कल्लोलिनीपतिः॥ १॥

भुवनस्तु चुकोप। श्रावकशतसहस्रसङ्कुलो राज्ञः पार्श्वं ययौ। श्रीसङ्घगुर्वनुज्ञां गृहीत्वा तत्रोच्चैरुवाच—

तावड्डिण्डिमघोषणां विदधतां तावत्प्रशंसन्तु च, स्वात्मानं प्रथयन्तु तावदतुलां रीढां च पूज्ये खलाः।
यावत्प्राज्यघृतप्रतर्पितबृहद्भानुप्ररोहत्पृथुज्वालाजालकरालजल्पनिवहैर्नोत्तिष्ठतेऽयं जनः॥ १॥

राज्ञा बलमित्रेणोक्तम्–" साधो! किं किमात्थ?" भुवनो बभाण–"तव गुरवस्तार्किकंमन्या गेहेनर्दिनः

For Private And Personal

श्वेताम्बरान्निन्दन्ति। ततो वयं वादाय त्वत्सदः संप्राप्ताः। आस्फालय तान्मया सह, एकदा भवतु श्रोतॄणां कर्णकौतुकम्"। ततो राज्ञा ते आहूताः। चतुरङ्गसभायां वादं कारिताः। भुवनमुनिपञ्चाननतर्कचपेटाताडिताः फेरण्डा इव तूष्णीकाः समजनिषत। राजादिभिर्घोषितः— जयः श्वेताम्बरशासनस्य। वर्तन्ते चैत्येषु महोत्सवाः। बौद्धास्तु हिमहतपद्मवनाभा जाताः। तं बौद्धापमानं श्रुत्वा बौद्धाचार्यो गुडशस्त्रपुराद् वृद्धकराख्यो महातार्किको भृगुपुरमगात्। राजानमवोचत्—"श्वेताम्बरैः सह वादं कारापय"। राज्ञा भुवनप्रज्ञास्फूर्तिज्ञेन वारितोऽपि नास्थात्। वादेऽजित एव सोऽपि भुवनेन जितः। न खलु यमो भूतानां प्रीयते। सभ्याः प्रभाषिताः भो! भो! शृणुत—

यट्टङ्को दृषदो यदुष्णकिरणो ध्वान्तस्य यच्छीतगुः, शेफालिकुसुमोत्करस्य च दशा कर्षः पतङ्गस्य यत्।
अद्रेर्यत्कुलिशः प्रचण्डपवनो मेघस्य यद्यत्तरोः, पर्शुर्यत्करिणो हरिः प्रकुरुते तद्वादिनोऽसावहम् ॥ १ ॥

सभ्याश्च चमत्कृता उज्जुघुषुः—"जयति धवलाम्बरशासनम्"। वृद्धकरोऽपमानाशनितप्तोऽनशनं कृत्वा गुडशस्त्रपुरे वृद्धकराख्यो यक्ष उत्पन्नः। प्राग्वैरेण जैनानुपद्रवति, व्याधिवर्द्धनभापनधनहरणादिप्रकारैः। गुडशस्त्रपुरसङ्घेन आर्यखपटास्तद्विज्ञप्ताः, तत्र गताः। तत्र च यक्षायतनं प्रविश्य यक्षस्य कर्णयोरुपानहौ बबन्धुः। वक्षसि पादौ ददुः। लोको मिलितः। राजा तत्रत्यस्तत्रागतः। राज्ञि तत्रागते आचार्याः श्वेत-

वस्त्रेण स्वं सर्वमङ्गमावृत्य तस्थुः । राजा यत्र यत्रोद्घाटयति, तत्र तत्र स्फिजावेव दृश्येते । ततः क्रुद्धो राजा घातान्दापयति खपटाचार्यस्याङ्गे । ते घाताः शिरीषकोषादपि कोमलेष्वन्तःपुरीणामङ्गेषु लेगुः । उच्छलितोऽन्तःपुरे स्त्रीणां कोलाहलः—“ हा नाथ ! रक्ष रक्ष, हा ! हन्यामहे केनाप्यदृष्टेन, कथं जीविष्यामः ? । ” राजा सूरिशक्तिचमत्कृतमनाः सूरीणां पादौ लग्नः, “ प्रसद्य मम सपरिजनस्य जीवितभिक्षां देहि, कृपालुस्त्वम् ” इत्याद्युवाच। यक्षस्तु स्वस्थानादुत्थायोपसूरि समागतो विनीतः पादसंवाहनां कुरुते। “ मम किटिकामात्रस्योपरि वः कः कटकारम्भ” इति ब्रूते। मिलितो लोकः। आर्यखपटैर्यक्ष उचे–“रे अधम! अस्मद्युथान्पराबभूषसि ? पराभव, यद्यस्ति प्राभवम् ” । यक्षः प्राह स्म—“ हनूमति रक्षति सति शाकिन्यः पात्राणि कथं ग्रसन्ते ?। तव भृत्योऽस्मि। मा मां पीडय। तव सङ्गं बान्धववद्रक्षितोऽस्मि ” राजाद्यः सर्वे चमत्कृताः सूरिभक्ता बभूवुः । सूरयः प्रासादान्निर्गत्य यदा बहिर्गतास्तदा यक्षः पाषाणमूर्त्तिः सहायातः । द्वे दृषदौ, द्वे दार्षदकुण्डिके, सूक्ष्मयक्षाः सहागुः । नगरप्राकारद्वारायातेन सूरीन्द्रेण यक्षाद्या विसृष्टाः स्वस्थानमगुः । कुण्डिके तु पुरद्वारे सूरिणा स्थापिते, लोके ख्यातिनिमितम्। राजा प्रबोध्य सद्यः श्रावकः कृतः स्वसौधं गतः। ‘ प्रभावनानर्तकी रङ्गाचार्यः ’ इति सूरीन्द्रस्तत्र चातुर्वर्ण्येन वर्णयामासे । तदैव भृगुपुरात्साधू द्वावागतौ, ताभ्यां प्रभवः प्रोक्ताः—“ भगवन् ! भृगुपुरादत्रागच्छद्भिर्भवद्भिर्या कपरिका गूढमधारि । सा क्षुल्लकेनैकेनावाच्यत । वाचयता आकृष्टिलब्धिर्लब्धा । तद्वशादिभ्यानां गृहेषु निष्पन्नां रसवतीमाकृष्यानीय भुङ्क्ते स्म ।

तथा कुर्वन् गच्छेन ज्ञातो निषिद्धो न निवर्तते, रसनेन्द्रियपरवशत्वात् । ततः सङ्घेन हक्कितः । क्रुद्धवा गत्वा बौद्धानां मिलितः । तदाचार्य इव जातः । बौद्धानां पात्राणि मठात्स्वेन गृहमेधिनां गृहेषु नयति । ततो भक्त-पूर्णानि तानि स्वेनैव मठमायान्ति । तथा दृष्ट्वा लोको बौद्धभक्तोभवन्नास्ते । यदुचितं तत्कुरुध्वम् । तदवधा-र्यार्यखपटदेवा भृगुपुरमगुः । प्रच्छन्नाः स्थिताः । बौद्धानां पात्राणि अन्नपूर्णान्यागच्छन्ति । शिलाविकुर्वणेन खे बभञ्जुः । पतन्ति पात्रेभ्यः शालिमण्डकमोदकाद्यंशाश्च लोकस्य मस्तकेषु । चेलकः सूरीणां समागमनं संभाव्य भीतो नष्टो वराकः । सूरयः ससङ्घा बौद्धानां प्रासादमगमन् । बुद्ध उपलमूर्तिः सम्मुख उत्थितः 'जय जय महर्षिकुलशेखरः' इत्यादि स्तुतीरतनिष्ट । पुनर्जिनपतिशासनस्य प्रभावः प्रदिदीपे । आर्यखपटा अन्यत्र विजह्रुः ।

इतश्च पाटलीपुत्रपत्तने दाहडो नाम नृपो विप्रभक्तो जैनयतीनाह्वयत्, अवोचच्च—"विप्रान्नमस्कुरुत, इति ।" जैनैरुक्तम्—"राजन् ! नेदं युक्तम्, गृहिणोऽमी, वयं च यतयो वन्द्याः" । दाहडेनोक्तम्—"न वन्दध्वे चेच्छिरांसि वः कृन्तामि ।" जैनयतिभिः सप्तदिनी याचिता । राज्ञा दत्ता । दैवादार्यखपट-शिष्य उपाध्यायो महेन्द्रनामा भृगुकच्छात्तत्रायातः । तदग्रे यतिभिः स्वदुःखं कथितम् । तेन संधीरितास्ते । प्रातः करवीरकम्बे द्वे रक्तश्वेते लात्वा माहेन्द्र उपदाहडमगात् । तदाऽष्टमदिनप्रत्यूषं वर्त्तते । राज्ञोक्तम्—

For Private And Personal

"श्वेताम्बरा विप्रप्रणामायाहूयन्ताम्।" आहूताः, अग्रे उद्धास्तस्थुः। महेन्द्रेण रक्तां कम्बां वाहयित्वा राजा भाषितः—"किं प्रथममितो नमामः? किंवा इतो नमामः? इति" एतद्भणनसमकालमेव विप्राणां मस्तकास्त्रुटित्वा ताडफलवद्भूमौ पेतुः। तद्दृष्ट्वा भीतो राजा चाटूनि करोति स्म, "पुनर्नैवमविनयमाचरिष्यामि," इति उवाच। तदा महेन्द्रेणोक्तम्—

कः कण्ठीरवकण्ठकेसरसटाभारं स्पृशत्यंह्रिणा?
कः कुन्तेन शितेन नेत्रकुहरे कण्डूयनं काङ्क्षति?।
कः संनह्यति पन्नगेश्वरशिरोरत्नावतंसाश्रिये?
यः श्वेताम्बरशासनस्य कुरुते वन्द्यस्य निन्दामिमाम्॥ १॥

विशेषतो भीतो नृपो दर्शनस्य पादेष्वलगीत्। तदा महेन्द्रेण धवला करवीरकम्बा दिग्द्वयेऽपि वाहिता। पुनर्विप्राणां मस्तकाः स्वस्थानेषु सस्रुञ्जुः। प्रतिबोधितो राजा विप्रलोकश्च। एवं प्रभावनाऽभूत्। भुवनोऽपि बौद्धान्परिहृत्य स्वगुरूणां मीलितः। तेन स्वगुरवः क्षामिताः। तैर्गुरुभिस्तस्य भुवनस्य बहुमानं दत्तम्। पश्चाद्भुवनो गुणवान्, विनयवान्, चारित्रवान्, श्रुतवान्, जातः। ततं आर्यखपटाः सूरिपदं भुवनाय दत्त्वाऽनशनेन द्यामारुरुहुः।

जीवितव्यं च मृत्युं च द्वयमाराधयन्ति ये। त एव पुरुषाः शेषः पशुरेष जनः पुनः ॥ १ ॥

॥ इति महाप्रभावकश्रीखपटाचार्यप्रबन्धः ॥

(५)

॥ अथ पादलिप्ताचार्यप्रबन्धः ॥

कौशलानाम नगरी, तत्र विजयवर्मा राजा नयविक्रमसागरः। फुल्लनामा श्रेष्ठी जैनः प्राज्ञो दानभटः। तस्य प्रतिमाख्या नाम पत्नी रूपशीलसत्यनिधिवसुधा। सा निष्पुत्रत्वेन खिद्यते। केनाप्युक्तम्—" वैरोट्यां देवीमाराधय " तपोनियमसंयमैस्तयाऽऽराधिता सा प्रत्यक्षीबभूव, अभिदधौ च—" वत्से ! किमर्थं स्मृताऽहम् ? " श्रेष्ठिन्योक्तम्—" पुत्रार्थम् " वैरोट्योक्तं " वत्से ! शृणु, विद्याधरवंशे श्रीकालिकाचार्योऽभूत्। तस्य विद्याधरो नाम गच्छः। तत्र आर्यनागहस्ती नाम सूरिरास्ते, स सम्प्रति इमां नगरीमागतोऽस्ति क्रियाज्ञानार्णवः, तस्य पादोदकं पिब ! " तत्र श्रेष्ठिनी भावनाभरभरिता गता। करस्थगुरुपदप्रक्षालनजलपात्रः शिष्यकः सम्मुखमागच्छन् दृष्टः। श्रेष्ठिन्या पृष्टम्—" तपोधन ! किमेतत् ? " शिष्यकेणोक्तम्—" गुरूणां पादोदकम् "। तया पीतम्।

अथ गुरवोऽवन्दिषत। गुरवो प्राहुः—" यन्मत्तो दशकरान्तरस्थया त्वयाऽम्भः पीतं तत्ते पुत्रस्त्वत्तो दशयोजनान्तरितः स्थाता। पश्चादन्ये नवपुत्रा भवितारः सारश्रियः।" सा चम्पकमकरन्दपानमत्तमधुपध्वनिकोमलया गिरा बभाषे—" आद्य पुत्रो युष्मभ्यं दातव्यो मया " इत्युक्त्वा निजसदनमगमत्। भर्त्रे गुरूक्तं स्वोक्तं चाकथयत्। तुष्टः सः। श्रेष्ठिनी काले नागेन्द्रस्वप्नसप्रभावं पुत्रं प्रासूत। माङ्गल्योत्सवाः प्रसरन्ति स्म। गुरुसत्कः सन् वर्द्धते। नागेन्द्र इति नाम तस्य। शरीरावयवैर्गुणैश्च सकललोककमनीयैर्ववृधे। गुरुभिरागत्याष्टमे वर्षे दीक्षितः। मण्डनाभिधस्य मुनेः पार्श्वे पाठितः। बालोऽपि सर्वविद्यो जातः।

एकदा गुरुणा जलार्थं प्रस्थापितो विहृत्यागत आलोचयति—

अंबं तंबच्छीए अपुप्फियं पुप्फदंतपंतीए। नवसालिकंजियं नववहूइ कुडएण मे दिन्नम् ॥ १ ॥

इति गाथया गुरुभिर्भणितम्—" पलित्तओ " शृङ्गारगर्भभणितिश्रवणात्। ' किल त्वं विनेयक! रागाग्निना प्रदीप्तः ' इति भावः। नागेन्द्रेणाचचक्षे—" भगवन्! मात्रया एकया प्रसादः क्रियताम्, यथा ' पालित्तओ ' इति रूपं भवति।" अत्र को भावः?, गगनगमनोपायभूतां पादलेपविद्यां मे दत्त, येनाहं ' पादलिप्तक ' इत्यभिधीये।' ततो गुरुभिः पादलेपविद्या दत्ता। तद्वशात्खे भ्रमति। दशवर्षदेशीयः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सन्सूरिपदे स्थापितः । बहुशिष्यपरिकरितो भ्रमति । नित्यं शत्रुञ्जयोज्जयन्तादिपञ्चतीर्थीं वन्दित्वाऽरसविरसमश्नाति । तपस्तप्यते ।

यद्दूरं यद्दूराराध्यं यच्च दूरे प्रतिष्ठितम् । तत्सर्वं तपसा साध्यं तपो हि दुरतिक्रमम् ॥ १ ॥

ततः सर्वसिद्धयः ।

एकदा पाटलीपुत्रं गताः । तत्र मुरण्डो नाम खण्डितचण्डारिमुण्डो राजा । तस्य षण्मासान् यावच्छिरोर्त्तिरुत्पन्नाऽऽस्ते । मन्त्रतन्त्रौषधैर्न निवृत्ता । विशेषविदुरान्सूरीनागतान् श्रुत्वा राज्ञा मन्त्रिणः प्रहिताः प्रोचुः— " भगवन् ! राजराजेन्द्रस्य शिरोऽर्त्तिर्निवर्त्त्यताम् , कीर्तिधर्मौ संवीयेताम् । " ततः सूरीन्द्रो राजकुलं गत्वा मन्त्रशक्त्या क्षणमात्रेण शिरोर्त्तिमपहरति स्म । ततोऽद्यापि पठ्यते—

जह जह पएसिणिं जाणुयंमि पालित्तओ भमाडेइ । तह तह से सिरवियणा पणस्सइ मुरंडरायस्स ॥१॥

प्रीतो राजा । संवृत्ता उत्सवाः । पादलिप्तसूरिणा यशसा पवित्रितानि सप्तभुवनानि । राजा स्तौति—

चेतः सार्द्रतरं वचः सुमधुरं दृष्टिः प्रसन्नोज्ज्वला शक्तिः क्षान्तियुता श्रुतं हृतमदं श्रीर्दीनदैन्यापहा ।
रूपं शीलयुतं मतिः श्रितनया स्वामित्वमुत्सेकिता निर्मुक्तं प्रकटान्यहो नवसुधाकुण्डान्यमून्युत्तमे ॥१॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एकदा सभायां नृपेणोक्तम्—" राजकुले महान्विनयः । " आचार्यैरभिहितम्—" गुरुकुले महीयान्विनयः ।" तत आचार्याः प्राहुः–"यो वः परमभक्तो राजपुत्रोऽस्ति । स आहूयताम्, इदं च तस्मै कथ्यताम्– ' गत्वा विलोकय गङ्गा किं पूर्ववाहिनी ? किंवा पश्चिमवाहिनी ? इति,' आहूतो राजपुत्रः, प्रहितश्च विलोकनाय, यत्र तत्र भ्रमित्वा समागतः, भाषितो भूपालेन–" विलोकिता गङ्गा, किं पूर्ववाहिनी ? पश्चिमवाहिनी ? इति वा " । अथ राजपुत्रः प्रचख्यौ—" किमत्र विलोकनीयम् ? बाला अपि विदन्ति, ' गङ्गा पूर्ववाहिनी ' गत्वा च विलोकिता मया, पूर्ववाहिन्येवास्ते । " राजा श्रुत्वाऽस्थात् । सूरिभिः साधुः स्वस्तस्मै कर्मणे प्रहितस्तत्र गतः । दण्डकं प्रवाह्य व्यलोकत, पूर्ववाहिनी सुरवाहिनी । उपसूरि समागतः, अभाषत—" अहं गङ्गां पूर्ववाहिनीं पूर्वमश्रौषम् , गत्वाऽपश्यंश्च तथैवाज्ञासिषम्, तत्त्वं तु सद्गुरवो विदन्ति । " एतच्च राजपुत्रयत्योश्चरितं राजसूर्योः प्रच्छन्नचरैरुक्तम् । राजा मेने एव—" महियान् गुरुकुले विनयः । ' ततः पठ्यते—

निवपुच्छिअेण गुरुणा भणिओ गंगा कओमुही वहइ । संपाइयवं सीसो जह तह सवत्थ कायव्वम् ॥१॥

पाटलिपुत्रादथ सूरीन्द्रो लाटान्गतः । तत्रैकस्मिन्पुरे बालैः सह क्रीडति । मुनयो गोचरचर्यार्थं गताः । तावता श्रावकाः प्रवन्दनार्थमायाताः । आकारसंवृत्योपविष्टः प्रभुः । श्राद्धेषु गतेषु पुनरपवरकमध्यं गत्वा खेलति । तावता केऽपि वादिनः समायाताः तैर्विजनं दृष्ट्वा ' कूकुड्कू ' इति शब्दः कृतः । सूरीन्द्रेण तु

For Private And Personal

' म्याउं ' इति बिडालशब्दः कृतः । ततो दर्शनं दत्तम् । वादिनः पादयोः पेतुः प्रभोः । "अहो ! प्रत्युत्पन्नमतित्वम् ते, चिरं जय बालभारति " । ततः आरब्धा प्रभुणा तैः सह गोष्ठी । तेष्वेकेन पृष्टम्—

पालित्तय ! कहसु फुडं सयलं महिमंडलं भमंतेण । दिट्ठं सुयं च कत्थवि चंदणरससीयलो अग्गी ॥१॥

प्रभुणाऽभाणि—

अयसाभिओगसंदूमियस्स पुरिसस्स सुद्धहिययस्स । होइ वहंतस्स दुहं चंदणरससीयलो अग्गी ॥१॥

तुष्टास्ते वादिनस्तुष्टुवुः—" साक्षादमरगुरुरेव त्वम् , धन्या ब्राह्मी, या ते वदने वसति । "

इतश्च ये पूर्वं ब्राह्मणाः खपटाचार्यगच्छीयेनोपाध्यायेन माहेन्द्रेण भाषिताः, ते बलात्केचित्प्रव्राजिताः तेषां स्वजनाः पाटलिपुत्रपत्तने वसन्ति । पूर्ववैराज्जैनयतीनुपद्रवन्ति । सा च वार्त्ता प्रभुश्रीपादलिप्ताचार्यैः श्रुता । स्वयं ते गगनेन तत्र गताः, अभ्यदधुश्च—" रे ! मयि वीरे सति के नाम जैनजनमुपद्रवन्ति ? जर्जराऽपि यष्टिः स्थालीनां भञ्जनाय प्रभवत्येव । " ततस्ते काकनाशं नष्टाः । प्रभुः पुनर्भृगुपुरमगमत् । तत्रार्यखपटसम्प्रदायात्सकलाः कलाः प्रजग्राह । ढंकपर्वते नागार्जुनः प्रभुणा खगमनविद्यां शिक्षापितः परमार्हतोऽजनि । तेन पादलिप्तकपुरं नव्यं कृतम् दशार्हमण्डपोग्रसेनभवनादि च तत् तत्र तत्र प्रभुणा गाथा युगलेन स्तवनं

For Private And Personal

बद्धम् । तत्र हेमसिद्धिविद्याऽवतारिताऽस्तीति वृद्धाः प्राहुः । नागार्जुनेन च रसः प्रारब्धः, सोऽतिकृच्छ्रेऽपि कृते न बन्धमायाति । ततो वासुकिनागस्तेनाराद्धः । तेन श्रीपादलिप्तेन चोपायोऽर्पितः– "यदि कान्तीपुर्याः श्रीपार्श्वनाथमानीय तद्दृष्टौ रसं बध्नासि, तदा बन्धमायाति, नान्यथा ।" नागार्जुनेन पृष्टम्– "कथमेति श्रीपार्श्वनाथः ।" वासुकिना पादलिप्तेन च प्रोक्तम्–"उत्पाट्यानय गगनाध्वना ।" गतो नागार्जुनः कान्तीम् । तत्र चैत्यं पृच्छति । तत्र धनपतिश्रेष्ठी चैत्यगोष्ठिकः । तस्याग्रे नैमित्तिकेन प्रोक्तम्—" पार्श्वं रक्षेः । धूर्त्त एकस्तद्धरणाय भ्रमन्नस्ति ।" स सचतुष्पुत्रो देवं रक्षति । नागार्जुनस्तत्र गतः । तेषु रक्षत्सु हरणावसरो नास्ति । तैरेव सह नागार्जुनेन प्रीतिरारेभे । विश्वास उत्पन्नः । आरात्रिकमङ्गलदीपकसमये पितापुत्रेषु प्रणामाधोमुखेषु पार्श्वं खेन गृहित्वा गतो नागार्जुनः । सेडीसंज्ञनदीतटे श्रीपार्श्वदृष्टौ रसः स्तम्भितः, स्तम्भनकं नाम तत्तीर्थं प्रपथे, स्तम्भनपुरं नाम पुरं च ।

अथ श्री पादलिप्ताचार्याः प्रतिष्ठापनपुरं दक्षिणाशामुखभूषणं गोदावरीनदीतरङ्गरङ्गज्जलकणहृतपान्थश्रमभरं जग्मुः । तत्र सातवाहनो राजा विदुषां योधानां दानशौण्डानां भोगिनां च प्रथमः । तस्य सभायां वार्त्ताऽभूत्, यथा–" पादलिप्ताचार्याः सर्वविद्यावनितावदनरत्नदर्पणाः समागच्छन्तः सन्ति प्रातः ।" ततः सर्वैः पण्डितैः संभूय स्त्यानघृतभृतं कचोलकमर्पयित्वा निजः पुरुष एक आचार्याणां संमुखः प्रेषितः । आ-

चार्यैर्घृतमध्ये सूच्येका क्षिप्ता। तथैव च प्रतिप्रेषितं तत्। राज्ञा स वृत्तान्तो ज्ञातः। पण्डिताः पृष्टाः— "घृतपूर्णकचोलकप्रेषणेन वः को भावः।" तैरुक्तम्—"एवमेतन्नगरं विदुषैः पूर्णमास्ते, यथा घृतस्य वर्तुलकम्। तस्माद्विमृश्य प्रवेष्टव्यम्, इति भावो नः।" राज्ञा निगदितम्—"तर्हि आचार्यचेष्टाऽपि भवद्भिर्ज्ञायताम्—'यथा निरन्तरेऽपि घृते मिजतिक्ष्णतया सूची प्रविष्टा। तथाऽहमपि विद्वन्निबिडे नगरे प्रवेक्ष्यामि,' इति दध्वनुः पण्डिताः।" सर्वे पण्डिता राजेन्द्रोऽपि संमुखं गताः सुरसरिल्लहरिहारिण्या वाण्या तुतुषुः। नगरमानीतो गुरुर्निर्वाणकलिकाप्रश्नप्रकाशादिशास्त्राणि संददर्भ। एकां च तरङ्गलोलां नाम चम्पूं राज्ञोऽग्रे नवां निर्माय सदसि व्याचख्ये प्रभुः। भवत्ययं कवीन्द्रः।

शाणोत्तीर्णमिवोज्ज्वलद्युतिपदं बन्धोर्द्धनारीश्वरः श्लाघालङ्घनजाङ्घिको दिवि लतोद्भिन्नेव चार्थोद्गतिः।
ईषच्चूर्णितचन्द्रमण्डलगलत्पीयूषहृद्यो रसस्तत्किञ्चित्कविकर्मसमर्म न पुनर्वाग्डिण्डिमाडम्बरः॥ १॥

इत्येवं कवयोऽपि तुष्टुवुः। एका तु वेश्या विदुषी राजसभ्या गुणज्ञाऽपि सूरीन्द्रान्न स्तौति। ततो राज्ञा भणितम्—"वयं सर्वे तुष्टाः स्तुमः। केवलमियमेका न स्तौति। तत्क्रियतां येन स्तुते।" तदाकर्ण्य सूरयो वसतिमाययुः। रात्रौ गच्छसम्मत्या कपटमृत्युना मृताः पवनजयसामर्थ्यात्। शबयानमाश्रितः सूरिः। चातुर्वर्ण्यं रोदिति। वेश्यागृहद्वारे नीतं शबयानम्। वेश्याऽपि तत्रागता रुदती वदति—

For Private And Personal

" सीसं कहवि न फुट्टं जम्मस्स पालित्तयं हरंतस्स । जस्स मुहनिज्झराओ तरङ्गलोला नई वूढा ॥ १ ॥ "

पुनरजीवत्प्रभुः । वेश्ययाऽभाणि—"मृत्वाऽऽत्माऽस्तावि ?।" सूरिराह स्म–" मृत्वाऽपि पञ्चमो गेय इति किं न श्रुतम् ?।" अथ प्रभुः शत्रुञ्जये रदनसंख्योपवासानशनेन ईशानेन्द्रसामानिकत्वेनोदपद्यत ।

॥ इति श्रीपादलिप्ताचार्यप्रबन्धः ॥

(६)

॥ अथ श्रीवृद्धवादिसिद्धसेनयोः प्रबन्धः ॥

विद्याधरेन्द्रगच्छे श्रीपादलिप्तसूरिसन्ताने स्कान्दिलाचार्याः साधितजैनकार्याः पुस्फुरुः । ते यतनया विहरन्तो गौडदेशं ययुः । तत्र कोशलाख्यग्रामवासी मुकन्दो नाम विप्रः । स तेषां सूरीणां मिलित इत्थं देशनामश्रौषीत्—

भोगे रोगभयं सुखे क्षयभयं वित्तेऽग्निभूभृद्भयं, दास्ये स्वामिभयं गुणे खलभयं वंशे कुयोषिद्भयम् ।
स्नेहे वैरभयं नयेऽनयभयं काये कृतान्ताद्भयं, सर्वं नाम भयं भवे यदि परं वैराग्यमेवाभयम् ॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रुत्वा भवोद्विग्नश्चारित्रं गृहीत्वा गुरुभिः समं भृगुपुरं गतः। स मुकुन्दमुनिस्तारस्वरेणाधीते रात्रौ। साधूनां निद्राभङ्गो भवति। ततस्तान् दुर्मनायमानान् ज्ञात्वा गुरुभिः पठन्निषिद्धोऽसौ। यथा—"वत्स! नमस्कारान्गुणय। रात्रावुच्चैर्भाषणे हिंस्रजीवजागरणादनर्थदण्डो मा भूदिति।" ततो दिवा पठने श्रावकश्राविकादीनां कर्णज्वरो भवति। केनाप्युक्तम्—"किमयमियद्वयाः पठित्वा मुशलं पुष्पापयिष्यति।" तच्छ्रुत्वा मुकुन्दः खिन्नः सद्यो महाविद्यार्थी एकविंशत्योपवासैर्जिनालये ब्राह्मीमाराराध। तुष्टाऽसौ प्रत्यक्षीभूय जगाद—"सर्वविद्यासिद्धो भव।" ततः कवीन्द्रीभूय स्वगुर्वन्तिकमागत्य सङ्घसमक्षमक्षामस्वरेण बभाण—"यन्ममोपहासः केनापि कृतो 'यदयं किं मुशलं पुष्पापयिष्यति' विलोकयत लोकाः! मुशलं पुष्पापयामि।" इत्युक्त्वा मुशलमानाय्य चतुष्पथे स्थित्वा तत्पुष्पापयामास मन्त्रशक्तिमाहात्म्यात्। स्कन्धस्थितेन तेन भ्रमति पठति च—

पत्तमवलंबियं तह जो जंपइ फुल्लए न मुसलमिह। तमहं निराकरित्ता फुल्लइ मुसलं ति थावेमि ॥ १ ॥

तथा—

मद्गोशृङ्गं शक्रयष्टिप्रमाणं शीतो वह्निर्मारुतो निष्प्रकम्पः।
यस्मै यद्वा रोचते तन्न किञ्चित् वृद्धो वादी भाषते कः किमाह ॥ १ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अप्रतिमल्लो वादी सोऽभूत् । स्कन्दिलाचार्यैः स्वपदे निवेशितः । 'वृद्धवादी' इति ख्यातं नजातं । स्कन्दिलाचार्योः समाधिमृत्युरथेन धामगमन् ।

एकदा वृद्धवादी भृगुपुरं गच्छन्नास्ते । इतश्चावन्त्यां विक्रमादित्यो राजा । यस्य दानानि—

अष्टौ हाटककोटयस्त्रिनवतिर्मुक्ताफलानां तुला, पञ्चाशन्मदगन्धलुब्धमधुपक्रोधोद्धुराः सिन्धुराः ।
लावण्योपचयप्रपञ्चितदृशां पण्याङ्गनानां शतं, दण्डे पाण्ड्यनृपेण ढौकितमिदं वैतालिकस्यार्प्यताम् ॥ १ ॥

इत्यादीनि ख्यातानि । तस्य राज्ये मान्यः कात्यायनगोत्रावतंसो देवर्षिर्द्विजः । तत्पत्नी देवसिका । तयोः सिद्धसेनो नाम पुत्रः । स प्रज्ञाबलेन जगदपि तृणवद्गणयति । प्रज्ञायाश्च इयत्ता नास्ति । जगति ततः पञ्चाते—

मिता भूः पत्यायां स च पतिरपां योजनशतं, सदा पान्थः पूषा गगनपरिमाणं कलयति ।
इति प्रायो भावाः स्फुरदवधिमुद्रामुकुलिताः, सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयते ॥ १ ॥

" येन वादे जीये तस्याहं शिष्यः स्याम् " । इति प्रतिज्ञा तस्य । क्रमेण वृद्धवादिनः कीर्तिं श्रुत्वा स तत्संमुखं धावति स्म । सुखासनारूढो भृगुपुरं गतः । तावद् भृगुकच्छान्निर्गतो वृद्धवादी मार्गे मिलितः । परस्परमालापो जातः । सिद्धसेनो भाषते—"वादं देहि ।" सूरिराह—"दद्मः, परमत्र के सभ्याः ?। सभ्यान् विना

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वादे जिताजिते को वदेत् ?"। सिद्धसेनेनोक्तम्—"एते गोपालकाः सभ्या भवन्तु।" वृद्धवादिना भणितम्—"तर्हि ब्रूहि।" ततः सिद्धसेनस्तत्र नगरगोचरे चिरं संस्कृतेन जल्पमनल्पमकरोत्। क्रमेण च स्थितः। गोपैरुक्तम्—"किमप्ययं न वेत्ति।" केवलमुच्चैः पूत्कारं पूत्कारं कर्णाविः पीडयति। धिग् धिग्। वृद्ध ! त्वं ब्रूहि किञ्चित्।" ततो वृद्धवादी कालज्ञः कच्छां दृढं बद्ध्वा धिन्दिगिच्छन्दसा क्रिडति—

"नवि मारियइ नवि चोरियइ परदारहगमणु निवारियइ। थोवाथोवमुदाविपइ सागिण्हु गुट गुजाईयइ ॥१॥

पुनः पठति—

गुलसिउं चावइं तिलतांदली वेडिइं वजावइं वांसली। पहिरणिओढणि हुइ कांयली इण परिग्वालह पूजइ रुली ॥१॥

नृत्यति च—

कालउ कंबलु अनुनीवाडु छासिहिं खालडु भरिउं नि पाडु।
अइवडु पडियउ नीलइ झाडि अवरकिसरगहसिंगनिलाडि ॥ २ ॥"

गोपा हृष्टाः प्रोचुः—"वृद्धवादी सर्वज्ञः अहो ! कीदृक् श्रुतिसुखमुपयोगि पठति। सिद्धसेनस्तु असारपाठकः," इत्यनिन्दन्।

For Private And Personal

ततः सिद्धसेनः प्राह—“ भगवन् ! मां प्रव्राजय । तव शिष्योऽहं वादे सभ्यसमक्षं जितत्वात् । ” अथ वृद्धवादी आह—“ भृगुपुरे राजसभायामावयोर्वादोऽस्तु । गोपसभायां को वादः ? । ” सिद्धसेनेनोक्तम्—“अहमकालज्ञः । त्वं तु कालज्ञः । यः कालज्ञः स सर्वज्ञः । त्वयैव जितम् । ” इत्येवं वदन्तं ते तत्रैव दीक्षयामास । तत्र भृगुपुरनरेन्द्रेण तं वृत्तान्तं ज्ञात्वा तालारसो नाम ग्रामः स्थापितः प्रौढः । नाभेयचैत्यं कारितम् । नाभेयबिम्बं वृद्धवादिना प्रतिष्ठितम् । संघो जगर्ज । सिद्धसेनस्य दीक्षाकाले ‘ कुमुदचन्द्रः ’ इति नामासीत् । सूरिपदे पुनः ‘ सिद्धसेनदिवाकरः ’ इति नाम प्रपथे । तदा ‘ दिवाकरः ’ इति सूरेः संज्ञा । स्वामिशब्दवत् । वृद्धवादी अन्यत्र विहरति । सिद्धसेनस्त्ववन्तीं ययौ । सङ्घः संमुखमागत्य तं सूरिं ‘ सर्वज्ञपुत्रकः ’ इति बिरुदे पठ्यमानेऽवन्तीचतुष्पथं नयति । तदा राजा विक्रमादित्यो हस्तिस्कन्धारूढः संमुखमागच्छन्नस्ति । राज्ञा श्रुतम्—“ सर्वज्ञपुत्रकः ” इति । तत्परीक्षार्थं हस्तिस्थ एव मनसा सूरेर्नमस्कारं चकार, न वाक्शिरोभ्याम् । सूरिश्चासन्नायातो धर्मलाभं बभाण । राजेन्द्रेण भणितम्–“ अवन्दमानेभ्योऽस्माकं को धर्मलाभः ? । किमयं समर्घो लभ्यमानोऽस्ति ? ” सूरिः श्रुत्वाऽभाणि–“ चिन्तामणिकोटितोऽप्यधिकोऽयं वन्दमानाय देयो । न च त्वया न वन्दिता वयम् , मनसः सर्वप्रधानत्वात् । अस्मत्सार्वज्ञपरीक्षार्थं हि मनसाऽस्मान् वन्दथाः । ” ततस्तुष्टो राजेश्वरो हस्तिस्कन्धादवरुह्य सङ्घसमक्षं ववन्दे कनककोटिं चानाययत् । आचार्यैः सा न जगृहे

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निर्लोभत्वात्। राज्ञाऽपि न जगृहे कल्पितत्वात्। तत आचार्यानुज्ञया संङ्घपुरुषैर्जीर्णोद्धारे व्ययिता। राजवहिकायां त्वेवं लिखितम्—

" धर्मलाभ इति प्रोक्ते दूरादुच्छ्रितपाणये। सूरये सिद्धसेनाय ददौ कोटिं धराधिपः ॥ १ ॥ "

श्रीविक्रमाग्रे अवसरे तेनैव भगवता भणितम्—

पुन्ने वाससहस्से सयंमि वरिसाण नवनवइ कलिए। होही कुमरनरिन्दो तुह विक्कमराय सारिच्छो ॥१॥

अन्यदा सिद्धसेनश्चित्रकूटमटति स्म। तत्र चिरंतनचैत्यस्तम्भमेकं महान्तं दृष्ट्वा कञ्चिदप्राक्षीत्—"कोऽयं स्तम्भो महान्? किंमयः?" तेनोक्तम्—" पूर्वाचार्यैरिह रहस्यविद्यापुस्तकानि न्यस्तानि सन्ति। स्तम्भस्तु तत्तदौषधद्रव्यमयः। जलादिभिरभेद्यो वज्रवत्।" तद्वचनं श्रुत्वा सिद्धसेनस्तस्य स्तम्भस्य गन्धं गृहीत्वा प्रत्यौषधरसैस्तमाच्छोटयामास। तैः स प्रातरम्बुजवद्विचकास। मध्यात्पतिताः पुस्तकाः। तत्रैकं पुस्तकं छोटयित्वा वाचयन्नाद्यपत्र एव द्वे विद्ये लभते स्म। एका सर्षपविद्या, अपरा हेमविद्या। तत्र सर्षपविद्या सा—यथोत्पन्ने कार्ये मान्त्रिको यावन्तः सर्षपान् जलाशये क्षिपति तावन्तोऽश्ववारा द्विचत्वारिंशदुपकरणसहिता निःसरन्ति। ततः परबलं भज्यते। सुभटाः कार्यसिद्धेरनन्तरमदृशीभवन्ति। हेमविद्या पुनरक्लेशेन शुद्धहेम-

For Private And Personal

कोटीं सद्यो निष्पादयति येन तेन धातुना। तद्विद्याद्वयं सम्यग् जग्राह। यावदग्रे वाचयति तावत्स्तम्भो मिलितः पुस्तकगर्भः। खे च वागुत्पन्ना–“अयोग्योऽसि ईदृशानां रहस्यानां, मा चापलं कृथाः। सद्यो मा म्रियस्व, इति।” ततो भीतः स्थितः। यद्विद्याद्वयं लब्धं तल्लब्धम्। नाधिकं लभ्यते अप्राप्तितः। चित्रकूटात्सिद्धसेनोऽथ पूर्वदेशे कूर्मारपुरं गतः। तत्र देवपालराजानं प्रबोध्य नीलीरागजैनमकार्षीत्। तत्रास्थात्। नित्यमिष्टगोष्ठी वर्त्तते। कियानपि कालो जगाम। एकदा राज्ञा रह एत्य साश्रुणा विज्ञप्तम्—“भगवन्! पापा वयं नेदृशमधुरगोष्ठीयोग्याः, येन सङ्कटे पतिताः स्म।” सूरीन्द्रः प्रपच्छ—“किं सङ्कटं वः?।” राजा प्राह—“सीमालभूपालाः संभूय मद्राज्यं जिघृक्षव आयान्ति।” सूरिराह—“राजन्! मा स्म विह्वलो भूः। तवैव राज्यश्रीर्वशे यस्याहं सखा।” राजा हृष्टः। परचक्रमायान्तम्। विद्याद्वयशक्त्या राजेन्द्रः समर्थो विहितः। सूरिणा भग्नं परबलम्। गृहीतं तत्सर्वस्वम्। वादितान्यातोद्यानि। ततो बाढं राजा सूरिभक्तः सम्पन्नः। सूरयः सगच्छा अपि क्रियाशैथिल्यमादधत।

यतः—

चाटुकारगिरां गुम्फैः कटाक्षैर्मृगचक्षुषाम्। केलिकल्लोलितैः स्त्रीणां भिद्यते कस्य नो मनः ॥१॥

सुअइ गुरू निचिंतो सीसावि सुअंति तस्स अणुकमसो। ओसाहिज्जइ मुक्खो हुड्डाहुड्डं सुयंतेहिं ॥१॥

For Private And Personal

श्रावकाः पौषधशालायां प्रवेशमेव न लभन्ते ।

दगपाणं पुप्फफलं अणेसणिज्जं गिहत्थकिच्चाइं । अजया पडिसेवंती जइवेसविडंबगा नवरं ॥ १ ॥

इति गाथा समाचर्यते । तदपयशः श्रुत्वा वृद्धवादी कृपया तं निस्तारयितुमेकाकीभूय गच्छं वृषभेषु न्यस्य तत्र गतः । द्वारे स्थितः सूरीणामग्रे कथापयति द्वास्थैः । यथा—" वादी एको ज्यायानायातोऽस्ति।" मध्ये सूरिभिराहूतः । पुर उपवेशितः । वस्त्रावगुण्ठितसर्वकायो वृद्धवादी वदति व्याख्याहि—

अणहुल्लियफुल्लमतोडहि मा रोवा मोडहिं । मणकुसुमेहिं अच्चि निरंजणु हिंडइ वणेण वणु ॥ १ ॥

सिद्धसेनश्चिन्तयन्नपि न वेत्त्यर्थम् । ततो ध्यायति—" किमेते मे गुरवो वृद्धवादिनः ? " येषां भणितिमहमपि व्याख्यातुं न शक्नोमि । पुनः पुनः पश्यता उपलक्षिता गुरवः । पदयोः प्रणम्य क्षामिताः पश्चार्थं पृष्टाः । तेऽथ व्याचक्षिरे । यथा—'अणहुल्लियफुल्ल' प्राकृतस्यानन्तस्वात् अप्राप्तफलानि पुष्पाणि मा त्रोटय । को भावः ? योगः कल्पद्रुमः । कथं ? यस्मिन्मूलं यमनियमाः, ध्यानं प्रकाण्डप्रायं, स्कन्धश्रीः समता, कवित्ववक्तृत्वयशःप्रतापमारणस्तम्भनोच्चाटनवशीकरणादिसामर्थ्यानि पुष्पाणि, केवलज्ञानं फलम् । अद्यापि योगकल्पद्रुमस्य पुष्पाण्युद्गतानि सन्ति तत्केवलफलेन तु पुरः फलिष्यन्ति । तान्यप्राप्तफलान्येव किमिति

For Private And Personal

त्रोटयसि मा त्रोटय इति भावः । ‘ मा रोवा मोडहि ’ इह रोपा पञ्चमहाव्रतानि तानि मा मोटय । ‘ मणकुसुमेहिं ’ मनःकुसुमैर्निरञ्जनं जिनं पूजय । ‘ हिंडइ वणेण वणु ’ वनाद्वनं किं हिंडसे राजसेवादीनि कृच्छाणि विरसफलानि कथं करोषि इति पदार्थः । ततो वादी तां गुरुशिक्षां मूर्ध्नि धृत्वा राजानमापृच्छ्य वृद्धवादिना सह निबिडचारित्रधरो विजहार । अपरापरगुरुभ्यः पूर्वगतश्रुतानि लेभे । वृद्धवादी द्यां गतः । एकदा सिद्धसेनः संघं मेलयित्वाह स्म—“ सकलानप्यागमानहं संस्कृतान्करोमि, यदि आदिशथ । ” ततः संघो वदति स्म—“ किं संस्कृतं कर्त्तुं न जानन्ति श्रीमन्तस्तीर्थकरा गणधरा वा । यदर्धमागधेनागमानकृषत । तदेवं जल्पतस्तव महत्प्रायश्चितमापन्नम् । किमेतत्तवाग्रे कथ्यते । स्वयमेव जानन्नसि । ” ततो विमृश्याभिदधेऽसौ—“ सङ्घोऽवधारयतु अहमाश्रितमौनो द्वादशवार्षिकं पाराञ्चिकं नाम प्रायश्चितं गुप्तमुखवस्त्रिकारजोहरणादिलिङ्गः प्रकटितावधूतरूपश्चरिष्याम्युपयुक्तः । ” एवमुक्त्वा गच्छं मुक्त्वा ग्रामनगरादिषु पर्यटन् द्वादशवर्षे श्रीमदुज्जयिन्यां महाकालप्रासादे शेफालिकाकुसुमरञ्जिताम्बरालङ्कृतशरीरः समागत्यासांचक्रे । ततो देवं कथं न नमसीति लोकैर्जल्प्यमानोऽपि नाजल्पत् । एवं च जनपरम्परया श्रुत्वा विक्रमादित्यदेवः समागत्य जल्पयांचकार—“क्षीरलिलिक्षो! भिक्षो! किमिति त्वया देवो न वन्द्यते । ” ततस्तु राजानं प्रतीदमवादि वादिना—“ मया नमस्कृते लिङ्गभेदो भवतामप्रीतये भविष्यति । ” राज्ञोचे—“ भवतु क्रियतां नमस्कारः । ” तेनोक्तम्—श्रूयतां तर्हि । ” पद्मासनेन भूत्वा द्वात्रिंशद्द्वात्रिंशिकाभिर्देवं स्तोतुमुपचक्रमे । तथाहि—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स्वयंभुवं भूतसहस्रनेत्रमनेकमेकाक्षरभावलिङ्गम् । अव्यक्तमव्याहतविश्वलोकमनादिमध्यान्तमपुण्यपापम् ॥ १ ॥

इत्यादि श्रीवीरद्वात्रिंशद्द्वात्रिंशिका कृता । परं तस्मात्तादृक्‌ं चमत्कारमनालोक्य पश्चात् श्रीपार्श्वनाथद्वा-त्रिंशिकामभिकर्तुं कल्याणमन्दिरस्तव[वं चक्रे]प्रथमश्लोके एव प्रासादस्थितात् शिखिशिखाग्रादिव लिङ्गाद्धूमव-र्त्तिरुदतिष्ठत् । ततो जनैर्वचनमिदमूचे-“ अष्टविद्येशाधीशः कालाग्निरुद्रोऽयं भगवांस्तृतीयनेत्रानलेन भिक्षुं भस्मसात्करिष्यति । ” ततस्तडित्तेज इव सतडात्कारं प्रथमं ज्योतिर्निर्गतम् । ततः श्रीपार्श्वनाथबिम्बं प्रकटी-बभूव । तद्वादिना विविधस्तुतिभिः स्तुतं क्षमितं च । राजा विक्रमादित्यः पृच्छति-“ भगवन् । किमिदमपूर्वं दृश्यते । कोऽयं नवीनो देवः प्रादुरभूत । ” अथ सिद्धसेनः प्रोवाच-राजन् ! पूर्वमस्यामेवावन्त्यां श्रेष्ठिनीभद्रा-सूनुर्द्वात्रिंशत्पत्नीयौवनपरिमलसर्वस्वग्राही ‘ अवन्तीसुकुमालः ’ इति ख्यातः श्रेष्ठ्यासीत् । स शालिभद्र इव गृहव्यापारं किमपि नाकार्षीत् । किन्तु मातैव सर्वामपि गृहनाप्तिमकृत । एकदा दशपूर्वधरार्यसुहस्त्याख्यो मौर्यवंशमुकुटसम्प्रतिनृपगुरुः सगच्छो विहरन्नवन्तीमागत्य भद्रानुमत्या गृहैकदेशेऽस्थात् । रात्रौ ते नलिनी-गुल्माख्यस्य स्वर्विमानस्य विचारं गुणयन्ति । तपोधनजने विश्रान्ते सति तं विचारं शृण्वन् सान्द्रचन्द्रातपायां निशि स्वैरं पद्भ्यां भ्रमन्नवन्तीसुकुमालस्तत्रायातः सम्यगश्रौषीत् । आगत्य गुरून् जगौ-भगवन् ! किमेतद् गुण्यते ? । आर्यैरुक्तम्-वत्स ! नलिनीगुल्मविचारः । अवन्तीसुकुमालः प्राह स्म-ईदृशमेवेदं प्रेत्य मयानु

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भूतम् । इदं केनोपायेन लभ्यते ? । आर्यैर्भणितम्—" चारित्रेण । " अवन्तीसुकुमालोऽप्याविभातात् गृहीतनलिनीगुल्मविमानग्रहणप्रतिज्ञः स्वयं कृतलोचः पश्चाद्गुरुभिरपि दत्तसामायिकः कन्थारकुडङ्गाख्यं स्मशानमेत्य कायोत्सर्गी भवान्तरभार्यया शृगालीत्वमापन्नया साऽर्भया क्षुधितया दर्भसूचीवेधक्षरत्तद्रुधिरधारागन्धलुब्धागतया भक्षितः सद्भावनाजर्जरितपापकर्मा नलिनीगुल्ममाप । प्रातस्तन्माता सस्नुषा गुरुमुखादवगतपुत्रवृत्तान्ता तत्स्मशानमागत्य विललाप विविधं विविधम् । पुनर्गृहमागता । एकां सगर्भां वधूं गृहे मुक्त्वा एकत्रिंशता वधूभिः सह संयममादाय दिवं लेभे । सगर्भस्थितवधुकाजातपुत्रेण स्फीतयौवनेनायं प्रासादः कारितः । मम पितुर्महाकालोऽत्राभूदिति महाकालनाम दत्तम् । श्रीपार्श्वनाथबिम्बं मध्ये स्थापितम् । कत्यप्यहानि लोके पूजितम् । अवसरे द्विजैस्तदन्तरितं कृत्वा मृडलिङ्गमिदं स्थापितम् । अधुना मत्कृतस्तुतितुष्टः श्रीपार्श्वनाथः प्रादुरासीत् । मत्प्रेरितशासनदेवताबलात्तु मृडलिङ्गं विदध्रे । सत्यासत्ययोरन्तरं पश्य । तच्छ्रवणान्नृपः शासने ग्रामशतान्यदत्त देवाय । उपगुरुः ससम्यक्त्वां द्वादशव्रतीमुपादत्त । अश्लाघत वादीन्द्रम्

अहयो बहवः सन्ति भेकभक्षणतत्पराः । एक एव श्रीशेषो हि धरणीधरणक्षमः ॥ १ ॥

तथा त्वम् । अहो ! कवित्वशक्तिस्ते ।

पंदं सपदि कस्य न स्फुरति शर्करापाकिमं रसालरससे किमं भणिति वैभवं कस्य न ।
तदेतदुभयं किमप्यमृतनिज्झरोद्गारिभिस्तरङ्गयति यो रसैः स पुनरेक एव क्वचित् ॥ १ ॥

न नाम्ना नो वृत्त्या परिचयवशाच्छन्दसि नवा, न शब्दव्युत्पत्त्या निभृतमुपदेशान्न च गुरोः ।
अपि त्वेताः स्वैरं जगति सुकवीनां मधुमुचो, विपच्यन्ते वाचः सुकृतपरिणामेन महता ॥२॥

इति स्तुत्वा सम्राटस्वस्थानमयासीत् । वादीन्द्रोऽपि प्रभावनातुष्टेन सङ्घेन मध्येकृतः । अन्येद्युः सिद्धसेनो विहरन् ऑंकाराख्यं मालवेषु नगरं ययौ । तत्र भक्तैः श्रावकैर्विज्ञप्तं सूरये । यथा-भगवन् ! अस्यैव नगरस्यासन्नो ग्राम एक आसीत् । तत्र सुन्दरो नाम राजपुत्राग्रणीः । तस्य द्वे पत्न्यौ । एका प्रथमां पुत्रीं प्रासूत, अस्त्रियत च । तदैव सपत्न्यप्यासन्नप्रसवा वर्तते । मा स्म इयं पुत्रं प्रसूय भर्तुः सविशेषं वल्लभाभूत्, इति स्त्रीत्वोचितया तुच्छया बुद्ध्या सूतिकामेकामवोचत-यदा इयं मे सपत्नी प्रसवकाले दैववशात्त्वामाहूयति । तदा त्वया परस्थानात्प्रथमं संगृहीतं मृतं किञ्चिदपत्यं तत्र संचार्यम् । तज्जातकं चेत्पुत्रो भवति तदा स्वयं गृहीत्वा ग्रामाद्दूरे व्युत्स्रष्टव्यम् । इदं हेम गृहाण । इति सूत्रणां चक्रुषी । विधिवशात्तत्र तत्तया तथैव कृतम् । राजपुत्रो जातमात्रो ग्रामाद्दूरे क्षिप्तो ह्री । राजपुत्रोऽपि पुण्याधिक इति तत्कुलदेवतया धेनुरूपेण दुग्धं दत्त्वा पालयन्त्याऽष्टवर्षदेशीयः कृतः । अत्रैव ऑंकारनगरे शिवभवनाधिकारिणा भरटकेन दृष्टः, आलापितः, स्वां दीक्षां ग्राहितः । अन्यदा कन्यकुब्जदेशाधिपतिर्नरेन्द्रो जात्यन्धो दिग्विजयकार्येण प्रत्यासन्नः समावासितः । रात्रौ लघुभरटकस्य शिवादेशः संजातः—" त्वया कन्यकुब्जेशाय शेषा देया । तयाऽसौ

For Private And Personal

सज्जाक्षो भावी ।" तद्वाक्यं लघुर्वृद्धद्गुरवे समाख्याय तदाज्ञया शेषामादाय स्कन्धावारमध्यमेत्य राजामात्यानुवाच—"भो ! भो ! स्वनाथमस्मत्संमुखमानयध्वम् । यथा सद्यः कमलदललालितं स्वविषयग्रहणक्षमाक्षं कुर्महे ।" ततोऽमात्यनुन्नो राजा तत्रायातः । ऋषिदत्तां शेषामादायाक्ष्णोर्निवेश्य सज्जाक्षो जातः । प्रीतः भक्त्या ग्रामशतानि शासनेऽदात् । अत्रैव च ओंकारे इममुत्तुङ्गं प्रासादमचीकरत् । वयमिह पुरे वमामः । जैनः प्रासादः कारयितुं न लभ्यते । मिथ्यादृशो बलिनः । तस्मात्तत्कुरु येन इतोऽधिकं तुङ्गं रम्यं चैत्यं निष्पद्यते । बली त्वमेवेति । तद्वचनं श्रुत्वा वादी अवन्तीमागत्य चतुःश्लोकीं हस्ते कृत्वा विक्रमादित्यद्वारमेत्य द्वास्थेनोपराजं श्लोकमचीकथत् । स तेन कथितो यथा—

दिदृक्षुर्भिक्षुरायातस्तिष्ठति द्वारि वारितः । हस्तन्यस्तचतुःश्लोक उतागच्छतु गच्छतु ॥ १ ॥

तं श्लोकं श्रुत्वा विक्रमादित्येन प्रतिश्लोकः कथापितो यथा—

दत्तानि दशलक्ष्याणि शासनानि चतुर्दश । हस्तन्यस्तचतुःश्लोक उतागच्छतु गच्छतु ॥ २ ॥

वादिना तं श्लोकं श्रुत्वा द्वास्थद्वारेण भाणितं राज्ञे—"दर्शनमेव भिक्षुरीहते नार्थम् ।" ततो राज्ञा स्वदृष्टौ आहूतः । उपलक्षितो भाषितश्च—"भगवन् किमिति चिरादृश्यध्वे ।" आचार्यैरुक्तम्—धर्मकार्यवशाच्चिरादायाताः । श्लोकचतुष्टयं शृणु । राज्ञि शृण्वति पठितं तत् । यथा—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अपूर्वेयं धनुर्विद्या भवता शिक्षिता कुतः । मार्गणौघः समभ्येति गुणो याति दिगन्तरम् ॥ १ ॥
सरस्वती स्थिता वक्त्रे लक्ष्मीः करसरोरुहे । कीर्तिः किं कुपिता राजन् येन देशान्तरं गता ॥ २ ॥
कीर्तिस्ते जातजाड्येव चतुरम्भोधिमज्जनात् । आतपाय धरानाथ ! गता मार्त्तण्डमण्डलम् ॥ ३ ॥
सर्वदा सर्वदोऽसीति मिथ्या संस्तूयसे जनैः । नारयो लेभिरे पृष्ठं न वक्षः परयोषितः ॥ ४ ॥

श्रुत्वा तुष्टो विक्रमश्चतुरो गजान् यथासंख्यं वसन-सुगन्धद्रव्य-हेमनाणक-हारादिपूर्णान् आनाय्य सूरिमभाणीत्—"इमे गृह्यन्ताम् ।" सूरिरूचे—" नैतदर्थ्यहम् । " पुनर्विक्रमो भणति—"मन्मही।सारभूतांश्चतुरो देशान् स्वैरमादत्स्व ।" वाद्याह—" इदमपि नेच्छामि ।" तर्हि किमिच्छसीति ?। श्रूयताम्—" ॐकारे चतुर्द्वारं जैनप्रासादं शिवप्रासादादुच्चं कारय । स्वयं सपरिच्छदः प्रतिष्ठां च तत्र कारयेति ।" राज्ञा तत्तथैव कृतम् । प्रभावनया संघस्तुष्टः । एवं जैनं धर्मं द्योतयन् वादी दक्षिणस्यां पृथ्वीस्थानपुरं विहरन् गतः । तत्रा-युरन्तं ज्ञात्वाऽनशनं लात्वा स्वर्गलोकमध्यवात्सीत् । तत्रत्यसंघेन चित्रकूटे सिद्धसेनगच्छं तं वृत्तान्तं ज्ञापयितुं वाग्मी भट्ट एकः प्रस्थापितः । स तत्सूरिसभायां श्लोकपूर्वार्द्धं पुनः पुनः पठति स्म—

स्फुरन्ति वादिखद्योताः साम्प्रतं दक्षिणापथे ।

पुनः पुनः पाठे सिद्धसारस्वतया सिद्धसेनभगिन्योक्तम्—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नूनमस्तंगतो वादी सिद्धसेनो दिवाकरः ॥ १ ॥

पश्चाद् भट्टेन प्रपञ्च्योक्तम् । ततः शोको विहितो विसृष्टश्च ।

॥ इति वृद्धवादिसिद्धसेनयोः प्रबन्धः ॥

(७)

अथ श्रीमल्लवादिप्रबन्धः—

श्रीइन्द्रभूतिमानम्य प्रभावकशिरोमणेः । श्रीमल्लवादिसूरीन्दोश्चरितं कीर्त्यते मया ॥ १ ॥
खेटाभिधं महास्थानमस्ति गूर्जरमण्डले । देवादित्याह्वयस्तत्र विप्रोऽभूद्वेदपारगः ॥ २ ॥
सुभगाख्या सुता तस्य विधवा बालकालतः । कस्मादपि गुरोर्मन्त्रं सौरं सा प्राप भक्तिभाक् ॥ ३ ॥
आकृष्टस्तेन मन्त्रेण भास्वांस्तामुपागमत् । तद्भोगलाभादापन्नसत्त्वा सा न चिरादभूत् ॥ ४ ॥
दैविकेभ्यः सुराङ्गेभ्यो गर्भो यद्यपि नोद्भवेत् । तदानीं त्वौदारिकाङ्गधातुयोगात्तु सम्भवी ॥ ५ ॥
आपाण्डुगण्डफलकां ग्लानाङ्गीं वीक्ष्य तां पिता । बभाषे किमिदं वत्से ! निन्द्यमाचरितं त्वया ॥६॥
सा प्राह स्म पितर्नैवं प्रमादविकृतिर्मम । मन्त्राकृष्टागतोष्णांशुन्यासः पुनरयं बलात् ॥ ७ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इत्युक्तोऽपि विषण्णात्मा देवादित्यः स्वकर्मणा । तां पुत्रीं प्रेषयामास सभृत्यां वलभीं पुरीम् ॥ ८ ॥
कालेन तत्र साऽसूत पुत्रं पुत्रीं च सुव्रतम् । तत्रैवोवास सुचिरं जनकार्पितजीविका ॥ ९ ॥
क्रमेण ववृधाते तौ पुत्रौ बालार्कतेजसौ । यावदष्टौ व्यतिक्रान्ता वत्सराः क्षणवत्तयोः ॥ १० ॥
तावदध्यापकस्यान्ते पठितुं तौ निवेशितौ । कलहेऽर्भं निष्पितृकमूचिरे लेखशालिकाः ॥ ११ ॥
तद्गिरा खिद्यमानोऽर्भः प्रपच्छ जननीं निजाम् । किं मातर्नास्ति मे तातो येन लोकोक्तिरीदृशी ॥१२॥
माता जगाद नो वेद्मि किं पीडयसि पृच्छया । ततः खिन्नः स सत्त्वाढ्यो मर्तुमैच्छद्विषादिभिः ॥१३॥
साक्षादागत्य तं भानुरूचेऽहं वत्स ! ते पिता । पराभवकरो यस्ते तस्याहं प्राणहारकः ॥ १४ ॥
इत्युक्त्वा कर्करं सूक्ष्ममेकं तस्य समार्पयत् । ताड्यो तेन त्वया द्वेषी सद्यो मर्त्तेति चादिशत् ॥ १५ ॥
तेन कर्करशस्त्रेण बालः स बलवत्तरः । विब्रुवन्तं विब्रुवन्तमवधील्लेखशालिकम् ॥ १६ ॥
वलभीपुरभूपेन श्रुतो बालवधः स तु । कुपितस्तं शिशुं सद्यो जनैः स्वान्तिकमानयत् ॥ १७ ॥
उक्तश्च रे ! कथं हंसि नृशंस ! शिशुकानमून् । बालः प्रत्याह न परं बालान्हन्मि नृपानपि ॥ १८ ॥
इत्थं वदन्महीपालमहन् कर्करकेण तम् । मृतस्य तस्य साम्राज्य स रा[redacted]नि विक्रमी ॥ १९ ॥
शिलादित्य इति ख्यातः सुराष्ट्राराष्ट्रभास्करः । लेभे सूर्याद्वरं वाहं परचक्रोपमर्दकम् ॥ २० ॥
निजां स्वसारं स ददौ भृगुक्षेत्रमहीभुजे । असूत सा सुतं दिव्यतेजसं दिव्यलक्षणम् ॥ २१ ॥

For Private And Personal

शत्रुञ्जये गिरौ चैत्योद्धारमारचयच्च सः । श्रेणिकादिश्रावकाणां श्रेणावात्मानमान्वयत् ॥ २२ ॥
कदाचिद्दागतास्तत्र बौद्धास्तर्कमदोद्धुराः । ते शिलादित्यमगदन् सन्ति श्वेताम्बरा इमे ॥ २३ ॥
वादे जयन्ति यद्यस्मांस्तदि ते सन्तु नीवृति । वयं यदि जयामोऽभूत्तदा गन्तव्यमेतकैः ॥ २४ ॥
दैवयोगाज्जितं बौद्धैः सर्वे श्वेताम्बराः पुनः । विदेशमाशिश्रियिरे पुनः कालबलार्थिनः ॥ २५ ॥
शिलादित्यनृपो बौद्धान् प्रपूजयति भक्तितः । शत्रुञ्जये च ऋषभस्तैर्बुद्धीकृत्य पूजितः ॥ २६ ॥
इतश्च सा शिलादित्यभगिनी भर्तृमृत्युतः । विरक्ता व्रतमादत्त सुस्थिताचार्यसंनिधौ ॥ २७ ॥
अष्टवर्षं निजं बालमपि व्रतमजिग्रहत् । सामाचारीमपि प्राज्ञं किञ्चित्किञ्चिदजिज्ञपत् ॥ २८ ॥
एकदा मातरं साध्वीं सोऽपृच्छदभिमानवान् । अल्पः कथं नः संघोऽयं प्रागप्यल्पोऽभवत्कथम् ॥२९॥
साऽप्युदश्रुरभाषिष्ट वत्स ! किं वच्मि पापिनी । श्रीश्वेताम्बरसंघोऽभूद्भूयानपि पुरे पुरे ॥ ३० ॥
तादृक्प्रभावनावीरसूरीन्द्राभावतः परैः । स्वसात्कृतः शिलादित्यो भूपालो मातुलस्तव ॥ ३१ ॥
तीर्थं शत्रुञ्जयाह्वं यद्दिने मोक्षकारणम् । श्वेताम्बराभावतस्तद्बौद्धैर्भूतैरिवाश्रितम् ॥ ३२ ॥
विदेशवासिनः श्वेताम्बराः खण्डितडम्बराः । क्षिपन्ति निहितौजस्काः कालं क्वचन केचन ॥ ३३ ॥
इति श्रुत्वाऽकुपद्बालस्तथागतभटान्प्रति । प्रतिज्ञां च चकारोच्चैः प्रावडम्भोधरध्वनिः ॥ ३४ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नोन्मूलयामि चेद्बौद्धान् नदीरय इव द्रुमान् । तदा भवामि सर्वज्ञध्वंसपातकभाजनम् ॥ ३५ ॥
इत्युक्त्वाऽम्बां समापृच्छ्य बालः कालानलद्युतिः । मल्लनाम गिरिं गत्वा तेपे तीव्रतरं तपः ॥ ३६ ॥
आसन्नग्रामभैक्षेण पारणं च चकार सः । दिनैः कतिपयैस्तत्र जज्ञौ शासनदेवता ॥ ३७ ॥
भूत्वा व्योमनि साऽवादीत्के मिष्टाः? सोऽपि बालकः । तच्छ्रुत्वाऽख्यत्सानुभवं वल्ला इति स्वदत्तदृक् ॥
षण्मास्यन्ते पुनः सोचे स्वस्था केन सहेत्यथ ? । बालर्दिरप्यभाषिष्ट समं घृतगुडैः शुभैः ॥ ३९ ॥
अवधारणशक्त्या तं योग्यं शाशनदेवता । प्रत्यक्षा न्यगदद्वत्स ! भूयाः परमतापहः ॥ ४० ॥
नयचक्रस्य तर्कस्य पुस्तकं लाहि मानद ! । वाणी सेत्स्यति ते सम्यक् कुतर्कोरगजाङ्गुली ॥ ४१ ॥
भूमौ मुमोच तं तर्कपुस्तकं बालको मुनिः । प्रमादः सुलभस्तत्र वयोलीलाविशेषतः ॥ ४२ ॥
रुष्टा शासनदेव्यूचे विहिताशातना त्वया । सान्निध्यं ते विधाताऽस्मि प्रत्यक्षीभविता न तु ॥ ४३ ॥
तं लब्धा पुस्तकं मल्लवादी देदीप्यते स्म सः । शस्त्रं पाशुपतमिव मध्यमः पाण्डुनन्दनः ॥ ४४ ॥
आगत्य वलभीद्रङ्गं सुराष्ट्राराष्ट्रभूषणम् । शिलादित्यं युगप्रान्तादित्यद्युतिरुवाच सः ॥ ४५ ॥
बौद्धैर्मुधा जगज्जग्धं प्रतिमल्लोऽहमुत्थितः । अप्रमादी मल्लवादी त्वदीयो भगिनीसुतः ॥ ४६ ॥
शिलादित्यनृपोपान्ते बौद्धाचार्येण वाग्मिना । वादिवृन्दारकश्चक्रे तर्कवर्दरमुल्बणम् ॥ ४७ ॥
मल्लवादिनि जल्पाके नयतर्कबलोल्बणे । हृदये हारयामास षण्मासान्ते स शाक्यराट् ॥ ४८ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

षण्मासान्तनिशायां स स्वं निशान्तमुपेयिवान् । तर्कपुस्तकमाकृष्य कोशात्किञ्चिदवाचयत् ॥ ४९ ॥
चिन्ताचक्रहते चित्ते नार्थास्तान्धर्तुमीश्वरः । बौधः स चिन्तयामास प्रातस्तेजोवधो मम ॥ ५० ॥
श्वेताम्बरस्फुलिङ्गस्य किञ्चिदन्यदहो ! महः । निर्वासयिष्यन्तोऽमी हा ! बौद्धाः साम्राज्यशालिनः ॥५१॥
धन्यास्ते ये न पश्यन्ति देशभङ्गं कुलक्षयम् । परहस्तगतां भार्यां मित्रं चापदि संस्थितम् ॥ ५२ ॥
इति दुःखौघसंघट्टाद्विदद्रे तस्य हृत्क्षणात् । नृपाह्वानं समायातं प्रातस्तस्य द्रुतं द्रुतम् ॥ ५३ ॥
नोद्घाटयन्ति तच्छिष्या गृहद्वारं वराककाः । मन्दो गुरुर्नाद्य भूपसभामेतेति भाषिणः ॥ ५४ ॥
तद्गत्वा तत्र तैरुक्तं श्रुत्वा तन्मल्ल उल्लसन् । अवोचच्च शिलादित्यं मृतोऽसौ शाक्यराट् शुचा ॥ ५५ ॥
स्वयं गत्वा शिलादित्यस्तं तथास्थमलोकत । बौद्धान्प्रावासयद्देशाद्धिक् प्रतिष्ठाच्युतं नरम् ॥ ५६ ॥
मल्लवादिनमाचार्यं कृत्वा वागीश्वरं गुरुम् । विदेशेभ्यो जैनमुनीन्सर्वानाजूहवन्नृपः ॥ ५७ ॥
शत्रुञ्जये जिनाधीशं भवपञ्जरभञ्जनम् । कृत्वा श्वेताम्बरायत्तं यात्रां प्रावर्तयन्नृपः ॥ ५८ ॥
कालान्तरे तत्र पुरे रङ्को नामाभवद्वणिक् । तस्य कार्पटिको हट्टे न्यासीचक्रे महारसम् ॥ ५९ ॥
रसेन तेन स्पृष्टस्य लोहस्य तपनीयताम् । स दृष्ट्वा हट्टसदनपरावर्त्तं चकार च ॥ ६० ॥
वञ्चयित्वा कार्पटिकं रङ्कः सोऽभून्महाधनः । तत्पुत्र्या राजपुत्र्याश्च सख्यमासीत्परस्परम् ॥ ६१ ॥

For Private And Personal

हैमांकङ्कनीकामेकां दिव्यरत्नविभूषिताम् । रङ्कपुत्रीकरे दृष्ट्वा याचते स्म नृपात्मजा ॥ ६२ ॥
तां न दत्ते पुना रङ्को राजा तं याचते बलात् । तेनैव मत्सरेणासौ म्लेच्छसैन्यमुपानयत् ॥ ६३ ॥
भग्ना पूर्वलभी तेन संजातमसमञ्जसम् । शिलादित्यः क्षयं नीतो वणिजा स्फीतऋद्धिना ॥ ६४ ॥
ततोऽथाकृष्य वणिजा प्रक्षिप्ता अरिणे शकाः । तृष्णाद्या ते स्वयं मृत्वा हतो व्याधिर्महानयम् ॥६५॥
विक्रमादित्यभूपालात्पञ्चर्षित्रिकवत्सरे । जातोऽयं वलभीभङ्गो ज्ञानिनः प्रथमं ययुः ॥ ६६ ॥
खवर्त्मना गतान्यर्हद्बिम्बानि विषयान्तरम् । देवताधिष्ठितानां हि चेष्टा सम्भाविनी तथा ॥ ६७ ॥
एतच्च प्रथमं ज्ञात्वा मल्लवादी महामुनिः । सहितः परिवारेण पञ्चासरपुरीमगात् ॥ ६८ ॥
नागेन्द्रगच्छसत्केषु धर्मस्थानेष्वभूत्प्रभुः । श्रीस्तम्भनकतीर्थेऽपि सङ्घस्तस्येशतामधात् ॥ ६९ ॥

श्रीमल्लवादिचरितं जिनशासनीयतेजःसमुन्नतिपवित्रमिदं निशम्य ।
भव्याः ! कवित्ववचनादिविचित्रलब्धिव्रातैः प्रभावयत शासनमार्हतं भोः ॥ ७० ॥

॥ इति श्रीमल्लवादिचरित्रम् ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अथ श्रीहरिभद्रसूरिप्रबन्धः—

श्रीचित्रकूटे हरिभद्रो विप्रश्चतुर्दशविद्यास्थानज्ञः। हस्यां पादुकाः 'पञ्च मदूरीकृतदर्शनान्यानि पञ्चममाघः इति कृत्वा' उदरे पट्टः 'उदरं विद्यया स्फुटतीति कृत्वा' जालं कुद्दालो निःश्रेणी सह चलन्ति (?)। यत्पठितमहं न जानामि तस्य शिष्यो भवामीति प्रतिज्ञा। एकदा चतुष्पथासन्नभूमिं व्रजता गाथामेकां पठ्यमाना याकिनी नाम साध्वी श्रुता। तया

चक्किदुगं हरिपणगं पणगं चक्कीण केसवो चक्की। केसवचक्कीकेसवदुचक्किकेसीयचक्कीय ॥ १ ॥

इति गाथा पेठे। न च तेन बुद्धा। अग्रे गत्वोक्तम्–"मातर्! खरं चिकचिकापितम्।" साध्व्योक्तम्–"नवं लिप्तम्।" अहो! अनयाऽहमुत्तरेणापि जितः। इति तां ववन्दे। त्वच्छिष्योऽस्मि। गाथार्थं ब्रूहि मातः!। सा प्राह स्म–"मम गुरवः सन्ति।" हरिभद्रः प्राह–क्व ते?। अत्र सन्ति। ततः केनापि श्रावकेण स चैत्यं नीतः। जिनदर्शनं तत्प्रथमं हर्षः।

वपुरेव तवाचष्टे भगवन् वीतरागताम्। नहि कोटरसंस्थेऽग्नौ तरुर्भवति शाड्वलः ॥ १ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जं दिट्ठी करुणातरङ्गियपुडा एयस्स सोमं मुहं । आयारो पसमायरो परियरो संतो पसन्ना तणू ॥
तं नूणं जरजम्ममच्चुहरणो देवाहिदेवो इमो । देवाणं अवराण दीसइ जओ नेयं सरूवं जए ॥

इत्यादि नवीननमस्काराः । ततो जिनभटाचार्यदर्शनम् । प्रतिपत्तिः । चारित्रम् । सूरिपदवी । आवश्यके चक्कीत्यादिदुष्करत्वादावश्यकं तेनैव विवृतम् । 'कलिकालसर्वज्ञः' इति बिरुदम् । रहस्यपुस्तका देवताभ्यो लब्धाः । ते चादरेण जितदिक्पटाचार्याच्छिन्न ८४ मठप्रतिबद्धचउरासीनामकप्रासादस्तम्भे विविधौषधनिष्पन्ने जलज्वलनाद्यसाध्ये क्षिप्ताः । एकदा भागिनेयौ हंसपरमहंसौ पाठयति प्रभुः निष्पन्नौ । परं बौद्धतर्कास्तन्मुखे न पिपठिषतः । तौ गुरुणा वार्यमाणावपि तत्पार्श्वं गतौ । जरतीगृहे उत्तारकः । बौद्धाचार्यान्तिके तद्वेषस्थौ पठतः । कपलिकायां रहस्यानि लिखतः । प्रतिलेखनादिसंस्कारवशाद्दयालू इव ज्ञात्वा गुरुणाऽचिन्ति—" ध्रुवं श्वेताम्बरावेतौ । " द्वितीयाह्ने सोपानश्रेण्यौ खट्याऽर्हद्बिम्बमालिलिखे । तदासन्नायातौ तौ पादौ तत्र न दत्तः । रेखात्रयाङ्कस्तत्कण्ठश्चक्रे । बुद्धोऽयं जात इति कृत्वा उपरि पादो दत्तः । उपरि चटितौ । गुरुणा दृष्टौ । गुरोः समक्षं निषण्णौ । तौ गुर्वास्यच्छायापरावर्त्तं दृष्ट्वा तत्कैतवं तत्कृतमेव मत्वा जठरपीडामिषेण ततो निरक्रामताम् । कपलिकां लात्वा गतौ तौ । विलोकापितौ न स्तः । राजाग्रे कथितम्—" सितपटावुत्कटकपटौ तत्स्वं लात्वा यातः । कपलिकामानायय । " पृष्ठे सैन्यमल्पं गतम् । दृष्टिदृष्टिः । द्वावपि सहस्रयोधौ तौ ।

ताभ्यां निहतं राजसैन्यम्। उद्धृतनष्टैरुपराजं गत्वा कथितं तत्तेजः। पुनर्बहुसैन्यमप्रेषि। दृष्टिमेलापकः। युद्धमेकः करोति। अपरः कपरिकापाणिर्नष्टः। हंसस्य शिरश्छित्वा राज्ञे दर्शितं तैः। तेनापि गुरवे दत्तम्। गुरुराह–"किमनेन कपरिकामानायय।" गता भटाः। रात्रौ चित्रकूटे प्राकारकपाटयोर्दत्तयोस्तदासन्ने सुप्तस्य परमहंसस्य शिरश्छित्वा तैस्तत्रार्पितम्। तेषां बौद्धानां तत्सूरेश्च सन्तोषः। प्रातः श्रीहरिभद्रसूरिभिः शिष्य-कबन्धो दृष्टः। कोपः। तैलकटाहाः कारिताः। अग्निना तापितं तैलम्। १४४० बौद्धा होतुं खे आकृष्टाः शकुनिकारूपेण पतन्ति। गुरुभिर्वृत्तान्तो ज्ञातः। प्रतिबोधाय साधू प्रहितौ। ताभ्यां गाथा दत्ताः–

गुणसेणअग्गिसमा सीहाणंदाय तह पियापुत्ता। सिहिजालिणि माइसुया, धणधणसिरिमो य पइभज्जा ॥ १ ॥
जयविजया य सहोयर धरणो लच्छी य तह पई भज्जा। सेणविसेणो पित्तिय उत्ता जम्मंमि सत्तमए ॥ २ ॥
गुणचन्दवाणवंतर समराइच्च गिरिसेण पाणाउ। एगस्स तओ मुक्खोऽणंतो बीयस्स संसारो ॥ ३ ॥
जह जलइ जलउ लोए कुसत्थपवणाहओ कसायग्गी। तं चुज्जं जं जिणवयण अमियसित्तोवि पज्जलइ ॥४॥

बोधः। शान्तिः। १४४० ग्रन्थाः प्रायश्चित्तपदे कृताः। चित्रकूटतलहट्टिकास्थेन तैलवणिजा प्रतयः कारिताः। तत्प्रथमं याकिनीधर्मसूनुरिति हारिभद्रग्रन्थेष्वन्तेऽभूत्। १४४० पुनर्भवविरहान्तता। गुणसेण-अग्गिसम्माइत्यादिगाथात्रयप्रतिबद्धं समरादित्यचरित्रं नव्यं शास्त्रं क्षमावल्लीबिजं कृतम्। १०० शतक-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पञ्चाशत्-षोडशक-अष्टक-पञ्चलिङ्गी-अनेकान्तजयपताका-न्यायावतारवृत्ति-पञ्चवस्तुक-पञ्चसूत्रक-श्रावकप्रज्ञप्ति नाणायत्तकप्रभृतीनि हारिभद्राणि ।

अत्रान्तरे श्रीमालपुरे कोऽपि धनी श्रेष्ठी जैनश्चतुर्मासके सपरिकरो देवतायतनं व्रजन् सिद्धाख्यं राजपुत्रं द्यूतकारयुवानं देयकनकपदे निर्दयैर्द्युतकारैर्गर्तायां निक्षिप्तं कृपया तद्देयं दत्त्वा अमोचयत् । गृहमानीया-भोजयत् । अपाठयत् । सर्वकार्याध्यक्षमकरोत् । पर्यणाययत् । माता प्रागप्यासीत् । पृथग् गृहेऽस्थात् । मात्रा प्रियया च समं स गृहमण्डनिका । श्रेष्ठिप्रसादाद्धनं बभूव । सिद्धो रात्रावतिकाले एति, लेख्यकलेखलेखन-परवशत्वात् । श्वश्रूस्नुषे अतिनिर्विण्णे अतिजागरणात् । वध्वा श्वश्रूरुक्ता—"मातर् ! पुत्रं तथा बोधय । यथा निशि सकाले एति ।" मात्रा उक्तः सः—"वत्स ! निशि शिघ्रमेहि । यः कालज्ञः स सर्वज्ञः ।" सिद्धः प्राह—"मातर् ! येन स्वामिनाऽहं सर्वस्वदानेन जीवितव्यदानेन च समुद्धृतस्तदादेशं कथं न कुर्वे ।" तौष्णीक्येन स्थिता माता । अन्यदाऽऽलोचितं श्वश्रूस्नुषाभ्याम्—"अस्य चिरादागतस्य निशि द्वारं नोद्-घाटयिष्यावः ।" द्वितीयरात्रावतिचिराद् द्वारमागतः स कटकं खटखटापयति । ते तु न ब्रूतः । तेन क्रुद्धेन गदितम्—"किमिति द्वारं नोद्घाटयेथे ? ।" ताभ्यां मन्त्रितपूर्विणीभ्यामुक्तम्—"यत्रेदानीं द्वाराणि उद्घाटितानि भवन्ति, तत्र व्रज ।" तच्छ्रुत्वा क्रुद्धश्चतुष्पथं गतः । तत्रोद्घाटे हट्टे उपविष्टान् सूरिमन्त्र-

For Private And Personal

स्मरणपरान् श्रीहरिभद्रान्दृष्टवान् । सान्द्रचन्द्रिके नभसि देशना । बोधः । व्रतं जगृहे । सर्वविद्यता । दिव्यं कवित्वम् । हंसपरमहंसवद् विशेषतर्कान् जिघृक्षुर्बौद्धान्तिकं जिगमिषुर्गुरूमवादीत्—" प्रेषयत बौद्धपार्श्वे।" गुरुभिर्गदितम्—" तत्र मागाः । मनःपरावर्त्तो भावी । " स ऊचे—" युगान्तेऽपि नैवं स्यात् । " पुनर्गुरवः प्रोचुः—" तत्र गतः परावर्त्त्यसे चेत् तदा अस्मद्दत्तं वेषमत्रागत्यास्मभ्यं दद्दीथाः । " ऊरीचक्रे सः । गतस्तत्र पठितुं लग्नः । सुघटितैस्तत्कुतर्कैः परावर्त्तितं मनः । तद्दीक्षां ललौ । वेषं दातुमुपश्रीहरिभद्रं ययौ । तैरप्या-गच्छन्नावर्जितः वादं कुर्वन्वादेन जितः । बौद्धाचार्यस्य बौद्धवेषं दातुं गतः । तेनापि बोधितः । पुनरा-गत उपश्रीहरीभद्रं श्वेताम्बरवेषं दातुम् । पुनर्वादेन जितः । एवं वेषद्वयप्रदानेन एहि रे ! याहिराः २१ कृताः । द्वाविंशवेलायां गुरुभिश्चिन्तितम्—" माऽस्य वराकस्य आयुःक्षयेण मिथ्यादृष्टित्वे मृतस्य दीर्घभव-भ्रमणं भूत् । " पुराऽपि २१ वारान् वादे जितोऽसौ । अधुना वादेनालम् । ललितविस्तराख्या चैत्यवन्दनावृत्तिः सतर्का कृता । तदागमे पुस्तिकां पादपीठे मुक्त्वा गुरवो बहिरगुः । तत्पुस्तिकापरामर्शाद्बोधः समजनि । ततस्तुष्टो निश्चलमनाः प्राह—

नमोऽस्तु हरिभद्राय तस्मै प्रवरसूरये । मदर्थं निर्मिता येन वृत्तिर्ललितविस्तरा ॥१॥

ततो मिथ्यात्वनिर्विण्णेन सिद्धर्षिणा १६ सहस्रा उपमितभवप्रपञ्चा कथाऽरचि श्रीमाले सिद्धिमण्डपे ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सा च सरस्वत्या साध्व्याऽशोधि। समये श्रीहरिभद्रसूरयोऽपि सोऽपि अनशनेन सुरलोकमवापन् ॥

॥ इति श्रीहरिभद्रसूरिप्रबन्धः ॥

(९)

॥ अथ श्रीबप्पभट्टसूरिप्रबन्धः–

गुर्ज्जरदेशे पाटलापुरनगरे जितशत्रू राजा राज्यं करोति स्म। तत्र श्रीसिद्धसेननामा सूरीश्वरोऽस्ति स्म। स मोढेरपुरे महास्थाने श्रीमहावीरनमस्करणाय गतः। श्रीमहावीरं नत्वा तीर्थोपवासं कृत्वा रात्रावात्मारामरत्तो योगनिद्रया स्थितः सन्स्वप्नं ददर्श। यथा–"केसरिकिशोरको देवगृहे परिक्रीडति।" स्वप्नं लब्ध्वाऽजागरीत्। माङ्गल्यस्तवनान्यपाठीत्। प्रातश्चैत्यं गतः। तत्र षड्वार्षिको बाल एको बालांशुमालिसमद्युतिराजगाम। सूरिणा पृष्टः–"भो! अर्भक! कस्त्वम्? कुत आगतः?" तेनोक्तम्–पञ्चालदेशे डुंबाउधीग्रामे बप्पाख्यः क्षत्रियः। तस्य भट्टिर्नाम सधर्मचारिणी। तयोः सुरपालनामपुत्रोऽहम्। मत्तातस्य बहवो भुजबलगर्विताः प्रचुरपरिच्छदाः शत्रवः सन्ति। तान्सर्वान्हन्तुमहं सन्नह्य चलन्नासम्। पित्रा निषिद्धः–"वत्स! बालस्त्वम्, नास्मै कर्मणे प्रगल्भसे। अलमुद्योगेन।" ततोऽहं क्रुद्धः। किमनेन निरभिमानेन पित्रापि? यः

For Private And Personal

स्वयमरीन्न हन्ति मामपि घ्नन्तं निवारयति। अपमानेन मातापितरावनापृच्छ्यात्र समागतः। सूरिणा चिन्तितम्–" अहो! दिव्यं रत्नम्। न मानवमात्रोऽयम्। तेजसां हि न वयः समीक्ष्यते।" इति विमृश्य बाल आलेपे–"वत्सक! अस्माकं पार्श्वे तिष्ठ निजगृहाधिकसुखेन।" बालेनोक्तम्–"महान्प्रसादः।" स्वस्थानमानीतः। सङ्घो हृष्टस्तद्रूपविलोकनेन। दृष्टयस्तृप्तिं न तन्वते। पाठयित्वा विलोकितः। एकाह्नेन श्लोकसहस्रमध्यगीष्ट। गुरवस्तुष्टुवुः। रत्नानि पुण्यप्रचयप्राप्यानि। धन्या वयम्। तेन बालेनाप्यल्पदिनैर्लक्षणतर्कसाहित्यादीनि भूयांसि शास्त्राणि पर्यशीलिषत। ततो गुरवो डुंबाउधीग्रामं जग्मुः। बालस्य पितरौ वन्दितुमागतौ। गुरुभिरालापितौ–" पुत्रा भवन्ति भूयांसोऽपि। किं तैः संसारावकरकृमिभिः ?। अयं तु युवयोः पुत्रो व्रतमीहते। दीयतां नः। गृह्यतां धर्मः। नष्टं मृतं सहन्ते हि पितरो निजतनयम्। श्लाघ्योऽयं भवं निस्तितीर्षुः।" पितृभ्यामुक्तम्–"भगवन्। अयमेक एव नः कुलतन्तुः। कथं दातुं शक्यते।" तावता सविधस्थेन सुरपालेन गदितम्–"चारित्रं गृहणाम्येव।"

यतः–सा बुद्धिर्विलयं प्रयातु कुलिशं तत्र श्रुते पात्यताम्

बल्गन्तः प्रविशन्तु ते हुतभुजि ज्वालाकराले गुणाः।

यैः सर्वैः शारदेन्दुकुन्दविशदैः प्राप्तैरपि प्राप्यते
भूयोऽप्यत्र पुरन्ध्रिरन्ध्रनरकक्रोडाधिवासव्यथा ॥१॥

ततो ज्ञाततन्निश्चयाभ्यां तन्मातरापितृभ्यां जल्पितम्–"भगवन्! गृहाण पात्रमेतत्। परं 'बप्पभट्टिः' इति नामास्य कर्त्तव्यम्।" गुरुभिर्भणितम्–"एवमस्तु। कोऽत्र दोषः। पुण्यवन्तौ युवाम्। ययोरयं लाभः सम्पन्नः।" बप्पभट्टी आपृच्छ्य सूरपालं गृहीत्वा सिद्धसेनाचार्या मोढेरकं गताः।

शताष्टके वत्सराणां गते विक्रमकालतः। सप्ताधिके राधशुक्लतृतीयादिवसे गुरौ ॥१॥

दीक्षा दत्ता। 'बप्पभट्टिः' इति नाम विश्ववल्लभं जुघुषे। सङ्घप्रार्थनया तत्र चतुर्मासकं कृतम्। अन्यदा बहिर्भूमिं गतस्य बप्पभट्टेर्महतीं वृष्टिमतनिष्ट घनः। क्वापि देवकुले स्थितः सः। तत्र देवकुले महाबुद्धः कोऽपि पुमान् समागतः। तत्र देवकुले प्रशस्तिकाव्यानि रसाढ्यानि गम्भिरार्थानि तेन बप्पभट्टिपार्श्वाद्व्या-ख्यापितानि। ततः स बप्पभट्टिना समं वसतिमायातः। गुरुभिराशिर्भिरभिनन्दितः। आम्नायं स पृष्टः। ततोऽसौ जगाद–"भगवन्! कन्यकुब्जदेशे गोपालगिरिदुर्गनगरे यशोवर्मनृपतेः! सुयशोदेवीजन्मा नन्दनोऽहं यौवनेन निरर्गलं धनं लीलया व्ययन् पित्रा कुपितेन शिक्षितः–'वत्स! धनार्जकस्य कृच्छ्रमस्थानव्ययी पुत्रो न वेत्ति तातस्य। मितव्ययो भव। ततोऽहं कोपादिहागमम्।" गुरुवोऽप्यूचुः–किं ते नाम?। तेनापि

For Private And Personal

खटिकया भुवि लिखित्वा दर्शितम्। 'आम:' इति। महाजनाचारपरं परेदृशी स्वनाम नामाददते न साधवः। तस्यौन्नत्येन गुरवो हृष्टाः। चिन्तितं च तैः–"पूर्वं श्रीरामसैन्ये ग्रामे दृष्टोऽसौ षाण्मासिकः शिशुः।

पीलुवृक्षमहाडाल्यां वस्त्रदोलकमास्थितः। अचलच्छायया च पुण्यपुरुषो निर्णितः॥

ततस्तज्जननी वन्यफलानि विचिन्वानाऽस्माभिर्भणिता—'वत्से! का त्वम्?। किं च ते कुलम्?।' साऽवादीत् निजं कुलम्—'अहं राजपुत्री कन्यकुब्जेशयशोवर्मपत्नी सुयशा नाम। अहमस्मिन्सुते गर्भस्थे सति दृढकार्मणवशीकृतधवया यत्कृतप्रमाणयाऽकृत्यये च क्रूरया सपत्न्या मिथ्या परपुरुषदोषमारोप्य गृहान्निष्कासिता। अभिमानेन श्वशुरकुलापितृकुले हित्वा भ्रमन्तीह समागता वन्यवृत्त्या जीवामि। बालं च पालयामि।" इदं श्रुत्वाऽस्माभिर्सा उक्ता–"वत्से! अस्मच्चैत्यं समागच्छ स्वं वत्सं वर्द्धय। तया तथा कृतम्। सपत्न्यपि बहुसपत्नीकृतमारणप्रयोगेण ममार। ततो विशिष्टपुरुषैः कन्यकुब्जेशो यशोवर्मा विज्ञप्तः–"देव! सुयशा राज्ञी निर्दोषाऽपि तदा देवेन सपत्नीवचसा निष्कासिता सा प्रत्यानीयते"। राज्ञा सा स्वसौधमानायिता सपुत्रा गौरविता च।

अन्यदा विहरन्तो वयं तस्या देशं गताः। तया पूर्वप्रतिपन्नं स्मरन्त्या वयं वन्दिताः पूजिताः।

अनेन आमनाम्ना तत्सुतेन भाव्यम्। एवं चिरं विभाव्य सूरयस्तमूचुः–“वत्स! वस निश्चिन्तो निजेन सुहृदा बप्पभट्टिनाम्ना सममस्मत्सन्निधौ। त्वं गृहाण कलाः। कास्ताः?—लिखितम् १ गणितम् २ गीतम् ३ नृत्यम् ४ पठितम् ५ वाद्यम् ६ व्याकरणम् ७ छन्दो ८ ज्योतिषम् ९ शिक्षा १० निरुक्तम् ११ कात्यायनम् १२ निघण्टु १३ पत्रच्छेद्यम् १४ नखच्छेद्यम् १५ रत्नपरीक्षा १६ आयुधाभ्यासम् १७ गजारोहणम् १८ तुरगारोहणम् १९ तयोःशिक्षा २० मन्त्रवादः २१ यन्त्रवादः २२ रसवादः २३ खन्यवादः २४ रसायणम् २५ विज्ञानम् २६ तर्कवादः २७ सिद्धान्तः २८ विषवादः २९ गारुडम् ३० शाकुनम् ३१ वैद्यकम् ३२ आचार्यविद्या ३३ आगमः ३४ प्रासादलक्षणम् ३५ सामुद्रिकम् ३६ स्मृतिः ३७ पुराणम् ३८ इतिहासः ३९ वेदः ४० विधिः ४१ विद्यानुवादः ४२ दर्शनसंस्कारः ४३ खेचरीकला ४४ अमरीकला ४५ इन्द्रजालम् ४६ पातालसिद्धिः ४७ धूर्त्तशम्बलम् ४८ गन्धवादः ४९ वृक्षचिकित्सा ५० कृत्रिममणिकर्म ५१ सर्वकरणी ५२ वश्यकर्म ५३ पणकर्म ५४ चित्रकर्म ५५ काष्ठघटनम् ५६ पाषाणकर्म ५७ लेपकर्म ५८ चर्मकर्म ५९ यन्त्रकरसवती ६० काव्यम् ६१ अलङ्कारम् ६२ हसितम् ६३ संस्कृतम् ६४ प्राकृतम् ६५ पैशाचिकम् ६६ अपभ्रशम् ६७ कपटम् ६८ देशभाषा ६९ धातुकर्म ७० प्रयोगोपायम् ७१ केवलीविधिः ७२ एताः सकलाः कलाः शिक्षितवान्। लक्षणतर्कादिग्रन्थान् परिचितवान्। बप्पभट्टिना साकमास्थिमज्जन्यायेन प्रीतिं बद्धवान्।

For Private And Personal

यतः—आरंभगुर्वी क्षयिणी क्रमेण ह्रस्वा पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धभिन्ना च्छायैव मैत्री खलसज्जनानाम् ॥१॥

कियत्यपि काले यशोवर्मनृपेणासाध्यव्याधितेन पट्टाभिषेकार्थमामकुमाराकारणाय प्रधानपुरुषाः प्रेषिताः। अनिच्छन्नपि तैस्तत्र नीतः । पितुर्मेलितः । पित्राऽऽलिङ्गितः सबाष्पगद्‌गदमुपालब्धश्च—

धिग्‌वृत्तनृत्तमुचितां शुचितां धिगेतां धिक् कुन्दसुन्दरगुणग्रहणाग्रहित्वम् ।
चक्रेऽङ्कसीम्नि तव मौक्तिक येन वृद्धिर्वार्द्धन तस्य कथमप्युपयुज्यसे यत् ॥ २ ॥ (?)

अभिषिक्तः स्वराज्ये । शिक्षितश्च प्रजापालनादौ । एतत्कृत्वा यशोधर्मा अर्हन्तं त्रिधा शुद्ध्या शरणं श्रयन् द्यां गतः । आमराजा पितुरौर्द्धदेहिकं कृतवान् । द्विजादिदीनलोकाय वित्तं दत्तवान् । लक्षद्वितयमश्वानां हस्तिनां रथानां च । प्रत्येकं चतुर्दशशती एका कोटी पदातीनाम् । एवं राज्यश्रीः श्रीआमस्य न्यायरामस्य । तथापि बप्पभट्टिमित्रं विना पलालपूलप्रायं मन्यते स्म । ततो मित्रानयनाय प्रधानपुरुषान् प्रैषीत् । तैस्तत्र गत्वा विज्ञप्तम्–"हे ! श्रीबप्पभट्टे ! आमराजः समुत्कण्ठयाऽऽह्वयति । आगम्यताम् ।" बप्पभट्टिना गुरूणां वदनकमलमवलोकितम् । तैः स[illegible]मत्या गीतार्थयतिभिः समं ब[illegible]भट्टिमुनिः प्रहितः । आमस्य पुरं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गोपालगिरिं प्राप। राजा सबलवाहनः संमुखमगात्। प्रवेशमहमकार्षीत्। सौधमानैषीत्। अवोचत च– "भगवन्! अर्द्धराज्यं गृहाण।" तेनोक्तम्–अस्माकं निर्ग्रन्थानां सावद्येन राज्येन किं कार्यम्? यतः–

अनेकयोनिसम्पाताऽनन्तबाधा विधायिनी। अभिमानफलैवेयं राज्यश्रीः सापि नश्वरी ॥ १ ॥

ततो राज्ञाऽसौ तुङ्गधवलगृहे स्थापितः। प्रातः सभामागताय बप्पभट्टये नृपेण सिंहासनं मण्डापितम्। तेन गदितम्–"ऊर्वीपते! आचार्यपदं विना सिंहासनं न युक्तम्। गुर्वाशातना भवेत्। ततो राज्ञा बप्पभट्टिः प्रधानसचिवैः सह गुर्वन्तिके प्रहितः। विज्ञप्तिका दत्ता–"यदि मम प्राणैः कार्यं तदा प्रसद्य सद्योऽयं महर्षिः सूरिपदे स्थाप्यः। 'योग्यं सुतं च शिष्यं च नयन्ति गुरवः श्रियम्।' स्थापितमात्रश्चात्र शिघ्रं प्रेषणीयः। अन्यथाऽहं न भवामि। मा विलम्ब्यतामिति।" अखण्डप्रयाणकैर्मोढेरकं प्राप्तो बप्पभट्टिः। सचिवैः सूरयो विज्ञप्ताः–" प्रभो! राजविज्ञप्त्यर्थोऽनुसार्यः। उचितज्ञा हि भवादृशाः।"

अथ श्रीसिद्धसेनाचार्यैर्बप्पभट्टिः सूरिपदे स्थापितः। तदङ्गे श्रीः साक्षादिव संक्रामन्ती दृष्टा। रहश्च शिक्षा दत्ता–" वत्स! तव राजसत्कारो भृशं भावी। ततश्च लक्ष्मीः प्रवर्त्स्यति। तत इन्द्रियजयो दुष्करः। त्वं महाब्रह्मचारी भवेः।

For Private And Personal

विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव वीराः ।

अनेन महाव्रतेन महत्तरः स्फुरिष्यसि ।

एकादशाधिके तत्र जाते वर्षशताष्टके । विक्रमात्सोऽभवत्सूरिः कृष्णचैत्राष्टमीदिने ॥ १ ॥

गुरुणा आमराजसमीपे प्रेषितः । तत्र प्राप्तः । गोपगिरेः प्राशुकवनोद्देशे स्थितः । राजा अभ्यागत्य महामहेन तं पुरीं प्रावीविशत् । श्रीबप्पभट्टसूरिणा तत्र देशना क्लेशनाशिनी दत्ता—

श्रीरियं प्रायशः पुंसामुपस्कारैककारणम् । तामुपस्कुर्वते ये तु रत्नसूस्तैरसौ रसा ॥ १ ॥

आमेन गुरूपदेशादेकोत्तरहस्तशतप्रमाणः प्रासादः कारयामास गोपगिरौ । अष्टादशभारप्रमाणं श्री वर्द्धमानबिम्बं तत्र निवेशयांबभूवे । प्रतिष्ठां विधापयांचक्रे । तत्र चैत्ये मूलमण्डपः सपादलक्षेण सौवर्णटङ्कैर्निष्पन्न इति बुधाः प्राहुः । आमः कुञ्जरारूढः सर्वर्द्ध्या चैत्यवन्दनाय याति । मिथ्यादृशां दृशौ सैन्धवेन पूर्यंते सम्यग्दृशां त्वमृतेनेव। एवं प्रभावनाः। प्रातर्नृपो मौलमनर्घ्यं स्वं सिंहासनं सूरये निवेशापयति। तद्-दृष्ट्वा विप्रैः क्रुधा ज्वलितैर्भूपो विज्ञप्तः—“देव! श्वेताम्बरा अमी शूद्राः। एभ्यः सिंहासनं किम्। अथास्तां तत् । परं न्हस्वीयो भवतु न महत् । मुहुर्मुहुस्तैरित्थं विज्ञप्त्या कदर्थ्यमानः पार्थिवो मौलसिंहासनं कोशगं कारयित्वाऽन्यल्लघ्वारूरुपत् । प्रत्यूषे सूरीन्द्रेण तद् दृष्ट्वा रुष्टेनेव राज्ञोऽग्रे पठितम्—

मर्द्यमानमतङ्गजदर्पं विनयशरीरविनाशनसर्पम् । क्षीणो दर्पाद्दशवदनोऽपि यस्य न तुल्यो भुवने कोऽपि ॥१॥

इदं श्रुत्वा राज्ञा ह्रीणेन सदा भूयो मूलसिंहासनमनुज्ञातम् । अपराधः क्षमितः । एकदा सपादकोटी हेम्नां दत्ता गुरुभ्यः । तैर्निरीहैः सा जीर्णोद्धारे ऋद्धियुक्तश्रावकपार्श्वाद् व्ययिता । अन्यदा शुद्धान्ते प्रम्लानवदनां वल्लभां दृष्ट्वा प्रभोः पुरो गाथार्द्धं राजाऽऽह—

अज्जवि सा परितप्पइ कमलमुही अत्तणो पमाएण ।

समस्येयम् ।

प्रभुः स्माह—

पढम विबुद्धेण तए जीसे पच्छाइयं अंगम् ॥ १ ॥

राजा आत्मसंवादाच्चमत्कृतः । अन्यदा प्रियां पदे पदे मन्दं मन्दं सञ्चरन्तीं दृष्ट्वा गाथार्द्धं राजा जगाद—

बाला चंकम्मंती पए पए कीस कुणइ मुहभंगम् ।

सूरिराह—

नूणं रमणपएसे मेहलया छिवइ नहपंतिं ॥ १ ॥

इदं श्रुत्वा राजा मुखं निश्वासहतदर्पणसमं दध्रे। अमी मदन्तःपुरे कृतविप्लवा इति धिया। तथाचार्यैः क्षणार्द्धेनावगतम्। चिन्तितं च–अहो विद्यागुणोऽपि दोषतां गतः।

जलधेरपि कल्लोलाश्चापलानि कपेरपि। शक्यन्ते यत्नतो रोद्धुं न पुनः प्रभुचेतसः॥ १॥

रात्रौ सूरिः संघमनापृच्छ्य राजद्वारकपाटसम्पुटतटे काव्यमेकं लिखित्वा पुराद्बहिर्ययौ। तद्यथा—

यामः स्वस्ति तवास्तु रोहणगिरे! मत्तः स्थितिप्रच्युता वर्तिष्यन्त इमे कथं कथमिति स्वप्नेऽपि मैवं कृथाः।
श्रीमंस्ते मणयो वयं यदि भवल्लब्धप्रतिष्ठास्तदा ते शृङ्गारपरायणा क्षितिभुजो मौलौ करिष्यन्ति नः॥१॥

अस्मान् विचित्रवपुषाश्चिरपृष्ठलग्नान् किंवा विमुञ्चसि विभो! यदि वा विमुञ्च।
हा हन्त! केकिवर! हानिरियं तवैव भूपालमूर्द्धनि पुनर्भविता स्थितिर्नः॥ २॥

हस जिहिं गय तिहिं गया महि मण्डणा हवंति। छेहुतांह सरोवरह जं हंसे मुचंति॥ ३॥

दिनैः कतिपयैर्गौडदेशान्तर्विहरन् लक्षणावतीनगर्याः पुरो बहिरारामे समवासार्षीत्।

तत्र पुरे धर्मो नाम राजा। स च गुणज्ञः। तस्य सभायां वाक्पति नामा कविराजोऽस्ति। तेन सूरीणामागमनं लोकादवगतम्। ज्ञापितश्च राजा। राज्ञा प्रवेशमहः कारितः। पूर्मध्ये सौधोपान्ते गुरुस्तुङ्गगृहे स्थापितः। राजा नित्यं वन्दते। कवयो जिता रञ्जिताश्च। प्रभावना प्रैधते स्म। यशश्च कुन्दशुभ्रम्। राजा प्रोचे—

अदृष्टे दर्शनोत्कण्ठा दृष्टे विरहभिरुता । दृष्टेनाप्यदृष्टेन भवता नाप्यते सुखम् ॥ १ ॥

निर्बन्धे सूरिराह–आमश्चेत्स्वयमायास्यति तदा वयं यास्यामो नान्यथा इति प्रतिज्ञाय स्थापिताः पुण्यलाभं कुर्वन्ति ।

इतश्च यदा बप्पभट्टिः कृतविहारः प्रातः श्रीआमपार्श्वं नायातस्तदा तेन सर्वत्रावलोकितो न लब्धः । जातो विलक्षः । ' यामः स्वस्ति तवास्तु ' इत्यादि काव्यानि दृष्टानि । अक्षराण्युपलक्षितानि । ध्रुवं स मां मुक्त्वा क्वापि गत एवेति निर्णितम् । अन्यदा बहिर्गतेन राज्ञा भुजङ्गमो दृष्टः । तं मुखे धृत्वा वाससाऽऽच्छाद्य सौधं गतः । कविवृन्दाय समस्यामर्पितवान्—

शस्त्रं शास्त्रं कृषिर्विद्या अन्यो यो येन जीवति ।

इति । पूरिता सर्वैरपि । न तु नृपश्चमच्चकार हृदयाभिप्रायाकथनात् । तदा बप्पभट्टिं बाढं स्मृतवान् । "सा हृदयसंवादिनी गीस्तत्रैव" अथ पटहमवीवदत् । तत्रेदमजूघुषत्—" यो मम हृद्गतां समस्यां पूरयति तस्मै हेमटंककलक्षं ददामि । " तदा गोपागिरीयो द्यूतकारः कश्चिद् गौडदेशं गतः । स बप्पभट्टिसूरीणामग्रे तत्समस्यापदद्वयं कथितवान् । सूरिणा पश्चार्द्धं पेठे—

सुगृहीतं च कर्तव्यं कृष्णसर्पमुखं यथा ॥ १ ॥

इति। स हि भगवान् षड्विकृतित्यागी सिद्धसारस्वतो गगनगमनशक्त्या विविधतीर्थवन्दनशक्तियुक्तस्तस्य कियदेतत्। स द्यूतकारस्तत्पादद्वयं गोपगिरौ श्री आमाग्रे निवेदितवान्। राजा दध्वान–"अहो! सुघटितत्वमर्थस्य।" तं पप्रच्छ–"केन क्वेयं पूरिता समस्या।" द्यूतकृदाह–"लक्षणावल्यां बप्पभट्टिसूरिणा, इति।" तस्योचितं दानं चक्रे। अन्यदा राजा नगर्या बहिर्ययौ। न्यग्रोधद्रुमाधः पान्थं मृतं ददर्श। शाखायां लम्बमानं करपत्रकमेकं विप्रुषां व्यूहं स्रवन्तं गाथार्द्धं च विशिष्टग्राविणि लिखितं कठिन्याऽपश्यत्।

तइया मह निग्गमणे पियाइ घोरं सुएहिं जं रुण्णं।

तदपि समस्यापादद्वयं राज्ञा कविभ्यः कथितम्। न केनापि सुष्ठु पूरितम्। राजा चिन्तयति स्म—

वेश्यानामिव विद्यानां मुखं कैः कैर्न चुम्बितम्। हृदयग्राहिणस्तेषां द्वित्रा सन्ति न सन्ति वा ॥१॥

हृदयग्राही स एव मम मित्रं सूरिवरः। स एव दौरोदरिको नृपेणोपसूरि प्रैषि। सूरिणाऽक्षिनिमेषमात्रेण पूरिता समस्या—

करवत्तयबिंदुअनिवडणेण तं मज्झ संभरिय ॥ १ ॥

तत्पुनर्धूतकाराच्छ्रुत्वा राज्ञा हृष्टेनोत्कण्ठितेन सूरेराह्वानाय वाग्मिनः सचिवाः प्रस्थापिताः। उपालम्भसहिता विज्ञप्तिश्च दत्ते। प्राप्तास्ते तत्र। दृष्टास्तैस्तत्र सूरयः। उपलक्ष्य वन्दिताः। राजविज्ञप्तिर्दत्ता। तत्र लिखितं वाचितं गुरुभिः।

न गङ्गां गाङ्गेयं सुयुवतिकपोलस्थलगतं न वा शुक्तिं मुक्तामणिरुरसिजस्पर्शरसिकः।
न कोटीरारूढः स्मरति च सवित्रीं मणिचयस्ततो मन्ये विश्वं स्वसुखनिरतं स्नेहविरतम् ॥ १ ॥
छायाकारणिसिरधरिय पववि भूमि पडंति। पत्तहं पउपत्तत्तणउं तरुअर काइं करांति ॥ २ ॥

सचिवा अप्यूचुः—" स्वामिन्! आमराजो निर्व्याजप्रीतिर्विज्ञपयते—शीघ्रमागम्याऽयं देशो वसन्तावतंसितोद्यानलीलां लम्भनीयः। भवद्वाग्रसलुब्धानामस्माकमितरकाविवाग् न रोचते।

कथासु ये लब्धरसाः कवीनां ते नानुरज्यन्ति कथान्तरेषु।
न गन्धिपर्णप्रणयाश्चरन्ति कस्तूरिकागन्धमृगास्तृणेषु ॥ १ ॥"

तदाकर्ण्य लेखं दत्त्वा सूरिभिः सचिवाः प्रोचिरे—" श्रीआमो गीष्पतिसमप्रज्ञ एवं भाषणीयः—
अस्माभिर्यदि वः कार्यं तदा धर्मस्य भूपतेः। सभायां छन्नमागम्य स्वयमापृच्छ्यतां द्रुतम् ॥ १ ॥

अस्माकमिति प्रतिज्ञाऽऽस्ते धर्मेण राज्ञा सह–" स्वयमामः समेत्य त्वत्समक्षं यदाऽस्मानाकारयते किल तदा तत्र यामो नान्यथा इति ।" प्रतिज्ञालोपश्च नोचितः सत्यवादिनां प्रतिष्ठावताम् । ततो मन्त्रिण उपकन्यकुब्जेशमाजग्मुः । सूरीणामुक्तमुक्तं लेखश्चादर्शि । तत्र लिखितं यथा—

विंझेण विणावि गया नरिंदभवणेसु हुंति गारविया । विंझो न होइ वंझो गएहिं बहुएहिं विगएहिं ॥१॥
माणसरहिएहिं सुहाइं जह न लब्भंति रायहंसेहिं । तह तस्स वि तेहिं विणा तीरुच्छंगा न सोहंति ॥२॥
परिसेसियहंसउलंपि माणसं माणसं न संदेहो । अन्नत्थ वि जत्थ गया हंसा वि बया न भन्नंति ॥३॥
हंसा जहिं गय तहिं जिगय महिमंडणा हवंति । छेहउ ताहं महासरहं जं हंसिहिं मुचंति ॥ ४ ॥
मलओ स चंदणुच्चिय नइमुहहीरंतचंदणदुमोहो । पब्भट्ठंपि हु मलया उ चंदणं जायइ महग्घं ॥ ५ ॥
अग्घायंति महुयरा विमुक्ककमलायराविं मयरंदं । कमलायरो वि दिट्ठो सुओ वि किं महुयरविहुणो ॥६॥
इक्केण कुत्थुहेणं विणावि रयणायरु च्चिय समुद्दो । कुत्थुरयणं पि उरे जस्स ठियं सोवि हु महग्घो ॥७॥
पइं मुक्काणवि तरुवर फिट्टइ पत्तत्तणं न पत्ताणं । तुह पणच्छाया जइ होइ कहवि ता तेहिं पत्तेहिं ॥ ८ ॥
जे केवि पहू महिमंडलंमि ते उच्छुदंडसारिच्छा । सरसा जडाण मज्झे विरसा पत्तेसु दीसंति ॥ ९ ॥
संपइ पहुणो पहुणो पहुतणं किं चिरंतण पहूणं । दोसगुणा गुणदोसा एहिं कया नहु कया तेहिं ॥ १० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एतद्वाचयित्वा सोत्कण्ठं नृपः सारकतिपयपुरुषवृत्तोऽचालीत्। गोदावरीतीरग्राममेकमगमत्। तत्र खण्डदेवकुले वासमकार्षीत्। देवकुलाधिष्ठात्री व्यन्तरी सौभाग्यमोहिता गङ्गेव भरतं तं भेजे। प्रभाते करभमारुह्य तां देवीमापृच्छ्य प्रभुपादान्तं प्राप। गाथार्द्धं पपाठ—

अज्जवि सा सुमरिज्जइ को नेहो एगराईए।

सूरीन्द्रः प्राह—

गोलानईयतीरे सुन्नउले जंसि वीसमिओ ॥ १ ॥

इति। अन्योऽन्यं गाढमालिलिङ्गतुरुभौ। तत आम आह स्म—

अद्य मे सफला प्रीतिरद्य मे सफला रतिः। अद्य मे सफलं जन्म अद्य मे सफलं कुलम् ॥ १ ॥

रात्रौ इष्टगोष्ठी ववृते मधुमधुरा। ततः प्रभाते सूरिर्धर्मनृपास्थानमगमत्। आमनृपोऽपि प्रधानैः स्वैः पुरुषैः सह स्थगीधरो भूत्वाऽऽगच्छत्। 'आम आवउ' इति ब्रुवाणैः सूरिभिर्धर्माय आमस्य विशिष्टपुरुषा दर्शिताः। "एते आमनृपनराः किलास्मानाह्वातुमायाताः" इति। धर्मेण राज्ञा पृष्टं विशिष्टजनपार्श्वे—"भोः! आमप्रधाननराः! स भवतां स्वामी कीदृशरूपः।" तैर्निगदितम्—"यादृगयं स्थगीधरस्तादृगस्ति।" प्रथमं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मातुलिङ्गं करे धारयित्वा आम आनीतोऽस्ति। सूरिभिः पृष्टम्-" भोः! स्थगीधर! तवकरे किमेतत्?।" स्थगीधरीभूतेन श्रीआमेनोक्तम्-" बीजउरा" इति। क्षणार्द्धेन वार्त्तामध्ये सूरिभिः सूक्तमवतारितम्—

तत्तीसीयलीमेलावाकेहा धणिउतावली पिउमंदसणेहा।
विरहि जो मणु सुमरइ तसु कवणनिहोरा कन्निपवित्तडी जणु जाणइ दोरा॥ १॥

इति। गुरुणा कथितम्-" आम आवउ आम आवउ" धर्मेण राज्ञा तुअरिछोडं दृष्ट्वा पृष्टम्-" अहो! स्थगीधर! किमिदम्?।" तेनोक्तम्-" तू अरि" तवारीत्यर्थः। इत्यादि गोष्ठ्यां वर्तमानायां शनैः शनैः श्रीआमराजश्छिद्रुपमेलापकान्निसृत्य पुराद्बहिः स्थाने स्थाने स्थापितैर्वाहनैः कियतीमपि भूमिमत्यक्रामत्। तावता सुरीश्वरो विलम्बाय प्रहरद्वयं कामपि कथामाचिकथत्। रसावतारः स कोऽपि जातो यो रम्भातिलोत्तमाप्रेक्षणीयकेऽपि दुर्लभः। आमो राजाऽमूल्यं कङ्कणं ग्रहणके मुक्त्वा वेश्यागृहे उषित आसीत्। सा तु लक्षणावतीपतेर्वारस्त्रीः। एकं कङ्कणमामोराजद्वारे मुञ्चन्नगात्। अपराह्णे राज्ञः पार्श्वाद् बप्पभट्टिसूरिभिर्मुत्कलापितम्-" देव! गोपगिरावामपार्श्वं यामोऽनुज्ञां दीयताम्।" धर्मेण भणितम्-" भवतामपि वाणी विघटते? भवद्भिर्भणितमभूत्? यदा तव दृष्टौ आमः समेत्यास्मानाह्वयति तदा यामो नार्वाक्। तत्किं विस्मृतम्?। जिह्वे किं वो द्वे स्तः?।" आचार्या जगदुः-" श्रीधर्मदेव! मम प्रतिज्ञा पूर्णा।" राजाऽऽह-"कथम्?" सूरि-

For Private And Personal

वदति–"आमो राजाऽत्र स्वयमागतस्तव दृष्टौ।" राजाऽऽह–"कथं ज्ञायते?।" सूरिः–"यदा भवद्भिः पृष्टं भवतां स्वामी कीदृशः? विशिष्टैस्तदा भणितम्—स्थगिकाधररूपः, तथा बीजउरा शब्दोऽपि विमृश्यताम्। दोरा-शब्दोऽपि यो मयोक्तोऽभूत्। तस्मात्प्रतिज्ञा पूर्णा मे।" अत्रान्तरे केनापि राजद्वाराद् आमकङ्कणं नृपधर्महस्ते दत्तं आमनामाङ्कितम्। द्वितीयं वेश्यया दत्तम्। तद् दृष्ट्वा नष्टसर्वस्वस्तद्धन इव शुशोच। "धिग्माम्। यन्मया शत्रुः स्वगृहमायातो नार्चितः न च साधितः।" धर्मेण मुत्कलिताः सूरयः पुरः क्वापि स्थितेनामेन सह जग्मुः। मार्गे गच्छता आमेन पुलीन्द्र एको जलाशयमध्ये जलं छगलवन्मुखेन पिबन्दृष्टः। आमराजेन सूरिणामग्रे एत्योक्तम्—

पसु जेम पुलिंद उ पउ पियइ पंथिउ कवणिण कारणिण।

सूरिभिरभाणि—

करबे विकरंबिय कउझलिण मुद्धह अंसु निवारणिण ॥ १ ॥

राज्ञा प्रत्ययार्थं स समाकार्य पृष्टः। तेनोक्तम्, सत्यं सूरिवचः। हस्तौ दर्शितौ। राजा तेन वाक्संवादेन प्रीतः। 'अज्जवि सा परितप्पइ' इत्यादि तदुक्तं सर्वं सारस्वतविलसितमिति निरचैषीत्। शिघ्रशिघ्रं गोपालगिरिं गतः। पताकातोरणमञ्चप्रतिमञ्चादिमहास्तत्रासुः। दिवसाः कत्यप्यतिक्रान्ताः। ततः श्रीसिद्ध-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सेनसूरयो वार्द्धकेन पीडिता अनशनं गृहीतुकामाः श्रीबप्पभट्टिसूरीणामाकारणाय गीतार्थमुनियुगलं प्रैषिषुः। ते तदू गुरोर्लेखमदीदृशन्। तत्र लिखितं यथा—

अध्यापितोऽसि पदवीमधिरोपितोऽसि तत्किंच नापि कुरु वत्सक ! बप्पभट्टे !।
प्रायोपवेशनरथे विनिवेश्य येन संप्रेषयस्यमरधाम नितान्तमस्मान्॥ १॥

तदूदृष्ट्वा आमभूपतिमापृच्छय मोढेरकपुरं ब्रह्मशान्तिस्थापितवीरजिनमहोत्स्वाढ्यं प्रापुस्ते। गुरून्ववन्दिरे। गुरवोऽपि तान्बाढमालिङ्ग्यालापिषुः। वत्स ! गाढमुत्कण्ठितमस्माकं हृदयम्। मुखकमलकमपि ते विस्मृतम्। राजानुगमनं तेऽस्माकं दुःखायासीत्। कारय साधनाम्। अनृणो भव। ततोऽन्त्याराधना चतुःशरणगमन-दुष्कृतगर्हा-सुकृतानुमोदना-तीर्थमालावन्दनादिका विधिना विधापिता। गुरवो देवलोकललनानयनत्रिभागपात्रत्वमानञ्चुः। शोक उच्छलितः। ततो बप्पभट्टिः श्रीमद्गोविन्दसूरये श्रीनन्नसूरये च गच्छभारं समर्प्य श्रीआमपार्श्वमगमत्। पूर्ववत्समस्यादिगोष्ठ्यः स्फुरन्ति। एकदा सूरिर्नृपसभायां चिरं पुस्तकाक्षरदत्तदृक् तस्थौ। तत्रैका नर्त्तकी नृत्यन्ती आसीत्, रूपदासीकृताप्सराः। सूरिर्दृग्नीलिनिवारणाय तस्याः शुकपिच्छनीलवर्णायां नीलकंचुलिकायां दृशं निवेशयामास। आमस्तदृदृष्ट्वा मनसि पपाठ—

चिरंतनतत्तपारंगयाण जोगीण जोगजुत्ताणम्। जइताणं पि मियच्छी मणंमि तात च्चिय पमाणम्॥ १॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आमो रात्रौ पुंवेषां तां नर्त्तकीं सूरिवसतौ प्रैषीत्। तया सूरीणां विश्रामणाऽऽरब्धा। करस्पर्शेन ज्ञाता युवतिः सूरिणाऽभिहिता सा–"का त्वम्?। कस्मादिहागता?। अस्मासु ब्रह्मव्रतनिबिडेषु वराकि! भवत्याः कोऽवकाशः। वात्याभिर्न चलति काञ्चनाचलः।" तयोक्तम्–" भवद्भ्य उपदेष्टुमागता।

राज्ये सारं वसुधा वसुधायामपि पुरं पुरे सौधम्। सौधे तल्पं तल्पे वराङ्गनाऽनङ्गसर्वस्वम् ॥ १ ॥

इति। किंच—

प्रियादर्शनमेवास्तु किमन्यैर्दर्शनान्तरैः। प्राप्यते येन निर्वाणं सरागेणापि चेतसा ॥ २ ॥

श्रीआमेन प्रेषिताऽहं प्राणवल्लभा भवतां शुश्रुषार्थम्।" ततः सूरिशक्रो वदति स्म–"अस्माकं ज्ञानदृक्प्रघातदृष्टद्रष्टव्यानां नैव व्यामोहाय प्रगल्भसे।

मलमूत्रादिपात्रेषु गात्रेषु मृगचक्षुषाम्। रतिं करोति को नाम सुधीर्वर्चोगृहेष्विव ॥ १ ॥"

सापि निर्विकारं सूरिवरं निश्चित्य ध्वनचेताः प्रातर्नृपतिसमीपं गता। पृच्छते राज्ञे रात्रीयः सूरिवृत्तान्तः सम्यक्कथितस्तया। "पाषाणघटित इव तव गुरुः। नवनीतपिण्डमयः शेषो लोकः। यावन्तः कूटप्रपञ्चा हावभाव-कटाक्ष-भुजाक्षेप-चुम्बन-नखरदनाक्षतादिविलासास्ते सर्वे आजन्मशिक्षितास्तत्र प्रयुक्ताः। पुनस्तिलतु-

For Private And Personal

षत्रिभागमात्रमपि मनोऽस्य नाचालीत्। अनुरागबलात्कारपूत्कारभीदर्शनहत्यादानादिविभीषिकाभिरपि नाक्षुभत्। तदेष मन्ये महावज्रमयो न देवकन्याभिर्न विद्याधरीभिर्न नागाङ्गनाभिश्चाल्यते मानुषीणां तु का कथा?" अस्मिन्सूरेर्द्धर्मस्थैर्ये श्रुते नृपो विस्मयानन्दाभ्यां कन्दम्बमुकुलस्थूलरोमाञ्चकञ्चुकितगात्रः संवृत्तः। तुष्टौ च—

गुरुं ध्यानप्रत्यक्षं कृत्वा न्युञ्छने यामि वाक्यानाम्।
दृशोर्याम्यवतारणे बलिः क्रियेऽहं सौहार्दहृद्याय हृदयाय ते ॥१॥

प्रातर्गुरवः समागुः। राजा ह्रणो न वदति किञ्चित्। सूरिभिर्भणितम्–"राजन्! मा लज्जिष्ठाः। महर्षीणां दूषणभूषणान्वेषणं राज्ञा कार्यं न दोषः।" राज्ञोक्तम्–" अलमतीतवृत्तान्तचर्चया। एतदहमुत्तम्भितभुजो ब्रुवे युष्मान्ब्रह्मघनानवलोक्य–

" धन्यास्त एव धवलायतलोचनानां तारुण्यदर्पघनपीनपयोधराणाम्।
क्षामोदरोपरिलसत्त्रिवलीलतानां दृष्ट्वाऽऽकृतिं विकृतिमेति मनो न येषाम् ॥ १ ॥"

इत्युक्त्वा दण्डप्रणामेन प्रणनाम श्रीआमः। अन्येद्यू राजा राजपथेन सत्त्वरमाणो हालिकप्रियां एरण्ड-बृहत्पत्रसंभृतस्तनविस्तरां एरण्डपत्राणि विचिन्वानां गृहपाश्चात्यभागे दृष्ट्वा गाथार्द्धं योजितवान्—

वइविवरनिग्गयदलो एरंडो साहइ व्व तरूणाणं।

तत्तु सूरीणां पुरः समस्यात्वेन समर्पितवान्। सूरय उचुः—

इत्थ घरे हलियवहू इद्दहमित्तत्थणी अत्थि ॥ १ ॥

राजा विस्मितः। अहो! सारं सारस्वतम्।

अन्यदा सायं प्रोषितभर्तृकां वासभवनं यान्तीं वक्रग्रीवां दीपकरां ददर्श। गाथार्द्धं चोचे—

दिज्झइ वंकग्गीवाइ दीवओ पहियजायाए।

सूर्यग्रे पपाठ। सूरिर्गाथापूर्वार्द्धमुवाच—

पियसंभरणपुलुट्टंत अंसुधारानिवायभीयाए ॥ १ ॥

इति। सूरिभूपौ सुखेन कालं गमयतो धर्मपरौ। अन्यदा धर्मनृपेण आमनृपस्य पार्श्वे दूतः प्रहितः। एत्यावोचत्—"राजन्! तव विचक्षणतया धर्मनृपः सन्तुष्टः। पुनः स आह। भवद्भिर्वयं छलिताः। यतो भव-

For Private And Personal

दूभ्यौ गृहमागतेभ्यो नास्माभिर्महानल्पोऽपि कोऽपि सत्कारः कृतः। अधुना शृणु–" अस्मद्राज्ये वर्द्धनकुञ्जरो नाम महावादी बौद्धदर्शनी विदेशादागतोऽस्ति। स वादं जिघृक्षुः। यः कोऽपि वो राज्ये वादी भवति स आनीयताम्। अस्माकं भवद्भिः सह चिरत्नं वैरम्। यः कोऽपि वादी विजयी भविष्यति तत्प्रभुरपरस्य राज्यं ग्रहिष्यति। मम वादिना यदा जीतं तदा त्वदीयं राज्यं मया ग्राह्यम्। यदा तव वादिना जितं तदा मदीयं राज्यं त्वया ग्राह्यम्। अयं पणः। वाग्युद्धमेवास्तु। किं मानवकदर्थनेन?" आमेनोक्तम्—"दूत! त्वया यदुक्तं तद्धर्मेण कथापितमथवा त्वया स्वतुण्डकण्डूतिमात्रेणोक्तम्? यदि तव प्रभुः सप्ताङ्गं राज्यं वादे जीते समर्पयिष्यति मे इति सत्यम्। तदा वयं वादिनमादायागच्छाम इति।" दूतेनोक्तम्—कारणवशाद् युधिष्ठिरेणापि द्रोणपर्वण्यसत्यं भाषितम्। मत्प्रभुस्तु कारणेऽपि न मिथ्या भाषते।" आमेन दूतः प्रैषि। उक्तदिनोपरि च बप्पभट्टिं च गृहीत्वा अर्द्धपथे उक्तस्थाने आमोऽगमत्। धर्मभूपतिरपि वर्द्धनकुञ्जरं वादीन्द्रमादाय तत्राजगाम। परमारवंश्यं नरेन्द्रं महाकविं वाक्पतिनामानं स्वसेवकं सहादाय समाययौ। उचितप्रदेशे आवासान्दापयामास। तौ वादिप्रतिवादिनौ पक्षप्रतिपक्षपरिग्रहेण वादमारेभेते। सभ्याः कौतुकाक्षिप्ताः पश्यन्ति। द्वावप्यसामान्यप्रतिभौ। वादे षण्मासा गताः। द्वयोः कोऽपि न हारयति न जयति। आमेन सूरयः प्रोक्ता सायम्—" राजकार्याणां प्रत्यूहः स्यात् निर्जीयतामसौ शीघ्रम्।" सूरिणा भणितम्—"प्रात-

निग्रहीष्यामि। मा स्म वो भ्रान्तिर्भूयात्।" रात्रौ सूरीश्वरेण मन्त्रशक्त्या मण्डले हारार्द्धहारमणिकुण्डलमण्डिताङ्गी दिव्याऽङ्गरागवसना दिव्यकुसुमपरिमलवासितभुवनोदरा भगवती भारती साक्षादानीता। चतुर्दशभिः काव्यैः सद्यस्कैर्दिव्यैः स्तुता। देव्योक्तम्-"वत्स! केन कारणेन स्मृता।" सूरिवीरेण भणितम्-"षण्मासा वादे लग्नाः। तथा कुरु यथा वादे निरुत्तरीभवति सः।" देव्या गदितम्-"वत्स! अहमनेन प्राक् सप्त भवानाऽऽराधिता। मयाऽत्र भवेऽस्मै अक्षयवचना गुटिका दत्ताऽस्ति। तत्प्रभावाच्चक्रिनिधिधनमिव नास्य वचो हीयते।" सूरिणोक्तम्-"त्वं देवि! किं जैनशासनविरोधिनी? येन मे जयश्रियं न दत्से।" भारत्यूचे-"वत्स! जयोपायं ब्रुवे त्वया वादारम्भे प्रातः सर्वे वदनशौचं काराप्याः पार्षद्याः। गण्डुषं कुर्वतस्तस्य वदनाद् गुटिका ममेच्छया पतिष्यति तदा त्वया जेष्यते। एकं तु याचे-मत्स्तुतेश्चतुर्दशकाव्यं कस्याप्यग्रे न प्रकाश्यम्। तत्पठने हि मया ध्रुवं प्रत्यक्षया भाव्यम्। कियतां प्रत्यक्षा भवामि। क्लेशेनालम्।" एवमुक्त्वा देवी विद्युज्झात्कारलीलयाऽन्तर्दधे। सूरिभिर्निशि परमाप्तशिष्य एको वाक्पतिराजसमीपं प्रहित्याख्यापितं यथा-सूरयो वदन्ति-"राजन्! त्वं विद्यानिधिरस्माकं लक्षणावतीपुरीपरिचितचरः। तदाऽवादीः-भगवन्! निरीहा भवन्तः कां भवद्भ्यो भक्ति दर्शयामि।" तदा वयमवोचाम-अवसरे कामपि भक्तिं कारयिष्यामः। भवद्भिर्भणितम्-तथास्तु।" इदानीं सोऽवसरोऽत्र समायातः। वाक्पतिना शिष्यः पृष्टः-"सूरयः किं मे

For Private And Personal

समादिशन्ति ?। आदिष्टं कुर्वे ध्रुवम्।" शिष्यो न्यवेदयत्–"राजन्! गुरवः आदिशन्ति–प्रातर्धर्मामयोः सदःस्थयोः सतोस्त्वया वाच्यं यथा–वदनशौचं विना भारती न प्रसीदति। तस्माद्वादिप्रतिवादिसभ्यसभेशाः सर्वे शौचं कुर्वन्तु। एतावति कृते भवता नः सर्वः स्नेहः कृत एव।" वाक्पतिना तदङ्गीकृतम्। शिष्येणोपगुरु गत्वा तत्तत्प्रतिज्ञातं कथितम्। तुष्टाः गुरवः। प्रत्यूषे उदयति भगवति गभस्तिमालिनि लाक्षालिप्त इव प्राचीमुखे राजानौ समायामागाताम्। वाक्पतिना वदनशौचं सर्वे कारिताः, बौद्धवादीन्द्रोऽपि। तस्य वदनकमलाद्विगलिता गुटिका पतद्ग्रहे। बप्पभट्टिशिष्यैः पतद्ग्रहो जनैर्दूरे कारापितः। गुटिका सूरीन्द्रसाज्जाता। बौद्धो गुटिकाहीनः सूरिणा पार्थेन कर्ण इव दिव्यशक्तिमुक्तो निःशंकं वाक्पृषक्तैर्हतः। निरुत्तरीकृतः राहुग्रस्तश्चन्द्र इव हिमानीविलुप्तस्तरुखण्ड इव निस्तेजतां भेजे। तदा श्रीबप्पभट्टेर्निर्विवादं वादिकुञ्जरकेसरीति विरुदं स्वैः परैश्च दत्तम्। धर्मेण सप्ताङ्गं राज्यं आमाय दत्तम्। लाहीदम्। धर्माद्धि राज्यं लभ्यते। काऽत्र चर्चा ?। आमेन गृहीतम्। तदा सूरिणा आमः प्रोक्तः–"राजन्! पुनः राज्यं धर्माय देहि। महादानमिदम्। शोभते च ते। राजस्थापनाचार्याश्च यूयम्। श्रीरामेण वनस्थेनापि सुग्रीवविभीषणौ राजीकृतौ। त्वमप्येवं युगीननृपेषु तुल्यः।" एतद्वचनसमकालमेव आमेन गाम्भीर्यौदार्यधाम्ना धर्माय तद्राज्यं प्रत्यर्प्य स धर्मः परिधापितः। स्वे मत्ताः करिणः शतं, सहस्रं तुङ्गास्तुरङ्गाः, सहस्रं सवरूथा रथाः, शतं

वादित्राणि प्रादायिषत । स्वं स्वं स्थानं गताः सर्वे । सूरिभूपौ यशोधवलितसप्तभुवनौ गोपगिरौ श्रीमहावीरमवन्दिषाताम् । तदा सूरिकृतं श्रीवीरस्य स्तवनम्–' शान्तो वेषः शमसुखफला ' इत्यादि काव्यैकादशकमयमद्यापि सङ्घे पठ्यते । सङ्घेन प्रभुर्ववन्दे । तुष्टुवे च—

रवेरेवोदयः श्लाघ्यः कोऽन्येषामुदयग्रहः । न तमांसि न तेजांसि यस्मिन्नभ्युदिते सति ॥१॥

अन्यदा स्वपरसमयसूक्तैः प्रबोध्य राजा प्रभुभिर्मद्यमांसादि सप्तव्यसननियमं कारितः । सम्यक्त्वमूलैकादशव्रतनिरतश्च श्रावकः कृतः । द्वादशं व्रतं त्वतिथिसंविभागाख्यं प्रथमचरमजिननृपाणां निषिद्धं सिद्धान्ते । एकदा लक्षणावत्यां बौद्धो वर्द्धनकुञ्जरो धर्मनृपमाह सगद्गदम्–" अहं बप्पभट्टिना जितस्तन्मे न दूषणम् । बप्पभट्टिर्हि भारती नररूपा, प्रज्ञामयः पिण्डः, गीष्पुत्रः, न च दुनोति । एतत्तु दुनोति यत्तव भृत्येनापि वाक्पतिराजेन सूरिकृतभेदान्मम मुखशौचोपायेन गुर्दी हारयामहे । एतावदभिधाय स तारं तारं रुरोद । स निवारितः क्ष्मापेन रोदनात् । उक्तश्च किं क्रियते ? । अयं नश्चिरसेवकोऽनेकसमराङ्गणलब्धजयप्रतिष्ठः प्रबन्धकविः पराभवितुं न रोचते । क्षमस्वेदमस्यागः । ततो बौद्धो जोषं स्थितः । अपरेद्युर्यशोधर्मनाम्ना समीपदेशस्थेन बलवता भूपेन लक्षणावतीमेत्य रणे धर्मनृपो व्यापादितः । राज्यं जगृहे । वाक्पतिरपि बन्दीकृतः । तेन कारास्थेन गौडवधसंज्ञकं प्राकृतं महाकाव्यं रचयित्वा यशोधर्माय राज्ञे दर्शितम् । तेन

For Private And Personal

गुणविशेषविदा ससत्कारं बन्देर्मुक्तः । क्षमितश्च । विद्वान् सर्वत्र पूज्यते । ततो वाक्पतिर्बप्पभट्टिं समीपं गतः । द्वयोस्तयोर्मैत्री पूर्वमप्यासीत् । तदानीं विशेषतोऽवृधत् । तेन वाक्पतिना महामहविजयाख्यं प्राकृत-महाकाव्यं बद्धम् । आमाय दर्शितम् । आमो हेमटंककलक्ष्यमस्मै व्यशिश्रणत् ।

कियती पञ्च सहस्री कियती लक्ष्या च कोटिरपि । औदार्योन्नतमनसां रत्नवती वसुमती कियती ॥१॥

अपरेद्युः प्रभुः श्रीआमेन पृष्टः—"भगवन् यूयं तावत्तपसा विद्यया च लोके लब्धपरमरेखाः । किमन्यो कोऽपि क्वाप्यास्ते यो भवत्तुलालेशमवाप्नोति ।" बप्पभट्टिरभाणीत्— अवनिपते ! मम गुरुबान्धवौ गोविन्दाचार्य–नन्नसूरी सर्वैर्गुणैर्मदधिकौ गुर्ज्जरधरायां मोढेरकपुरे स्तः ।" गुणोत्कण्ठयाऽमितसैन्य आमस्तत्र गतः । तदा नन्नसूरिर्व्याख्यानेऽवसरायातान् वात्स्यायनोक्तान् कामाङ्गभावानपल्लवयन्नासीत् । राज्ञा श्रुतं तत्सर्वम् । अरुचिरुत्पन्ना । अहो ! वयं कामिनोऽपि नैतान् भावान् विद्मः । अयं तु वेत्ति सम्यक् । तस्मादवश्यं नित्यं योषित्सङ्गी किमस्य प्रणामेन ? इत्यकृतनतिरेवोत्थायाशु गोपागिरिमागात् । चिराद्दृष्टः क्ष्माप इति रणरणकाक्रान्तस्वान्ताः प्रभवो वन्दापयितुमैयरुः । राजा निरादरः न वन्दते तथा । एवं दिनानि कतिपयानि गतानि । एकदा गुरुभिः प्रपच्छे—"राजन् ! यथा पुरा भक्तोऽभूस्तथेदानीं भक्तो नासि । किमस्माकं दोषः कोऽपि ? ।" राजा स्माह—"सूरिवर ! भवादृशा अपि कुपात्रश्लाघां कुर्वते ।" सूरिरूचे–कथम् ? । आमः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

प्राह–यौ भवद्भिः स्वौ गुरुबान्धवौ स्तुतौ। तत्र गत्वा एको नन्नसूरिनामा दृष्टः शृंङ्गारकथाव्याख्यानलम्पट-स्तपोहीनो लोहतरण्डतुल्यो मज्जति मज्जयति च भवाम्बुधौ। तस्मान्न किञ्चिदेतत्। सूरयो मसिमलिनवदनाः स्ववसतिमगुः। तत्रोपविश्य द्वौ साधू मोढेरकपुरं प्रहितौ। तत्पार्श्वात्तत्र कथापितम्—"आमोऽकृतप्रणामो भवत्पार्श्वादागतः। एवमेवं युवां निन्दति। तत्कर्तव्यं येनासौ भवत्स्वन्येष्वपि श्रमणेषु अवज्ञावान्न भवति।" सर्वं तत्रत्यं ज्ञात्वा तौ द्वावपि गुटिकया वर्णस्वरपरावर्त्तं कृत्वा नटवेषधरौ गोपगिरिमीयतुः। श्रीऋषभध्वज-चरित्रं नाटकत्वेन बबन्धतुः। नटान् शिक्षयामासतुः। आमराजमवसरं ययाचतुः। राज्ञाऽवसरो दत्तः। मि-लिताः सामाजिकाः तत्तद्रसभावज्ञाः। ताभ्यां नाटकं दर्शयितुमारेभे। भरतबाहुबलिसमरावसरोऽभिनी-यते। यदा व्यूहरचना–शस्त्रझात्कार–वीरवर्णना–भट्टकोलाहलाक्षोत्थापनघर्घरिका–क्रणक्रणत्कारादि ता-भ्यां वर्णयितुमारब्धम्। धारारूढश्च रसोऽवातारीत्। तदा श्रीआमस्तद्भटाश्च कालिन्दीप्रवाहश्यामदीर्घानसी-नाकृष्योत्थिता हतहत इति भाषन्ते स्म। अत्रान्तरे नन्नसूरिगोविन्दाचार्यौ स्वरूपमुद्रे प्रकाश्याहतुः—"रा-जन्! २ भटाः २ शृणुत २ कथायुधमिदं न तु साक्षादलं संभ्रमेण।" इत्युक्त्वा लज्जिता विस्मिताश्च ते रा-जाद्याः संधृत्याकारमस्थुः। तदा गोविन्दाचार्यनन्नसूरिभ्यां भूपोऽभाणि–"किल शृङ्गारानुभविनो वयमिति सम्यग्व्याख्यातुं विद्मः। किन्तु समराजिरमपि भवद्भूत्प्रविष्टाः स्मः। कुरङ्गा इव शाङ्गे दृष्टे बिभिमः। आबा-

For Private And Personal

ल्याद् गृहीतव्रताः पापभीरवः स्मः । परं भारतीप्रभावप्रभववचनशक्त्या रसान्सर्वान् जीवद्रूपानिव दर्शयामः । राजन् ! मोढेरके यैस्ते वात्स्यायनभावा व्याख्याताः । ते वयं नन्नसूरय इमे च गोविन्दाचार्याः । भवतां तदा मृषा विकल्पः समजनि । राजा सद्यो ललज्जे । तौ सूरी क्षमयामास आनर्च बप्पभट्टिं च । तौ कतिचिद्दिनानि उपराजं स्थित्वा बप्पभट्टयनुज्ञया पुनर्मोढेरपुरमगाताम् । गतः समयः कियानपि । अन्यदा गाथकवृन्दमागतम् । तन्मध्ये बालिकैका तमालनीलोत्पललोचना मृगाङ्कमुखी किन्नरस्वरा विदुषी गायति । तद्दृष्ट्वा मदनज्वरजर्जरो गलितविवेको गतप्रायशौचधर्माभिनिवेशः कन्यकुब्जेशः पदद्वयं प्रभुप्रत्यक्षमपाठीत्—

वक्त्रं पूर्णशशी सुधाधरलता दन्ता मणिश्रेणयः कान्तिः श्रीर्गमनं गजः परिमलस्ते पारिजातद्रुमाः ।
वाणी कामदुघा कटाक्षलहरी सा कालकूटच्छटा तत्किं चन्द्रमुखि ! त्वदर्थममरैरामन्थि दुग्धोदधिः ॥१॥

जन्मस्थानं न खलु विमलं वर्णनीयो न वर्णो दूरे शोभा वपुषि निहिता पङ्कशङ्कां तनोति ।
विश्वपार्थ्यः सकलसुरभिद्रव्यदर्पापहारी नो जानीमः परिमलगुणः कस्तु कस्तूरिकायाः ॥२॥

सूरिभिश्चिन्तितम्—अहो ! महतामपि कीदृग् मतिविपर्यासः ।

भस्त्रा काचन भूरिरन्ध्रविगलत्तत्तन्मलक्लेदिनी सा संस्कारशतैः क्षणार्द्धमधुरां बाह्यामुपैति द्युतिम् ।
अन्तस्तत्त्वरसोर्मिधौतमतयोऽप्येतां नु कान्ताधिया श्लिष्यन्ति स्तुवते नमन्ति च पुरः कस्यात्र पुत्कुर्महे ॥१॥

उत्थिता सभा । त्रिभिर्दिनैर्भूपेन पूर्षहिः सौधं कारितम्, मातङ्गीसहितोऽत्र वत्स्यामीति धिया । तद्वगतं श्रीबप्पभट्टिसूरिभिः । ध्यानप्रत्यक्षं हि तेषां जगद्वृत्तम् । ततो माऽसौ नरकमयासीदिति कृपया तैर्निष्पाद्यमानसौधपट्टे निशि खटिकया बोधदानि पद्यानि लिखितानि । यथा—

शैत्यं नाम गुणस्तवैव तदनुस्वाभाविकी स्वच्छता किं ब्रूमः शुचितां भजन्त्यशुचयस्त्वत्संगतोऽन्ये यतः ।
किंवाऽतः परमस्ति ते स्तुतिपदं त्वं जीवितं देहिनां त्वं चेन्नीचपथेन गच्छसि पयः कस्त्वां निरोद्धुं क्षमः ॥१॥

सद्वृत्तसद्गुणमहार्हमहार्घकान्तकान्ताघनस्तनतटोचितचारुमूर्ते ! ।
आः पामरीकठिनकण्ठविलग्नभग्न हा हार ! हारितमहो भवता गुणित्वम् ॥२॥

जीवं जलबिन्दुसमं संपत्तीओ तरंगलोलाओ । सुमिणयसमं च पिम्मं जं जाणसि तं करिज्जासि ॥३॥
लज्जिज्जइ जेण जणे मइलिज्जइ निअकुलक्कमो जेण । कंठट्ठिए वि जीए तं न कुलीणेहिं कायव्वं ॥४॥

प्रातरमूनि पद्यानि स्वयमामो ददर्श । वर्णान्कविस्वगतिं च उपलक्षयामास । अहो ! गुरूणां मयि कृपा

For Private And Personal

अहोतमां मम पापाभिमुखता इति ललज्जे। दध्यौ च–"सांकल्पिकमिदं जनङ्गमीसङ्गमपापं मयाऽऽचरितम्। भारितोऽहं क्व यामि?। किं करोमि?। कथं गुरोर्मुखं दर्शयामि?। किं तपः समाचरामि?। किं तीर्थं सेवे?। ऊर्ध्वं मुखं गृहीत्वा गच्छामि। कूपे पतामि। शस्त्रेणात्मानं घातयामि।" अथवा ज्ञातम्–सर्वजनसमक्षं पापमुद्धीर्य काष्ठानि भक्षयामि। एवं टलवलायमानोऽनुचरानादिदेश–अग्निं प्रगुणयत। प्रगुणितस्तैरग्निः। समागताः श्रीबप्पभट्टिसूरयः। मेलितं चातुर्वर्ण्यम्। उक्तं तदघम्। यावत्सहसाऽग्निं प्रवेक्ष्यति आमस्तावत्सूरिभिर्बाहौ धृत्वोक्तः–"राजन्! शुद्धोऽसि। मा स्म खिद्यथाः। त्वया हि संकल्पमात्रेण तत्पापं कृतं न साक्षात्। संकल्पेनाग्निमपि प्रविष्टोऽसि। चिरं धर्मं कुरु।

मनसा मानसं कर्म वचसा वाचिकं तथा। कायेन कायिकं कर्म निस्तरन्ति मनीषिणः॥"

इति वचनाद्विसृष्टोऽग्निः। जीवितो राजा। तुष्टो लोकः। प्रीतः सूरिः। समयान्तरे वाक्पतिराजो मथुरां ययौ। तत्र श्रीपादस्त्रिदण्डी जज्ञे सः। तल्लोकादवगम्य आमः सूरीन् बभाषे–"भवद्भिरहमपि श्रावकः कृतः। दिव्या वाणी वः प्रसन्नैव। जानामि वः शक्तिपरमरेखां यदि वाक्पतिमप्यार्हतदीक्षां ग्राहयथ।" आचार्यैः प्रतिज्ञां चक्रे–"तदा विद्या मे प्रमाणं यदि वाक्पतिं स्वशिष्यं श्वेताम्बरं कुर्वे।" वाक्पतिस्तु क्वास्ति, इति उच्यताम्?। राज्ञोक्तम्–"मथुरायां विद्यते।" सूरयो मथुरायां गता बहुभिः श्रीआमाप्तनरैः सह। वराह-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मन्दिराख्ये प्रासादे ध्यानस्थं वाक्पतिं गत्वाऽद्राक्षुः। तत्पृष्ठस्थैः सूरिभिस्तारस्वरेण आशिर्वादाः पठितुमारब्धाः-

सन्ध्यां यत्प्रणिपत्य लोकपुरतो बद्धाञ्जलिर्याचसे धत्से यच्च नदीं विलज्ज ! शिरसा तच्चापि सोढं मया।
श्रीर्जाताऽमृतमन्थनाद्यदि हरेः कस्माद्विषं भक्षितं मा स्त्रीलम्पट मां स्पृशेत्यभिहितो गौर्या हरः पातु वः॥१॥
एकं ध्याननिमीलनान्मुकुलितं चक्षुर्द्वितीयं पुनः पार्वत्या विपुले नितम्बफलके शृङ्गारभारालसम्।
अन्यद्दूरविकृष्टचापमदनक्रोधानलोद्दीपितं शंभोर्भिन्नरसं समाधिसमये नेत्रत्रयं पातु वः ॥२॥
रामो नाम बभूव हुं तदबला सीतेति हुं तां पितुर्वाचा पञ्चवटीवने विचरतस्तस्याहरद्रावणः।
निद्रार्थं जननीकथामिति हरेर्हुंकारिणः शृण्वतः पूर्वंस्मर्तुरवन्तु कोपकुटिला भ्रूभङ्गुरा दृष्टयः ॥३॥

उत्तिष्ठन्त्या रतान्ते भरमुरगपतौ पाणिनैकेन कृत्वा
धृत्वा चान्येन वासो विगलितकबरीभारमंसे वहन्त्याः।
सद्यस्तत्कायकान्तिद्विगुणितसुरते प्रीतिना सौरिणा वः
शय्यामालिङ्ग्य नीतं वपुरलसलसद्बाहु लक्ष्म्याः पुनातु ॥४॥

एवं बहु पेठे। अथ वाक्पतिर्ध्यानं विसृज्य संमुखीभूय सूरीनाह-"हे बप्पभट्टिमिश्रा यूयं किमस्मत्पुरतः शृङ्गाररौद्राङ्गं पद्यपाठं कुरुध्वे।" बप्पभट्टयः प्राहुः-" भवन्तः सांख्याः।

For Private And Personal

सांख्या निरीश्वराः केचित् केचिदीश्वरदेवता। सर्वेषामपि तेषां तत्त्वानां पञ्चविंशतिः ॥ १ ॥

इति ज्ञात्वा भवदभिमतदेवाशिषः पठन्तः स्मः। यथारुचि हि श्रोतुः पुरः पठनीयं समयज्ञैः।" वाक्पतिराह–यद्यप्येवं तथापि मुमुक्षवो वयमासन्ननिधनं ज्ञात्वा इह परमब्रह्म ध्यातुमायाताः स्मः।" बप्पभट्टयो जगदुः—किं तर्हि रुद्रादयो मुक्तिदातारो न भवन्तीति मनुध्वे ?।" वाक्पतिः प्राह–" एवं संभाव्यते।" बप्पभट्टयो बभाषिरे–" तर्हि यो मुक्तिदानक्षमस्तं शृणु। पठामि। स जिन एव।

मदेन मानेन मनोभवेन क्रोधेन लोभेन स संमदेन।
पराजितानां प्रसभं सुराणां वृथैव साम्राज्यरुजा परेषाम् ॥ १ ॥
जं दिट्ठी करुणातरंगियपुडा एयस्स सोमं मुहं आयारो पसमायरो परियरो संतो पसन्ना तणू।
तं मन्ने जरजम्ममच्चुहरणो देवाहिदेवो इमो देवाणं अवराण दीसइ जओ नेयं सरूवं जए ॥ २ ॥

इत्यादि बहु पेठे।" वाक्पतिः प्राह–" स जिनः क्वास्ते।" सूरिः–" स्वरूपतो मुक्तौ मूर्तितस्तु जिनायतने।" वाक्पतिर्ब्रूने–"प्रभो ! दर्शय तम्।" प्रभुरपि आमनरेन्द्रकारिते प्रासादे तं निनाय। स्वयं प्रतिष्ठितवरं श्रीपार्श्वनाथमदीदृशत्। शान्तं कान्तं निरञ्जनं रूपं दृष्टवा प्रबुद्धो बभाण—" अयं निरञ्जनो देव आका-

रेणैव लक्ष्यते।" तदा बप्पभट्टिसूरिभिर्देवगुरुधर्मतत्त्वान्युक्तानि। रञ्जितः सः। मिथ्यात्ववेषमुत्सृज्य जैन-ऋषिः श्वेताम्बरोऽभूत्। जिनमवन्दिष्ट अपाठीच्च–

मेयनाए सुरहिएणं इमिणा किंकरफलं णलाडेणम्। इच्छामि अहं जिणवरपणाम किंण कलुसियं काउं ॥१॥
दोवि गिहित्था धडहड वच्चइं को किर कस्स विपत्त भणिज्जइं।
सारंभो सारंभं पुज्जइ कद्दमु कद्दमेण किम सुज्जइ ॥ २ ॥

अत्यासन्ने आयुषि मथुराचातुर्वर्ण्यस्य आमभूपसचिवलोकस्य च प्रत्यक्षं अष्टादशपापस्थानानि त्याजितः। नमस्कारं पञ्चपरमेष्ठिमयं श्रावितः। जीवेषु क्षामणां कारितो वाक्पतिः सुखेन त्यक्ततनुर्दिवमगमत्। तत्सर्वं प्रधानैरन्यैरपि प्रथमं ज्ञापितो नृपः। पश्चाद्बप्पभट्टिर्गोपगिरिं गतः। राजा तुष्टस्तुष्टुवे सूरिशक्रम्–

आलोकवन्तः सन्त्येव भूयांसो भास्करादयः। कलावानेव तु ग्रावद्रावकर्मणि कर्मठः ॥ १ ॥

एकदा राज्ञा सूरिः पृष्टः–"किं कारणम्? येनाहं ज्ञातजैनतत्त्वोऽपि अन्तराऽन्तरा तापसधर्मे रतिं बध्नामि।" सूरिराह—"प्रातर्वक्ष्यामः।" प्रातरायाताः प्रोचुः—"राजन्! अस्माभिर्भारतीवचसा तव प्राग्भवो ज्ञातः। त्वं कालिञ्जरगिरेस्तीरे शालनामा तपस्वी शालद्रुमाधोभागे द्विउपवासान्तरितभोजनस्तपो बहूनि वर्षाण्य-

For Private And Personal

तपथाः। स मृत्वा त्वमुत्पन्नः। तस्यातिदीर्घा जटा तत्रैव लतान्तारिता अद्याप्यस्ति।" तदाकर्ण्य आप्त-नरास्तत्र राज्ञा प्रहिताः। तैर्जटा आनीता। सूरिवाक्संवादो दृष्टः। भूपतिः सूरीणां पदोर्विलग्य तस्थौ। परमार्हतो बभूव। अन्यदा सौधोपरितलस्थेन आमेन क्वापि गृहे भिक्षार्थं प्रविष्टो मुनिर्दृष्टः। तत्र युवति-रेका कामार्त्ता गृहागतं मुनिं परब्रह्मैकाचित्तं रिरमयिषुः कपाटसम्पुटं ददौ। मुनिर्नेच्छति ताम्। तया मुनये पादतलप्रहारे दीयमाने नूपुरं मुनिवरचरणे प्रविष्टं काकतालीयन्यायेन अन्धवर्त्तकीन्यायाच्च। राजा तद्दृष्ट्वा सूरये समस्यां ददौ–

कवाडमासज्ज वरंगणाए अब्भुत्थिओ जुव्वणगव्वियाए।

सूरिः प्राह–

नमाविन्नयं तेण जियं दिएण स नेउरो पव्वइ अस्स पाओ ॥ १ ॥

अन्यदा प्रोषितभर्तृकाया गृहे भिक्षुः कश्चिद् भिक्षार्थी प्रविष्टः। राज्ञा सौधाग्रस्थेन दृष्टः। तया भिक्षोः पारणायान्नमानीतम्। उपरि काकैर्भक्षितम्। मुनिकस्य दृष्टिस्तस्या नाभौ पतिता। तस्यास्तु दृष्टिस्तन्मुख-कमले। आमः सूरये समस्यामार्पिपत्। यथा–

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भिखयरो पिच्छइ नाभिमंडलं सावि तस्स मुहकमलम् ।

सूरिराह–

दुन्हंपि कवालं चडुयंपि काया विलुंपन्ति ॥ २ ॥

इति आमः श्रुत्वा चमत्कृतः । अहो सर्वज्ञपुत्रका एते । अन्यदा कोऽपि चित्रकृद् भूपरूपं लिखित्वा उपभूपं गतः । बप्पभट्टिना श्लाघिता तत्कला। नृपात्तेन टंककलक्षं लेभे। लेप्यमयबिम्बचतुष्टयं च कारितम्। एकं मथुरायाम् । एकं मोढेरवसहिकायामणहिल्लपुरे । एकं गोपगिरौ । एकं सतारकाख्यपुरे । तत्र प्रतिष्ठाः प्रभावनाश्च कारिताः । अन्यदपि बहुकारि। अथ आमगृहे पुत्रो जातः। सुलक्षणः। सोत्सवं तस्य 'दुन्दुकः' इति नाम प्रतिष्ठितम् । सोऽपि युवत्वे तैस्तैर्गुणैः पितृवत्पप्रथे । एकदा समुद्रसेनभूपाधिष्ठितं राजगिरिनाम-दुर्गं आमो रुरोध । अमितं सैन्यं कुद्दालादिसामग्री भैरवादयो यन्त्रभेदाः कल्पिताः । प्राकारोऽतिबलेन प्रपातयितुमारेभे। नापतत्। आमः खिन्नः। तेन सूरयः पृष्टाः–"अयमभ्रंलिहः प्राकारः कदाऽस्माभिर्ग्राहिष्यते।" सूरिभिर्बभणे–"तव पुत्रपुत्रो भोजनामाऽमुं प्राकारं दृक्पातमात्रेण पातयिष्यते अन्यो नैव।" आमस्त्यक्तारम्भः प्राकाराद्बहिर्द्वादशाब्दीमस्थात् । शत्रुदेशमात्मसाच्चक्रे । दुन्दकगृहे पुत्रो जातः । तस्य 'भोज'नाम ददे । स जातमात्रः पर्यंकिकान्यास्ते। दुर्गद्वाराग्रमानीतः प्रधानैः। तद्दृकप्रपातमात्रेण प्राकारः खण्डशो विशीर्णः।

For Private And Personal

समुद्रसेनभूपो धर्मद्वारे निःसृतः। आमो राजगिरिमविक्षत्। प्रजामारो न कृतः। अङ्कूरा हि जैना महर्षयः राजर्षयश्च दयापरास्ते। रात्रौ आमाय राजगिर्यधिष्ठात्रा भाणितम्–"राजन्! यदि त्वमत्र स्थास्यासि तदा तव लोकं हनिष्यामि" आमः प्रत्यूचे—"लोकेन हतेन किं ते फलं?। यदि हनिष्यासि तदा मामेव घातय।" एतन्निर्भयमामवचः श्रुत्वा तुष्टो व्यन्तर उवाच—"प्रीतोऽस्मि ते सत्त्वेन। याचस्व किञ्चित्।" राजोचे–"न किमपि न्यूनं मे केवलं कदा मे मृत्युः? ब्रूहीदम्।" व्यन्तर उवाच–"षण्मासावशेषे आयुषि स्वयमेत्य वक्ष्यामि।" षण्मासावशेषे आयुषि पुनरागतः सः। राज्ञोक्तम्–"कियन्मे आयुः?।" व्यन्तरो वदति–"देव!

गङ्गान्तर्मागधे तीर्थे नावाऽवतरतः सतः। मकाराद्यक्षरग्रामोपकण्ठे मृत्युरास्ति ते ॥ १ ॥

षण्मासान्ते इति विद्याः। पानीयान्निर्गच्छन्तं धूमं यदा द्रक्ष्यसि तदा मृत्युर्ज्ञातव्यः। साधना च कार्या पारलौकिकी।" इति गदित्वा गतो देवजातीयः। राजा प्रातः सूरिपार्श्वं गतः। सूरिरुवाच–"राजन्! यद्व्यन्तरेण वोऽग्रे कथितं आयुष्प्रमाणं तत्तथैव। धर्मपाथेयं गृह्णीथाः।" तदाकर्ण्य भूपस्तुतोष विसिस्मिये च। अहो! ज्ञानम्। अथवा विस्मय एव कः?। सूरस्तेजस्वी। इन्दुराह्लादकः। गङ्गाम्भः पावनम्। जैना ज्ञानिन इति। दिनद्वये गते सूरिः श्रीआमस्य पुरः प्रसङ्गेन श्रीनेमिनाथस्याशीर्वादं पपाठ। यथा–

लावण्यामृतसारणिसमा सा भोजभूः स्नेहला सा लक्ष्मीः स नवोद्गमस्तरुणिमा सा द्वारिका तद्बलम् ।
ते गोविन्दशिवासमुद्रविजयप्रायाः प्रियाप्रेरकाः यो जीवेषु कृपानिधिर्व्यधित नोद्वाहं स नेमिः श्रिये ॥१॥
भूयोऽपि-मग्नैः कुटुम्बजम्बालेर्यैर्मिथ्याकार्यजर्जरैः । नोज्जयन्ते नतो नेमिस्ते चेज्जीवन्ति के मृताः ॥२॥

तथा रैवतकतीर्थमाहिमा सूरिभिर्व्याख्याय पल्लवितः। यथा-भूमिमाहत्योत्थाय परिकरं बद्ध्वा सरभसं भूपः प्रतिशुश्राव-"रैवतके नेमिमवन्दित्वा मया न भोक्तव्यमिति।" लोकैर्निषिद्धः—"राजन्! मा मा दूरे रैवतको गिरिः मृदवो भवादृशाः।" राजाऽऽह-"प्रतिज्ञातं मे न चलति। ततः सह सूरिणा आमः लक्षमेकं पृष्टवाहा वृषभाः करभसहस्र २० हस्तिशत ७ अश्वलक्षमेकं पदातिलक्षत्रयं श्राद्धकुटुम्बसहस्र २० सारसैन्यैर्द्वात्रिंशदुपवासैः रैवतकायाचालीत्। स्तम्भनतीर्थं यावद्गतः। तत्र क्षुत्तापेन व्याकुलितोऽपि प्राणसन्देहं प्राप्तोऽपि नाहारमग्रहीत्। भीतो लोकः। खिन्नःसूरिः मन्त्रशक्त्या कूष्माण्डीदेवीं साक्षादानिनाय। तदग्रे कथयामास—"तत्कुरु येन राजा जेमति जीवति च।" तद्वचनात्कूष्माण्डी बिम्बमेकं महच्छिरसा बिभ्रती गगनेन आमसविधं गता उचे च-"वत्स! साऽहमम्बिका। तव सत्त्वेन तुष्टा। गगने आगच्छन्तीं मां त्वं साक्षाद्द्राक्षीः। मयेदं रैवतैकदेशभूनादवलोकनाशिखरान्नेमिनाथबिम्बमानीतम्। इदं वन्दस्व। अस्मिन्वन्दिते मूलनेमिर्वन्दित एव। कुरु पारणकम्।" सूरिभिरपि तत्समार्थितम्। लोकेनापि स्थापितम्। तद्बिम्बं

For Private And Personal

वन्दित्वा राज्ञा ग्रासग्रहणं चक्रे। अद्यापि तद्बिम्बं स्तम्भतीर्थे पूज्यते। 'उज्जयन्त' इति प्रसिद्धं तत्तीर्थम्। हृद्यातोद्यानि ध्वानयन्नामो विमलगिरौ वृषभध्वजं सोत्सवं वन्दित्वा यावद्रैवताद्रिं गतः। तावता तत्तीर्थं दिगम्बरैरुद्धं श्वेताम्बरसंघः प्रवेष्टुं न लभते। आमेन तज्ज्ञातम्। ज्ञात्वोचे–"युद्धं कृत्वा निषेद्धॄन्हत्वा श्रीनेमिं नंस्यामि।" तावत्तत्र दिगम्बरभक्ता एकादश राजानो मिलिताः। सर्वे युद्धैकतानास्तदा बप्पभट्टिना भणित आमः–"राजेन्द्र! धर्मकार्ये पापारम्भः कथं क्रियते?। लीलयैव तीर्थमिदमात्मसात्करिष्ये। भवद्भिः स्थिरैः स्थेयम्।" एवं भूपं प्रबोध्य बप्पभट्टिरुपदिगम्बरमुपतद्भक्तं भूपं च नरं प्रहित्याबभाणत्–"इदं तीर्थं यस्याम्बिका दत्ते तस्य पक्षस्य सत्कमिति मन्यध्वे।" तैरुक्तम्–"युक्तमेतत्।" ततो बप्पभट्टिना सुराष्ट्रावास्तव्यानां श्वेताम्बरीयाणां दिगम्बरीयाणां च श्रावकाणां शतशः कन्यकाः पञ्चसप्तवार्षिक्यो मेलिताः। मिलिताः सभ्याः। बप्पभट्टिना अम्बादेवीपार्श्वात्कथापितम्–"यदि सर्वाः श्वेताम्बरकन्यकाः

उज्जिंतसेलसिहरे दिक्खानाणं निस्सीहिया जस्स। तं धम्मचक्कवट्टिं अरिट्ठनेमिं नमंसामि ॥१॥

इति गाथां पठिष्यन्ति तदा श्वेताम्बरीयं तीर्थं पक्षान्तरे तु दिगम्बरीयं तीर्थमिति।" तत आनीता मुग्धबालिकाः। सर्वाभिः श्वेताम्बरपक्षबालिकाभिःपठिता सा गाथा। अपरासु तु नैकयाऽपि। ततो जातं

श्वेताम्बरसाद्रैवततीर्थम् । अम्बिकया स्वस्थया पुष्पवृष्टिः श्वेताम्बरेषु कृता । ततो नष्टा दिक्पटा महाराष्ट्रा-
दिदक्षिणदेशानगमन् । राज्ञाऽन्यैरपि सर्वसंघैश्चिरात्तत्र मिलितैर्नेमिर्नेमे । वित्तं ददे । प्रभासे चन्द्रप्रभः
प्रणेमे । बन्दिमोक्षः सर्वत्रापि कारितः । आमस्य भुक्तौ गूर्ज्जरादिदेशास्तदा तीर्थानां चिरं पूजोपयोगिनो
हट्टाद्या याः प्रक्लृप्ताः । एवं कार्याणि कृत्वा ससूरिर्नृपो गोपगिरिं प्राविशत् । संघपूजादिमहास्तत्र नवनवाः ।
प्राप्तप्राये काले दुन्दुको राज्ये प्रतिष्ठितः । आपृष्टः सः । लोकोपि क्षामितः । अनृणो देशः कृतः । सह
सूरिणा नावाऽऽरूढो गङ्गासरित्तीरे तीर्थं मागधं गतः । तत्र जले धूमं दृष्टवान् । तदा सूरीन्द्रमक्षमयत् ।
संसारमसारं विदन् अनशनमगृह्णत् । समाधिस्थः श्रीविक्रमकालात् अष्टशतवर्षेषु नवत्यधिकेषु व्यतीतेषु
भाद्रपदे शुक्लपञ्चम्यां पञ्च परमेष्ठिनः स्मरन् राजा दिवमध्यष्ठात् । सूरयस्तत्त्वज्ञा अपि रुरुदुः । चिरप्रीति-
मोहो दुर्जय एव । सेवकास्तु चक्रन्दुः–" हा शरणागतरक्षावज्रकुमार ! हा राजस्थापनदाशरथे ! हा अश्व-
दमननल ! हा सत्यवाग् युधिष्ठिर ! हा हेमदानकर्ण ! हा मज्जाजैनत्वश्रेणिक ! हा सूरिसेवासम्प्रते ! हा
अनृणीकरणविक्रमादित्य ! हा वीरविद्याशातवाहन ! अस्मान् विहाय क्व गतोऽसि ? । दर्शयैकदाऽस्मभ्य-
मात्मानम् । मैकाकिनो मुञ्च । " एवं विलपन्तस्ते सूरिभिः प्रतिबोधिताः–" भो भोः सत्यं दैवेन पापेन ।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

आ लब्धा कामधेनुः सरसकिशलयश्चन्दनश्चूर्णितो हा
छिन्नो मन्दारशाखी फलकुसुमभृतः खण्डितः कल्पवृक्षः ।
दग्धः कर्पूरखण्डो घनहतिदलिता मेघमाणिक्यमाला
भग्नः कुम्भः सुधायाः कमलकुवलयैः केलिहोमः कृतोऽयम् ॥१॥

तथापि मा शोचत शोचत यतः—

पूर्वाह्ने प्रतिबोध्य पङ्कजवनान्युत्सार्य नैशं तमः
कृत्वा चन्द्रमसं प्रकाशरहितं निस्तेजसं तेजसा ।
मध्याह्ने सरितां जलं प्रविशतै रापीय दीप्तैः करैः
सायाह्ने रविरस्तमेति विवशः किं नाम शोच्यं भवेत् ॥१॥

इति लोकं निःशोकं कृत्वा लोकेन सह सूरिर्गोपगिरिमगात्। सूरिभिर्दुन्दुको राजा आमेन आमशोकेन जात्यमुक्ताफलस्थूलानि अश्रूण्युद्गिरन् हिमम्लानपद्मदीनवदनश्चिन्ताचान्तस्वान्तो बभाषे–राजन् ! कोऽयं महतस्तव पितृशोकः। स हि चतुर्वर्गं संसाध्य कृतकृत्यो बभूव। यशोमयेन देहेन जीवन्नेवास्ते। पुण्यलक्ष्मीः कीर्तिलक्ष्मीश्चेति द्वे नरस्योपकारिण्यौ वल्लभे ।

For Private And Personal

पुण्यलक्ष्म्याश्च कीर्तेश्च विचारयत चारुताम् । स्वामिना सह यात्येका परा तिष्ठति पृष्ठतः ॥१॥

अन्योऽप्येवंविधः कोऽपि भवतु । इत्येवंविधाभिर्वाग्भिर्दुन्दुकराजं सूरिराजो निःशोकमकार्षीत् । दुन्दुकः शनैः २ परमार्हतोऽभूत् । राजकार्याणि अकार्षीत् । त्रिवर्गं स समसेविष्ट । एवं वर्त्तमाने काले एकदा दुन्दुकश्चतुष्पथे गच्छन् कण्टिकां नाम गणिकामुदाररूपां चिद्रूपां युवजनमृगवागुरां मदनमायामयीमालोकिष्ट । तां शुद्धान्तस्त्रीमकार्षीत् । तया दुन्दकस्तथा वशीकृतो यथा–" यदेव सा वदति तत्सत्यम् । यदेव सा करोति तदेव हितं मनुते । सा तु कार्मणकारिणी वाक्पटुः सर्वं राज्यं ग्रसते हिमानीव चित्रम्, भोजमातरं पद्मा नाम अन्या अपि राज्ञीरन्वयवतीर्विनयवतीर्लावण्यवतीस्तृणाय मनुते । एकदा कलाकेलिर्नाम ज्योतिषिको निशि विसृष्टे सेवकलोके दुन्दुकराजं विजनं दृष्टवाऽवादीत्–" देव ! वयं भवत्सेवकत्वेन सुखिनः ख्याताः श्रीशाश्च । ततो यथातथं ब्रूमः–अयं ते भोजनामा तनयो भाग्याधिकस्त्वां हत्वा तव राज्ये निवेक्ष्यते । यथार्हं स्वयं कुर्वीथाः । " राजा तदवधार्य वज्राहत इव क्षणं मौनी तस्थौ । ज्योतिषिकं विससर्ज । सा वार्ता भोजजननीसहचर्या दास्यैकया विपुलस्तम्भान्तारितया श्रुता । भोजमात्रे चोक्ता । सा पुत्रमरणाद्बिभाय । राजापि कण्टिकागृहमगात् । सापि राजानं सचिन्तमालोक्यालापीत्–देव ! अद्य कथं म्लानवदनाः ? । " राजाऽऽह स्म–" किं क्रियते ? । विधिः कुपितः । पुत्रान्मे मृत्युर्ज्ञानिना दृष्टप्रत्ययशतेन

For Private And Personal

कथितः।" कण्टिका वदति स्म–"का चिन्ता। मारय पुत्रम्। सुतमपि निर्दलयन्ति राज्यलुब्धाः। सुतो न सुतः। सुतरूपेण शत्रुरेव सः।" तद्वचनाद्दुन्दुकः सुतं जिघांसामास। यावता घातयिष्यति तावता भोजमात्रा पाडलीपुरे स्वभ्रातॄणां शूराणां राज्यश्रीस्वयंवरमण्डपानां स्नेहलानां धर्मज्ञानामग्रे प्रच्छन्नलेखेन ज्ञापितं यथा–"एवमेवं भवतां भागिनेयो विनंक्ष्यति।" रुष्टो राजा। आगत्य एनं गृहीत्वागच्छत्। रक्षति जीववत्। मा स्माहं भवत्सु सत्सु निष्पुत्रोऽभूवम् इति। तेऽप्यागच्छन्, दुन्दुकमनमन्। उत्सवमिषेण भागिनेयं भोजं गृहीत्वा पाटलीपुत्रमगमन्। तत्र तमपीपठन्। अलीललन्। शस्त्राभ्यासमचीकरन्। जीववद्मंसत। तत्र तस्य पश्चाब्दी दिनैः कतिभिरप्यूनाऽतिक्रामति स्म। कण्टिका दुन्दुकाग्रे कथयति स्म–"देव! पुत्ररूपस्ते शत्रुर्मातृशाले वर्द्धते। नखच्छेद्यं पर्शुच्छेद्यं मा कुरु। अत्रानीय च्छन्नं यमसदनं नय।" राजाऽऽह–"सत्यमेतत्" ततो दूतमुखेन भोजं तन्मातुलेभ्योऽयाचीत्। ते भोजं नार्पयन्ति। पुनः पुनः स्वान्दूतान् दुन्दुकः प्रहिणोति। भोजमातुलाः प्राहुः–"राजन्! वयं तव भावं विद्मः। नार्पयाम एवैनम्। धर्मपात्रमसौ। अन्योऽपि शरणागतो रक्ष्यः क्षत्रियैः, किं पुनरीदृग् भगिनीपुत्रः?।" भोजोऽपि तैः पितुर्दुष्टत्वं ज्ञापितः कवचहरः उपापितृ नैति। ततो दुन्दुकेन बप्पभट्टिसूरयः प्रार्थिताः–"यूयं गत्वा भोजं सुतमनुनीयानयततमाम्।" अनिच्छन्तोऽपि तत्सैनिकैः सह पाटलीपुत्रं चेलुः। अर्द्धमार्गं सम्प्राप्तैः स्थित्वा विमृष्टं ज्ञानदृष्ट्या–"भोजस्ता

वन्मम वचसा नृपसमीपं नेष्यति। आनीयते वा यथा तथा। तदानीतोऽपि पित्रा हन्यते। वागुलंघने राजाऽपि क्रुद्धो मां हन्ति। तस्मादितो व्याघ्र इतो दुस्तटी इति न्यायः प्राप्तः। समाप्तं च ममायुः दिवसद्वयमवशिष्यते। तस्मादनशनं शरणम्।" इति विमृश्यासन्नस्थयतयो भाषिताः–"नन्नसूरिगोविन्दाचार्यौ प्रति हिता भवेत। श्रावकेभ्यो मिथ्यादुष्कृतं ब्रूयात्। परस्परममत्सरतामाद्रियेध्वम्। क्रियां पालयेत। आबालवृद्धान् लालयेत। न वयं युष्मदीयाः। न यूयमस्मदीयाः। सम्बन्धाः कृत्रिमाः सर्वे।" इति शिक्षयित्वाऽनशनस्थाः समतां प्रपन्नाः।

अर्हतस्त्रिजगद्वन्द्यान् सिद्धान् विध्वस्तबन्धनान्। साधूंश्च जैनधर्मं च प्रपद्ये शरणं त्रिधा ॥ १ ॥
महाव्रतानि पञ्चैव षष्ठकं रात्रिभोजनम्। विराधितानि यत्तत्र मिथ्या दुष्कृतमस्तु मे ॥ २ ॥

इति ब्रुवाणा आसीना अदीनाः कालमकार्षुः। श्रीबप्पभट्टिसूरीणां श्रीविक्रमादित्यादष्टशतवर्षेषु गतेषु भाद्रपदे शुक्लतृतीयायां रविदिने हस्तार्के जन्म, पञ्चनवत्यधिकेषु गतेषु स्वर्गारोहणम्। तदैव मोढेरे नन्नसूरिणामग्रे भारत्योक्तम्–" भवद्गुरव ईशानदेवलोकं गताः।" तत्र बाढं शोकं प्रससार।

शास्त्रज्ञाः सुवचस्विनो बहुजनाधारतामागताः
सद्वृत्ताः स्वपरोपकारनिरता दाक्षिण्यरत्नाकराः।

For Private And Personal

सर्वस्याभिमता गुणैः परिवृता भूमण्डनाः सज्जना
धातः ! किं न कृतास्त्वया गतधिया कल्पान्तदीर्घायुषः ॥१॥

वृद्धैस्तु प्रबोधो दत्तः—

हित्वा जीर्णमयं देहं लभते भो पुनर्नवम् । कृतपुण्यस्य मर्त्यस्य मृत्युरेव रसायनम् ॥२॥

इति । ढुन्ढुकेन सूरिभिः सह प्रहिता ये सैनिकास्ते निवृत्य ढुन्ढकपार्श्वं गताः । सो पश्चातापानलेन दन्दह्यते स्म । भोजेनापि समातुलेन सूरिशिष्याणामन्येषामपि लोकानां मुखादवगतं यथा—" सूरयो मम्रुः । तव पार्श्वं नाजग्मुः । मा स्मायमस्मदुपरोधसंकटे पतितः पितुः पार्श्वं गतः सन् म्रियत इति कृपां दधुः । " तदेतदाकर्ण्य भोजस्तथा पीडितो यथा वज्रपातेनापि न पीड्यते । पितुरन्तिकं नागादसौ । एकदा मालिकः कोऽपि पूर्वमामराजभृत्यो विदेशं भ्रान्त्वा भोजान्तिकमागतः पाटलिपुरे । तेनोक्तम्—" देव ! त्वं मत्स्वामिकुलप्रदीपः । मया विदेशे सद्गुरोर्मुखाद्विद्यैका लब्धा मातुलिङ्गी नाम । ययाऽभिमन्त्रितेन मातुलिङ्गेन हताः करिहरिप्राया अपि बलिनो म्रियन्ते । मानवानां तु का कथा । देव! गृहाण ताम् । " भोजेन सा तस्मादात्ता । प्रमाणिता । सत्या । मालिको दानमानाभ्यां भोजेन रञ्जितः । मातुलाः सर्वे भोजेन विद्याशक्तिं प्रकाश्य तोषिताः । ते ऊचुः—" यदि इयं ते शक्तिस्तदा प्राभृतमिषेण मातुलिङ्गानि गृहीत्वाऽस्माभिः सह पितुः

समीपं व्रज। पितरं निपात्य राज्यं गृहाण।" तत् रुरुचे भोजाय। चलितो बहुमातुलिङ्गशोभी सन् गतः पितुर्द्वारम्। कथापितं च–"तात! त्वं पूज्योऽहं शिशुः। त्वत्तो मरणं वा राज्यं वा सर्वं रम्यं मे।" राजा संतुष्टः। अहो विनीतः सुतः। आयातु। इति विमृश्य आहूतो भोजः। शोधितो मध्यमागतः। एकासनस्थौ कण्टिकाराजानौ पृथक्पृथग्मातुलिङ्गेन जघान। सम्यग्विद्या हि नान्यथा। उपविष्टो दुन्दुकराज्ये भोजः। तन्मातुला अतुलं तोषं दधुः। माता पद्मा प्रससाद। दुन्दुकेन धनहरणेन ग्रासोद्दालनादिदूनचरा राजन्यकाः पुनर्जातमात्मानं मेनिरे। महाजनो जिजीव। वर्णाः सर्वे उन्मेदुः। संसारसरोऽम्भोजं भोजं कमला भेजे। दोर्बलात्परिच्छदबलाच्च जगज्जिगाय। अथ कृतज्ञतया मोढेरपुरे नन्नसूरये विज्ञप्तिं दत्त्वा उत्तमनरान्प्रैषीत्। ते गतास्तत्र। विज्ञप्तिर्दर्शिता तैस्तत्र। वाचिता नन्नसूरिगोविन्दाचार्यैर्यथा–"स्वस्ति श्रीमोढेरे परमगुरु-श्रीनन्नसूरिश्रीगोविन्दसूरिपादान् सगच्छान् गोपगिरिदुर्गात् श्रीभोजः परमजैनो विज्ञपयति यथा–"इह तावत्प्रज्ञागङ्गाहेमाद्रयः समाचारीनारीसौभाग्यवर्द्धनमकरध्वजाः क्षितिपतिसदःकुमुदिनीश्वेतदीधितयो भारतीधर्मपुत्राः श्रीबप्पभट्टिसूरयस्त्रिदिवलोकलोचनलेह्यललितपुण्यलावण्यत्तामादध्रिरे। तत्स्थाने सम्प्रति दीर्घायुषो यूयं स्थ। दृष्टविज्ञप्तिकाप्रमाणेनात्र पादोऽवधार्यः।" तद् दृष्ट्वा भक्तिरहस्यं सूरयः ससंघाः सुतरां जहृषुः। संघानुमत्या गोविन्दाचार्यं मोढेरके मुक्त्वा श्रीनन्नसूरयो गोपगिरिमसरन्। भोजः पादचारेण

For Private And Personal

ससैन्यः संमुखमायातः । गुरोः पादोदकं पपौ । उल्लसत्तृष्णो गिरं शुश्राव । स्थानस्थानमिलितजनहृदयसंघट्टचूरितहारमौक्तिकधवलितराजपथं पुरं निनाय । सिंहासने निवेशयामास तान् । मङ्गलं चकार । तदाऽऽज्ञामयो बभूव । तद्भक्तानात्मवद्ददर्श । तद्भक्तान् विषवदीक्षांचक्रे । तदुपदेशाज्जिनमण्डितां मेदिनीं विदधौ । दुन्दुकस्य तादृग् मरणं स्मृत्वा कुपथेषु न रेमे । मथुराशत्रुञ्जयादिषु यात्राश्चकार । एकादश व्रतानुचचार । पूर्वराजर्षियशांसि उद्धार । चिरं राज्यं भेजे । इत्येवं गोपगिरौ भोजो धर्मं लालयामास उदियाय च । अन्यैरपि पुण्यपुरुषैरेवं भाव्यम् ॥

॥ इति श्रीबप्पभट्टिचरित्रम् । ग्रन्थाग्रं ६०० ॥

(१०)

अथ श्रीहेमसूरीणां प्रबन्धः—

पूर्णतल्लगच्छे श्रीदत्तसूरिः प्राज्ञः वागडदेशे वटपद्रं पुरं गतः । तत्र स्वामी यशोभद्रनामा राणकः ऋद्धिमान् । तत्सौधान्तिके उपाश्रयः श्राद्धैर्दत्तः । रात्रौ उन्मुद्रचन्द्रातपायां राणकेन ऋषयो दृष्टा उपाश्रये निषण्णाः । श्रावकामात्यपार्श्वे पृष्टम्—“ के एते ? ” अमात्यः प्रोचे—“ देव ! महामुनयोऽमी विषमव्रतधारिणः । राणक-

स्य श्रद्धा बभूव। प्रातर् वन्दितुं गतः। देशना। श्रावकत्वं सुष्ठु सम्पन्नम्। मासकल्पमेकं स्थिताः। परदेशं गता गुरवः। तावता वर्षाकालः। देवपूजादिधर्मव्यापारसाराण्यहानि गमयति राणः। प्राप्ता शरद्। चरिक्षेत्राणि द्रष्टुं गतो राणः। तावता बुण्टानि ज्वालयन्ति भृत्याः। तेषु सर्पिण्येका गर्भभारालसा ज्वालादिभिर्दह्यमाना तडफडायमाना सिमिसिमायमाना राणेन दृष्टा। दयोत्पन्ना, विरक्तश्च। हा ! हा ! संसारं, धिग् गृहवासं, कस्य कृते पापमिदमाचर्यते। राज्यमपि दुष्पालं मायाजालं नरकफलम्। तस्मात्सर्वसङ्गपरित्यागः कार्यः। इति ध्यायन्सौधमायासीत्। निशि श्रावकमन्त्रिणमाकार्य रहोऽप्राक्षीत्–"मम धर्मगुरवः श्रीदत्तसूरयः क्व विहरन्ति ?।" मन्त्र्याह–"डिण्डुआणके" विसृष्टो मन्त्री शेषपरिच्छदश्च। राणको मिताश्वपरिवारः सारं हारमेकं गृहीत्वा शीघ्रं डिण्डुआणकं प्राप्तः। गुरवो दृष्टा वन्दिताः। भववैराग्याद्रुदितः। पदोर्लगित्वा कथितं स्वपापम्। गुरुभिर्भणितम्–"राणक ! चारित्रं विना न छुटन्ति पापेभ्यो जीवाः।" राणकेन न्यगादि–"सद्यो दीयतां तर्हि तत्।" सूरय ॐ इत्याहुः स्म। राणकेन डिंडुआणकीयश्रावकाः समाकारिताः। हारोऽर्पितः। दिव्यः प्रासादः कार्यतामिति। तथाऽऽचरितं तैः। अद्यापि दृश्यते स तत्र। राणकैर्व्रतमात्तम्। नन्द्यामेव षड्विकृतिनियमः एकान्तरोपवासा यावज्जीवम्। तस्य राणयशोभद्रस्य गीतार्थत्वात्सूरिपदं जातम्। 'श्रीयशोभद्रसूरिः' इति नाम। तदीयपट्टे प्रद्युम्नसूरिर्ग्रन्थकारः। तत्पदे श्री-

For Private And Personal

गुणसेनसूरिः । श्रीयशोभद्रसूरिपादास्त्रयोदशोपवासा रैवते नेमिनाथदृष्टौ कृतानशनाः स्वर्लोकमैयरुः । गुणसेनसूरिपट्टे श्रीदेवचन्द्रसूरयः ठाणांगवृत्ति-शान्तिनाथचरितादिमहाशास्त्रकरणनिर्व्यूढप्रज्ञाप्राग्भाराः । ते विहरन्तो धन्धुकपुरं गूर्जरधरासुराष्ट्रासन्धिस्थं गताः । तत्र देशनाविस्तरः । एकदा नेमिनागनामा श्रावकः समुत्थाय श्रीदेवचन्द्रसूरीन् जगौ–" भगवन् ! अयं मोढज्ञातीयो मद्भगिनीपाहिणिकुक्षिभूः ठक्करचाचिगनन्दनश्चङ्गदेवनामा भवतां देशनां श्रुत्वा प्रबुद्धो दीक्षां याचते। अस्मिंश्च गर्भस्थे मम भागिन्या सहकारतरुः दृष्टः । स च स्थानान्तरे उप्तस्तत्र महतीं फलस्फातिमायाति स्म । " गुरव आहुः–" स्थानान्तरगतस्यास्य महिमा प्रैधिष्यते । महत्पात्रमसौ योग्यः सुलक्षणो दीक्षणीयः। केवलं पित्रोरनुज्ञा ग्राह्या।" गतौ मातुलभागिनेयौ पाहिणिचाचिगान्तिकम् । उक्ता व्रतवासना । कृतस्ताभ्यां प्रतिषेधः करुणवचनशतैः । चाङ्गदेवो दीक्षां ललौ । स श्रीहेमसूरिः प्रभुः । तेन यथा श्रीसिद्धराजो रञ्जितः, व्याकरणं कृतम्, वादिनो जीताः । यथा च कुमारपालेन सह प्रतिपन्नम् । कुमारपालोऽपि यथा पञ्चाशद्वर्षदेशीयो राज्ये निषण्णः । यथा हेमसूरयो गुरुत्वेन प्रतिपन्नाः । तैरपि यथा देवबोधिः प्रतिपक्षः पराकृतः । राजा सम्यक्त्वं ग्राहितः श्रावकः कृतः । निर्वीराधनं च मुमोच सः । तत्प्रबन्धश्चिन्तामणितो ज्ञेयम् । किं चर्वितचर्वणेन ? । नवीनास्तु केचन प्रबन्धाः प्रकाश्यन्ते–कुमारपालेन अमारौ प्रारब्धायां आश्विनशुदिपक्षः समागात् । देवतानां कण्टेश्वरीप्रमुखाणां

अबोटिकैर्नृपो विज्ञप्तः-" देव ! सप्तम्यां सप्तशतानि पशवः सप्त महिषाः, अष्टम्यां अष्ट महिषा अष्टौ शतानि पशवः, नवम्यां तु नवशतानि पशवो नव महिषाः, देवीभ्यो राज्ञा देया भवन्ति पूर्वपुरुषक्रमात् ।" राजा तदाकर्ण्य श्रीहेमान्तिकमगमत् । कथिता सा वार्ता । श्रीप्रभुभिः कर्णे एवमेवमित्युक्तम् । राजोत्थितः। भाषितास्ते-" देयं दास्यामः ।" इत्युक्त्वा बहिकाक्रमेण रात्रौ देवीसदने क्षिप्ताः पशवः । तालकानि दृढी- कृतानि । उपवेशितास्तेषु प्रभूता आप्तराजपुत्राः । प्रातरायातो नृपेन्द्रः । उद्घाटितानि देवीसदनद्वाराणि । मध्ये दृष्टाः पशवो रोमन्थायमाना निर्वातशय्यासुस्थाः । भूपालो जगाद-" भो अबोटिकाः ! एते पशवो मयाऽमूभ्यो दत्ताः । यदि अमूभ्यो रोचिष्यन्ते ते तदा ग्रसिष्यन्ते । परं न ग्रस्ताः । तस्मान्नामूभ्योऽदः पललं रुचितम् । भवद्भ्य एव रुचितम् । तस्मात्तूष्णीमाध्वम् । नाहं जीवान् घातयामि । स्थितास्ते विलक्षाः । मुक्ताश्छागाः । छागमूल्यसमेन तु धनेन देवेभ्यो नैवेद्यानि दापितानि । अथाश्विनशुक्लदशम्यां कृतोपवासः क्ष्मापो निशि चन्द्रशालायां ध्याने उपविष्टो जपति । बहिर्द्वास्थाः सन्ति । गता बह्वी निशा । स्त्र्येका दिव्या प्रत्यक्षाऽऽसीत् । उक्तस्तया सः-" राजन् ! अहं तव कुलदेवी कण्टेश्वरी । किमिति त्वया नास्मदेयं दत्तम् ? ।" राज्ञोक्तम्-" जैनोऽहं दयालुः पिपीलिकामपि न हन्मि । का कथा पञ्चेन्द्रियाणाम् ? ।" तच्छ्रुत्वा कण्टेश्वरी क्रुद्धा राजेन्द्रं त्रिशूलेन शिरसि हत्वा जग्मुषी । राजा कुष्टी जातः । दृष्टं स्ववपुर्विनष्टम् । विषण्णः । भृत्येन

For Private And Personal

मन्त्रिणमुदयनमाकार्य तत्स्वरूपं निगद्य पप्रच्छ–" मन्त्रिन्! देवी पशून्याचति। दीयन्ते नवा।" मन्त्री दाक्षिण्यादाह–" देव! राजा यत्नेन रक्ष्य एव।" भूपो न्यगादीत्–" निःसत्त्वो वणिगासि। यदेवं ब्रूषे। मम किं कार्यं जीवितेन?। कृतं राज्यम्। लब्धो धर्मः। हताः शत्रवः। केवलं काष्टानि देहि रहः। येन प्रातर्मामीदृशं दृष्ट्वा लोको धर्मे नोड्डाहं करोति। उदयनेन चिन्तितम्–" अहो! महत्कृच्छ्रमापतितम्। पारवश्यमूलं नियोगं धिक्।" मन्त्रिणोक्तं सद्यो बुद्धिवशात्–" श्रीहेमसूरयो विज्ञप्यन्ते।" राज्ञोक्तम्–" तथाऽस्तु।" गतो मन्त्री उपसूरि। सूरिभिर्जलमभिमन्त्र्यार्पितम्। अनेन राजाऽऽच्छोट्य इति। सचिवेन तथा चक्रे राज्ञः। राजा दोगुन्दुकदेव इव दिव्यरूपः सम्पन्नो भक्तश्च समधिकं श्रीगुरुं वन्दितुं ययौ। गुरुर्देशनां दत्ते—

शूराः सन्ति सहस्रशः प्रतिपदं विद्याविदोऽनेकशः
सन्ति श्रीपतयो निरस्तधनदास्तेऽपि क्षितौ भूरिशः।
किन्त्वाकर्ण्य निरीक्ष्य वाऽन्यमनुजं दुःखार्दितं यन्मन-
स्तद्रूपं प्रतिपद्यते जगति ते सत्पूरुषाः पञ्चषाः॥ १॥

राजा स्वावासं गतः। राज्यं समृद्धं भुनक्ति। एकदा प्रभुभिर्भरतस्य चक्रिणः साधर्मिकवात्सल्यकथाऽकथि। तां श्रुत्वा भूपः साधर्मिकवात्सल्यं दिव्यभोजनवसनकनकदानैः प्रतिग्रामं प्रतिपुरं प्रारेभे। तद्

दृष्ट्वा कवि श्रीपालपुत्रः सिद्धपालः सूक्तमपाठीत्—

क्षिप्त्वा वारिनिधिस्तले मणिगणं रत्नोत्करं रोहणो
रेण्वावृत्य सुवर्णमात्मनि दृढं बद्ध्वा सुवर्णाचलः ।
क्ष्मामध्ये च धनं निधाय धनदो बिभ्यत्परेभ्यः स्थितः
किं स्यात्तैः कृपणैः समोऽयमखिलार्थिभ्यः स्वमर्थं ददत् ॥ १ ॥

द्रमलक्षदत्तिरत्र । पुनः कदाचित्पाठितम्—

श्रीवीरे परमेश्वरेऽपि भगवत्याख्याति धर्मं स्वयं
प्रज्ञावत्यभयेऽपि मन्त्रिणि न यां कर्तुं क्षमः श्रेणिकः ।
अक्लेशेन कुमारपालनृपतिस्तां जीवरक्षां व्यधात्
यस्यास्वाद्य वचःसुधां स परमः श्रीहेमचन्द्रः गुरुः ॥ १ ॥

अत्रापि लक्षदत्तिः । अन्येद्युः कथाप्रसङ्गे प्रभवः प्राहुः स्म—" पूर्वं श्रीभरतो राजा श्रीमालपुरे नगरपुरे शत्रुञ्जये सोपारकेऽष्टापदे च जीवतस्वामिश्रीऋषभप्रतिमाश्चतुरङ्गचमूचक्रोच्छलितरजःपुञ्जध्यामलितदिक्-चक्रवालः संघपतिर्भूत्वा ववन्दे । " तदाकर्ण्य श्रीचौलुक्यः स्वयं कारितरथेऽर्हद्बिम्बमारोप्य ससैन्यः शत्रु-

अथोज्जयन्तादियात्रायै चचाल । संघे उदयनसुतो वाग्भटश्चतुर्विंशतिमहाप्रासादकारापकः, नृपनागाख्य-श्रेष्ठिभूः श्रीमान् आम्भडः, षट्भाषाकविचक्रवर्ती श्रीपालः, तद्भूः सिद्धपालः, कवीनां दातॄणां च धुर्यो भाण्डागारिकः कपर्दी, परमारवंश्यः कूर्चालसरस्वती प्रह्लादनपुरनिवेशको राणः प्रह्लादनः, राजेन्द्रदौहित्रः प्रतापमल्लो, नवतिलक्षहेमस्वामी श्रेष्ठिछाडाकः, राज्ञी भोपलदेवी, चौलुक्यपुत्री लीलूः, राणअम्बडमाता माऊः, आम्भडपुत्री चाम्पलदे, इत्यादि कोटीश्वरो लोकः; श्रीहेमचन्द्रसूरिपादाः, श्रीदेवसूरयः, श्रीधर्मसूरयः, लक्षसंख्या मानवाः । स्थाने स्थाने प्रभावना । जिने जिने छत्रचामरादिदानम् । पात्राणां इच्छासिद्धिः । प्रथमं रैवताद्रितले सांकलीयालीपद्या दिशि गत्वा स्थितः क्षितिपतिः । नान्दीनिर्घोषः । रात्रौ भारत्या श्रीहेमसूरिभ्य आदिष्टम्–" राज्ञा नाद्रावारोढव्यं विघ्नसंभवात् । अत्रैव देवो मदनसूदनो नेमिर्वन्द्यः । " तथैव कृतम् । संघस्तु रैवतगिरौ श्रीनेमिस्नानविलेपनपुष्पफलवस्त्रपूजानैवेद्यनाद्मालादिग्रहणैर्भावमपूरि । राजाप्यक्षवाटकवस्त्रापथराजिमत्या गुहाप्रायस्थानयात्रया महादानैश्च धनजीवितव्ययोर्लाभमग्रहीत् । देव-पत्तने चन्द्रप्रभयात्रा ससंघस्यास्यासीत् । ततो व्याघुट्य शत्रुञ्जयाद्रिं गतः । आरूढः । मरुदेवादर्शनपूजे । तत्राशीः—

बालो मे वृषभो भरं सुमनसामप्येष किं सासहि-
मदन्धे हि किरिटमस्य करयोर्मा काङ्कणी भूद्यथा ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

गाङ्गेयं कटिसूत्रमत्र तनुकं युक्तं बलिष्ठेऽप्यमू-
नाथे मातृदयागिरः सुरजने हास्यावहाः पान्तु वः ॥ १ ॥

पुरः कपर्दी तत्र कायोत्सर्गः । आशीस्तु—

रूढिः किलैवं वृषभः कपर्दिनं निषेवतेऽस्मिन्विमलाचले पुनः ।
अयं कपर्दी वृषभं शुभाशयस्तनोतु वः शान्तिकपौष्टिकश्रियम् ॥ १ ॥

पुरो वृषभप्रभुप्रासादः । देवदर्शनं पूजा । आशीर्वादः—

नव्योद्वाहविधौ वधूद्वययुतं पुत्रं सवित्रीरति-
प्रीत्यासन्नमिव स्मरः किल ददौ यं वीक्ष्य सत्याशिषम् ।
कल्पद्रुर्भुवि जङ्गमः किमधुना पत्रद्वयेनोद्गत-
स्तत्त्वं स्याः शतशाख इत्यनुदिनं स श्रेयसे नाभिभूः ॥ १ ॥

चैत्यपरिपाट्यां कपर्द्याह—

श्रीचौलुक्य स दक्षिणस्तव करः पूर्वं समासूत्रितः
प्राणिप्राणविघातपातकसखः शुद्धो जिनेन्द्रार्चनात् ।

For Private And Personal

वामोऽप्येष तथैव पातकसखः शुद्धिं कथं प्राप्नुयात्
न स्पृशेत करेण येद्यतिपतेः श्रीहेमचन्द्रप्रभोः ॥ २ ॥

मेरुमहाध्वजावारितान्नदानयाचकसत्कारा: प्रवर्त्तन्ते। मालोद्घट्टनप्रस्तावे तादृशि संघे राज्ञि च निषण्णे मह‍ं वाग्भटः प्रथमं लक्षचतुष्कमवदत्। प्रच्छन्नधार्मिकः कश्चित्कथापयति-"लक्षाष्टौ।" एवमन्योऽन्येष्वीश्वरेषु वर्द्धयत्सु कश्चित्सपादकोटीं चकार। राजाऽपि चमुच्चकार। उवाच च-"उत्थाप्यतां स यो गृह्णाति।" उत्थितः सः। यावद् दृश्यते तावद्द्वादरमलिनवसनो वणिग्रूपः। राज्ञा वाग्भटो भाषितः-"द्रम्मसुस्थंकृत्वा देहि।" वाग्भटो वणिजा सहोत्थाय पादुकान्तिकं गत्वा द्रम्मसुस्थं प्रपच्छ तम्। वणिजा सपादकोटिमूल्यं माणिक्यं दर्शितम्। मन्त्रिणा पृष्टम्-"कुत इदं ते।" वणिगाह-"महूअकवास्तव्यो मत्पिता हंसाख्यः सौराष्ट्रिकः प्राग्वाटः। अहं तद्भूर्जगडः। माता मे धारुः। मम पित्रा निधनसमयेऽहं भाषितः-"वत्स! चिरं कृता प्रवहणयात्राः फलिताश्च। मेलितं धनम्। तेन च क्रीतं प्रत्येकं सपादकोटिमूल्यं माणिक्यपञ्चकम्। अधुना प्रभुवृषभचरणौ शरणं मे। अनशनं प्रतिपन्नम्। क्षामिताः सर्वे जीवाः। एकं माणिक्यं श्रीऋषभाय, एकं श्रीनेमिनाथाय, एकं श्रीचन्द्रप्रभाय दद्याः माणिक्यद्वयमात्मनोऽन्तर्धनं दध्याः। बाह्यधनमपि प्रचुरतरमास्ते।" इदानीं माता मया सहानीता कपर्द्दिभवने मुक्ताऽस्ति। तां जरन्तीमा-

तरं सर्वतीर्थाधिकतया पुराणपुरुषैर्निवेदितामेतां मालां परिधापयिष्यामि। श्रुत्वा हृष्टो मन्त्री राजा संघश्च। मातृसंमुखगमनं सर्वश्रावकाणां मालापरिधापनम्। तन्माणिक्यं हेम्ना खचित्वा ऋषभाय कण्ठाभरणमनुष्णाकिरणभरितचैत्यगर्भमासूत्रयामहे। वलितः संघः प्राप्तः पत्तनम्। प्रवर्त्तन्ते संघभोज्यानि प्रतिलाभनाश्च। अमारिस्तु नित्यैव। तस्य च कुमारपालदेवस्य भग्नी शाकम्भरीश्वरेण चाहमानवंश्येन राज्ञा आनाकेन परिणिताऽस्ति। एकदा तौ सारिभिः क्रीडतः। क्रीडता राज्ञा सारिगृहे मुञ्चतोक्तम्–"मारय मुण्डिकान् पुनर्मारय मुण्डिकान्।" एवं द्विस्त्रिः। टोपिकारहितशीर्षकत्वान्मुण्डिका गूर्ज्जरलोका विवक्षिताः अथवा श्वेताम्बरा गूर्जरेन्द्रगुरवो मुण्डिका इति हासगर्भोक्तिः। राज्ञी कुपिता वदति–"रे जङ्गडक! जिह्वामालोच्य नोच्यते? किं वक्षि?। न पश्यसि माम्। न जानासि मम भ्रातरं राजराक्षसम्।" क्रुद्धो राजा तां पदा जघान। साप्याह–"यदि ते जिह्वां अवटपथेन कर्षयामि तदा राजपुत्रीं माममंस्थाः।" इति वदन्त्येव सा ससैन्या निर्विलम्बं श्रीपत्तनमेत्य चौलुक्याय तं परिभवं प्रतिज्ञां च स्वोपज्ञमजिज्ञपत्। चौलुक्योऽभाषत–"इत्थमेव करिष्यामः कौतुकं पश्येः।" ततश्चानकस्तस्यां तत्र गतायां गूर्ज्जरनृपतेजो दुर्द्धरं विदंश्चुक्षोभ। चौलुक्योऽपि बह्वाप्तपरिच्छदं मन्त्रिणमेकं तत्रत्यवृतान्तज्ञानाय प्रैषीत्। गतः स तत्र। जग्राह गृहम्। राजासन्नदासीमेकां धनेन रञ्जयित्वा आत्मीयं भोगपात्रमकरोत्। नित्यं सा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

याममात्र्यां रात्र्यामायाति रञ्जयति तम् । एकदा निशीथे साऽऽगात् । मन्त्री कुपितः–" आः पापे ! परनृगामिनि ! किमिति विलम्बेन समागतासि ? । " सापि सप्रश्रयं मन्त्रिणमभाषत–" स्वामिन् ! मा कुप । कारणेन स्थिताऽस्मि । " मन्त्रिणोचे–" किं कारणम् ? । " सा जगाद–" प्रभो ! अहं राज्ञस्ताम्बूलदासी । रात्रेर्यामे एकस्मिन् राज्ञा परिच्छदः सर्वो विसृष्टः । अहमपि विसृष्टा । विसृजता चाप्तनर एकोऽभाषि–" व्याघ्रराजं हक्कारय । " अहं स्तम्भान्तरिता कौतुकेन स्थिता । को व्याघ्रराजः ? । कथमाहूयते ? इति । ततो राज्ञाऽऽकारितः स आगतः कृतप्रणामः सन् राज्ञाऽऽलापि–" भो ! विजनमस्ति इति भाष्यसे । त्वमस्माकं कुलक्रमागतः सेवकः । सद्यो व्रज । गूर्जरेश्वरघातको भूत्वा व्यापादय । लक्षत्रयं हेम्नां दास्ये । " अथ स व्याघ्रराजाख्यो बभाषे–" देव ! हनिष्याम्येव तं राजानम् । मा स्म संशयं कृथाः स्वामिन् ! । " ततस्तद्वचः श्रुत्वा तुष्टः शाकम्भरीश्वरः सद्यो हेमलक्षत्रयबद्रकांस्तद्गृहायाचीचलत् । व्याघ्रराजं चाप्राक्षीत्–" कदा केनोपायेन तं हनिष्यसि ? । " व्याघ्रराजोऽवादीत्–" नाथ ! अद्य रविवारो वर्त्तते । आगन्तुकामे सोमवारे क्वचनावसरं लब्ध्वा हनिष्यामि । उपायस्तु भरटकरूपं करिष्यामि । राजा तु कर्णमेरुप्रासादे आयाति सोमवारे ध्रुवम् । देवं नत्वा व्यावर्त्तमानायास्मै बाह्याङ्गणे शेषादानमिषेण पुष्पकलंबकमुत्पाटयिष्यामि । तत्र धृतया कर्तिकया कङ्कमय्या घातयिष्यामि । अङ्गीकृतसाहसानां न किञ्चिदपि दुष्करम् । अहं

हतश्चेत्तत्र तदा मन्मानुषाणामुपरि कृपा करणीया । उद्धृतश्चेदहं तदा जितं जितम् । " एवं व्याघ्रराजेन निगदिते आनाकेन बीटकं दत्तम् । विसृष्टोऽसौ । तत्सर्वं सावधानतया स्तम्भान्तरितया मया श्रुतम् । राज्ञि शुद्धान्ते गतेऽहं त्वदंह्रिसेवार्थमायाता । तस्मान्मा मनो मयि क्रोधकश्मलितं कार्षीः । एतद्दासीवचः श्रुत्वा चौलुक्यनियोगी चिन्तयति–" लब्धं शत्रुगृहमर्म । यतिष्येऽतः कार्यकरणाय । " इति परामृशन् दासीमभाषत–" याहि मृषा भाषिणि ! । कः स्त्रीवचसि विश्वासः ।

श्रूयते यन्न शास्त्रेषु यल्लोकेऽपि न दृश्यते । तत्कल्पयन्ति लोलाक्ष्यो जल्पन्ति स्थापयन्ति च ॥ १ ॥ "

इत्यादि भाषित्वा तां व्यसाक्षीत् । स्वयं तु चतुरांश्चतुरो यामालिकानुपचौलुक्यं प्रास्थापयत् । विज्ञप्त्या चाज्ञापयत्–" सावधानैः स्थेयम् । इत्थं इत्थं स्वामिपादानामुपरि शत्रुकृतं कपटं वर्त्तते । भरटकश्चिन्तनीयः।" चौलुक्यः सावधानस्तस्थौ । सोमवारे गतो राजा कर्णमेरुम् । प्रकटीभूतः पूर्वोक्तचेष्टया भरटकः । दृष्टमात्रमेव तं नृपो मल्लैरदीधरत् । कर्तिका च लब्धा । बद्धो व्याघ्रराजः । जल्पितश्च–" रे वराक ! जंगडकेन प्रेषितोऽसि ? । सेवकस्त्वम् । सेवकस्य च हिताहितविचारो नास्ति । स्वाम्यादेशवशंवदस्त्वं माभैः । मुक्तोऽसि । तमेव हनिष्यामि य एवं द्रोहमारचयति दुर्दुरूढः ।" इत्युक्त्वा परिधाप्य व्यसृजत् । स्वयं तु सौधे गत्वा सामग्रीं

For Private And Personal

यौद्धीं व्यररचत्। पार्ष्णिरक्षां विधिवद्विधाय चलितः। सपादलक्षान्प्रविष्ट। भट्टेन आनाकनरेन्द्रमालीलपत्। यथा—

अये! भेक च्छेको भव भवतु ते कूपकुहरं शरण्यं दुर्मत्तः किमु रटसि वाचाट कटुकम्।
पुरः सर्पो दर्पी विषमविषफूत्कारवदनो ललज्जिह्वो धावत्यहह भवतो जिग्रसिषया॥ १॥

आनकोऽपि तदुद्दामशौण्डीर्यरिपुदूतवचः श्रुत्वा लक्षत्रयाश्वेन नरलक्षदशकेन पञ्चाशता च मदान्धैर्गन्धगजैरचलत्। शाकम्भरीतः पञ्चक्रोश्यार्वागागतः। दिनत्रयेण युद्धं भविष्यतीति निर्णीतमुभाभ्यां राजेन्द्राभ्याम्। अन्योऽन्यमक्षान्दीव्यन्ति राजपुत्राः। योधयन्ति मल्लयोध–च्छुरीकार–मेष–वृषभ–महिष–गजान्। स्फोटयन्ति नालिकेराणि। तावन्तमवकाशं लब्ध्वा सपादलक्षक्ष्मापालेन निशि द्रव्यबलेन नड्डूलीयकेल्हणादयो राजकीयाश्चौलुक्यभक्ता भेदिताः स्वपक्षे कृताः। सर्वेषामेको मन्त्रः–"युद्धाय संनद्धव्यमेव न तु योद्धव्यम्। राजा चौलुक्य एकाकी मोचनीयः। शत्रुभिर्हन्यताम्।" अर्थो हि परावर्त्तयति त्रिभुवनम्—

दधाति लोभ एवैको रङ्गाचार्येषु धुर्यताम्। आरङ्कशक्रं यन्नाद्य पात्राणि भुवनत्रयी॥ १॥

एनं च तेषां मन्त्रं चौलुक्योऽद्यापि न वेत्ति। अतः प्रातः राजा कुमारपालः कलहपञ्चाननं पट्टहस्तिनं महामात्रश्यामलपार्श्वात्प्रेरयामास। तदस्थांस्तु चेष्टितैर्दुष्टान्निरणैषीत्। नृपेण गदितः श्यामलः–"किमर्थममी

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

उदासीना इव दृश्यन्ते ?।" श्यामलेन विज्ञप्तम्–" देव ! अरिक्तार्थदानादमी त्वयि द्रोहपराः सम्पन्नाः।" राजाऽऽह–" तर्हि तव का चेष्टा ?।" श्यामलोऽप्याललाप–" देव ! एको देवः १ अपरोऽहम् २ अन्यस्तु कलहपञ्चाननो हस्ती ३ एते त्रयः कदापि न परावर्त्स्यन्ते।" नृपो वदति–" तर्हि संमुखीने दृश्यमाने शत्रुनृपमुद्गरघट्टे गजं प्रेरय।

खेडिम खूंटाटालि खूंटा विण खींखइ नही। दैवहतणइ कपालि साहस जुत्तइ हलवलइ ॥ १ ॥

तदैव चारण एको न्यगादीत्—

"कुमारपाल मन चिंत करि चिंतिइ किंपि न होइ। जिणि तुहु रज्ज सम्मप्पिउ चिंतकरे सइ सोइ ॥१॥"

तत्तदीयं वचः श्रुत्वा सुशब्दं मन्यमानः पुरस्थे महाघट्टेऽविशत्। नरसहस्रेण सह भञ्जन् घ्नन् गतो गजारूढः कुमारपाल आनाकगजान्तिके। आस्फालितो गजो गजेन। लग्नः करः करेण। आस्फालितौ दन्तौ दन्ताभ्याम्। एकदेहत्वमिव द्वयोरिभयोरभूत्। प्रवृत्तं युद्धं नाराचैः। द्वावपि बलिष्ठौ महोत्साहौ राजेभौ। तथापि कलहपञ्चाननश्चीत्कारान्मुञ्चन् पुनः पुनः पश्चान्निवर्त्तते। तदा चौलुक्येन श्यामल ऊचे— "कथमयं निवर्त्तते ?।" श्यामलो गदति स्म"–स्वामिन्! श्रीजयसिंहदेवे विपन्ने ३० दिनानि पादुकाभ्यां राज्यं कृतम्। मालवीयराजपुत्रेण चाहडकुमारेण राज्यं प्रधानपार्श्वे याचितम्। प्रधानैस्तु परवंशत्वान्न दत्तम्।

For Private And Personal

ततो हृष्टवा चाहड आनाकसेवकः संजातः। स भगदत्तनृपवन्महामात्रधुर्यः, अतुलबलः। तस्य सिंहनादेन कलहपञ्चाननः क्षुभ्यन् पश्चान्निवर्तते। किमत्र क्रियते ? न विघ्नः। चौलुक्यस्तदाकर्ण्य द्विपटीं विदार्य फालिकद्वयेन द्वौ गजकर्णौ पूरयामास। ततश्चाहडसिंहनादमशृण्वन् कलहपञ्चाननः स्थिरतरः गिरिवत्। वर्त्तते षट्त्रिंशदायुधैर्युद्धम्। चमत्कृते द्वेऽपि सैन्ये। उदासीनतया प्रथमस्थिताश्चौलुक्यीयाश्चकम्पिरे भयेन। अहो! एकाङ्गमात्रस्यापि कुमारदेवस्याऽसमसमरसम्पल्लम्पटत्वम्। सैन्ययोर्युद्धमपि निवृत्तम्। तावेव युध्येते। अत्रान्तरे चौलुक्यो विद्युदुत्क्षिप्तकरणं दत्त्वा आनाकगजपतिस्कन्धमारूढः। क्षिप्तौ भुजौ राजोपरि। कसणकानि छुरिकया च्छित्त्वा आनकं सढं चक्रं च भूमौ पातयित्वा योक्तृबन्धं क्षिप्त्वा हृदि पादं दत्त्वा छुरीं कराग्रे ग्रहीत्वा अवादीत्–"रे वाचाट ! मूढ ! निर्धर्मन् ! पिशाच ! स्मरसि मद्भगिन्यग्रे 'मारय मुण्डिकान्' इति वदिष्यसि। पूरयामि निजभगिनीप्रतिज्ञाम्। छिनद्मि ते दुर्वाक्पङ्कदूषितां जिह्वाम्।" इत्येवं वदति कृतान्तदुष्प्रेक्षे चौलुक्ये सपादलक्षीयः किञ्चिन्नाचख्यौ। केवलं तरलतारकाभ्यां चक्षुर्भ्यामद्राक्षीत्। चौलुक्योऽप्युत्पन्नलोकोत्तरकरुणापरिणामः प्राभाणीत्–"रे जाल्म! मुक्तोऽसि न भगिनीपतित्वेन किन्तु कृपापात्रत्वेन। पूर्वं तव देशे टोपीबन्धेऽग्रभागे जिह्विके आसाताम्। कसाया जिह्वेति संज्ञा। अतः परं जिह्वाबन्धः पश्चात्करणीयः। अवटोर्जिह्वाकर्षणप्रतिज्ञासिद्धिसूचकत्वात्।" एवं श्रुते तथेति प्रतिपेदे आनकः। 'बलवद्भिः सह

का विरोधिता" इति न्यायात्। काष्ठपञ्जरे क्षिप्तः त्रिरात्रं स्वसैन्ये स्थापितः। जयातोद्यानि घोषितानि। पश्चात् शाकम्भरीपतिर्विहितः। उत्खातप्रतिरोपितव्रताचार्यो हि तिहुअणपालदेवनन्दनः। गम्भीरतया स्वभटा नोपालब्धाः। त्यक्तजीवाशास्ते तं सेवन्ते। मेडतं सप्तवारभग्नम्। पल्लीकोट्टस्थाने आर्द्रकमुप्तम्। चिरं तस्थौ स तत्र। श्रीहेमचन्द्रसूरयः सहैव सन्ति। पृष्टास्ते तेन–"भगवन्! मालवीया राजानो गूर्जरानागताः प्रासादान्पातयन्ति आत्मख्यातये। तदस्माकमकृत्यम्। केनोपायेनात्मख्यातिं कूर्मः।" गुरुभिरुक्तम्–"राजेन्द्र! पाषाणमयानि तिलपेषणयन्त्राणि भङ्ग्धि पुण्यकीर्तिलाभात्।" भञ्जितास्ते तेन घाणकाः। अद्यापि भग्नाः पतिताः स्थाने स्थाने दृश्यन्ते। ततो वलले परराष्ट्रमर्दनचौलुक्यः। आयातः पत्तनम्। भगिनीं भर्तृकुले प्रगन्तुमतत्वरत्। न तु सा गता अभिमानात्। तपस्तु तेपे। राजा स्तम्भपुरे यात्रां सूत्रयामास। तत्पुरं पार्श्वदेवाय ददौ। पुनः पत्तनमैत। गृहीतसपादलक्षाधिपतिलक्षाद्रव्यान्कुसेवकान् निगृह्य निश्चिन्तीभूतः श्रीकुमारपालः श्रीहेमसूरिपादान्पर्युपास्ते। सामायिकपौषधादीन्याचरति। एकदा पृष्टं राज्ञा–"भगवन्! इदमपि ज्ञायते यदहं पूर्वभवे कीदृशोऽभूवम्।" गुरुराह–"राजन्! निरतिशयः कालोऽयम्। यतः श्रीवीरमोक्षगमनाद्वर्षाणां चतुःषष्ट्या चरमकेवली जम्बूस्वामी सिद्धिं गतः। तेन समं मनःपर्यवज्ञानम्, परमावधिः, पुलाकलब्धिः, आहारकशरीरम्, क्षपकश्रेणिः, उपशमश्रेणिः, जिनकल्पः, परि-

हारविशुद्धि-सूक्ष्मसम्पराय-यथाख्यातचारित्राणि, केवलज्ञानम्, सिद्धिगमनं च इति द्वादशस्थानानि भरतक्षेत्रे व्युच्छिन्नानि। सप्तत्यधिके वर्षशते गते स्थूलभद्रे स्वर्गस्थे चरमाणि चत्वारि पूर्वाणि समचतुरस्रसंस्थानं वज्रऋषभनाराचसंहननं महाप्राणध्यानं व्युच्छिन्नम्। आर्यवज्रस्वामिनि दशमं पूर्वं आद्यसंहननचतुष्कं च व्यपगतम्। ततः परं शनैः शनैः सर्वाणि पूर्वाणि प्रलयं गतानि। सम्प्रति अल्पश्रुतं वर्त्तते तथापि देवतादेशात्किमपि ज्ञायते।" राज्ञा विज्ञप्तम्-"यथा तथा पूर्वभवं ज्ञापयत माम्।" गुरुभिः प्रतिपन्नम्। ततः सिद्धपुरे निर्जराप्ततपोधनैः सह सरस्वतीतीरं गत्वा विजने ध्याने निषण्णाः। द्वौ मुनी दिग्रक्षायां मुक्तौ। दिनत्रयान्ते विद्यादेव्य आजग्मुः। प्रभूणामग्रे ताभिरुक्तम्-"यद्भवतां सत्त्वेन तुष्टाः स्मः। याच्यतां किञ्चित्।" सूरिभिरभाणि-"कुमारपालस्य प्राग्भवं वदत।" ता ऊचुः-"मेदपाटपरिसरे पर्वतश्रेण्यां परमारः पल्लीशो जयताको राज्यमकरोदन्यायी। एकदा धनकनकसमृद्धा बलीवर्दश्रेणी तेन गृहीता। बलीवर्दाधिपतिर्नष्टः। जयताकेन सर्वं लुण्टितम्। बलीवर्दाधिपतिस्तु मालवदेशं गत्वा राज्ञा सह मिलित्वा सेनां गृहीत्वा तस्यां पल्ल्यां वेष्टमकृत। कीटमारिः कृता। जयताको नष्टः। तस्य भार्या चटिता। तस्या उदरं विदार्य पुत्रं गर्भमुपले आस्फाल्य पल्लीग्रामादि प्रज्वाल्य पुनर्मालवदेशं गतः। राज्ञा हृष्टेन पृष्टः-"कथं कथं विग्रहः कृतः?।" वाणिज्यारकेणोक्तम्-"स्वामिन्! तत्पुरं प्रज्वालितम्, जयताको नष्टः,

तत्पत्नी चटिता सगर्भा हता।" राज्ञोक्तम्–"त्वया न सुष्ठु कृतम्। हत्यादूयं गृहीतम्। अद्रष्टव्य-मुखस्त्वं ममान्तिकं त्यज।" निष्कासितः। लोकनिन्दोच्छलिता। तपोवनं गत्वा तपस्विदीक्षा जगृहे। गाढं तपस्तप्त्वा मृत्वा स वाणिज्यारको जयसिंहदेवो जातः। जयताकस्तु स्थानभ्रंशं दृष्ट्वा देशान्तरं गतः। अटवीं गच्छतस्तस्य संडेरगच्छस्वामिनः श्रीयशोभद्रसूरयो मिलिताः। सूरिभिरभिहितम्–"यद् भवतोऽधुना सर्वं गतम्, किमर्थमन्यायं करोषि।" जयताकेनोक्तम्–"बुभुक्षितः किं न करोति पापम्। ततः सर्वमकृत्यं करोमि।" सूरिभिरुक्तम्–"अधुना शम्बलादिकं भोजनादि कारयिष्यते। अनयं मा कृथाः।" भोजनवस्त्रादिकं कस्यापि पार्श्वाद्दापितम्। सार्थे हि तदादेशकारिणो बहवः चौर्यनियमं यावज्जीवं ग्राहिताः। स तिलङ्गेषु उरङ्गलपुरे ओढरवाणिज्यारकगृहे भोजनादिवृत्या भृत्योऽस्थात्। तत्र विहरन् यशोभद्रसूरयः प्राप्ताः। चतुष्पथे मिलिता जयताकस्य। श्रावकैरुपाश्रयो दत्तः। जयताकेन तत्र गत्वा हृदयशुद्ध्या पुनश्चौर्यनियमो गृहीतः, अन्येऽपि बहवो नियमा गृहीताः। उत्सूरे ओढरगृहं गतः। ओढरेण पृष्टम्–"तव क्व वेला लग्ना?। त्वां विना कार्याणि सीदन्ति" तेनोक्तम्–"मम गुरवः समागताः सन्ति। तत्क्रमकमलवन्दनानन्दमन्वभूवम्। नियमानग्रहीषम्। ओढरेणापि समुत्पन्नश्रद्धेन व्याकृतम्–"वयमपि गुरून् वन्दिष्यामहे" जयताकेनोक्तम्–"पुण्यात्पुण्यमिदम्।" ओढरस्तत्र गतः। गुरून् वन्दित्वा न्यषदत्। देशना श्रुता। तत्त्वज्ञानमुन्मीलितम्।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रावकत्वं गृहीतम्। पश्चात् 'गुरु दक्षिणा गृह्यताम्' इति ओढरेणोक्ते सूरिभिरुक्तम्-" वयं निर्ममा निष्परिग्रहा धनादि न गृह्णीमः। अथ तवात्याग्रह एव तर्हि श्रीमहावीरप्रासादकारापणं दक्षिणाऽस्तु।" कारितः प्रासादः। ओढरस्य जयताकेन सह सोदरत्वमिवासीत्। एकदा पर्युषणे ओढरः सपरिवारश्चलितो जयताकेन समं देवगृहं प्रति। पुष्पाणि गृहीत्वा ओढरेण देवस्य पूजा कृता, जयताको जजल्पे-" इमानि मे पुष्पाणि गृहीत्वा पूजां कुरु।" जयताको जगाद-" पुष्पाणि भवदीयानि एभिः पूजायां कृतायां किं मे फलम्? वेष्टिरेव केवला। केवलं ममापि पञ्च वराटकाः सन्ति। तत्पुष्पैः पूजयिष्यामि जिनेन्द्रम्।" तथैव पूजितः। जयताको पुण्यमगण्यमुपार्जयत्। तत ओढरजयताकौ गुरून् वन्दितुं जग्मतुः। उपवासः कृतो जयताकेन। द्वितीयदिने मुनिभ्यो दत्त्वा पारणं कृतम्। एवं पुण्याढ्यः सन् मृत्वा श्रीमूलराजवंशे तिहुअणपालदेवगृहे श्रीकुमारपालोऽभूत्। एवमुक्त्वा विरतासु देवीषु प्रभुभिः प्रोक्तम्-" कोऽत्र प्रत्ययः।" पुनर्देव्यः प्राहुः- उपराजं वदेः नवलक्षतिलङ्गशृङ्गारनगरे उरङ्गले मानवान्प्रेषय। अद्यापि ओढरस्य वंशीयाः सन्ति। तेषां दासी स्थिरदेवी जीर्णवृत्तान्तान् जानाति वक्ष्यति च।" इत्युक्त्वा देव्यो गताः स्वस्वस्थानम्। पत्तने राजान्तिकं गता प्रभवः। पृष्टं तत्र राज्ञा। तथैव राज्ञोऽग्रे न्यगादि। नरप्रेषणात्सर्वं ज्ञातम्। जिनधर्मे स्थैर्यं जातम्। सह सिद्धेशेनापि वैरकारणमुपलब्धम्। पूर्वभवे गर्भघातान्न सिद्धराजस्य सन्तानम्। इति कुमारपालपूर्वभवः॥

॥ इति हेमसूरिप्रबन्धः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अथ हर्षकविप्रबन्धः—

पूर्वस्यां दिशि वाराणस्यां पुरि गोविन्दचन्द्रो नाम राजा ७८० अन्तःपुरीयौवनरसपरिमलग्राही। तत्पुत्रो जयन्तचन्द्रः। तस्मै राज्यं दत्त्वा पिता योगं प्रपद्य परलोकमसाधयत्। जयन्तचन्द्रः सप्तयोजनशतमानां पृथ्वीं जिगाय। मेघचन्द्रः कुमारस्तस्य। यः सिंहनादेन सिंहानपि भंक्तुमलं किं पुनर्मदान्धगन्धेभघटाः ?। तस्य राज्ञश्चलतः सैन्यं गङ्गायमुने विना नाम्भसा तृप्यति। नदीद्वययष्टिग्रहणात्पङ्गुलो राजेति लोके श्रूयते। यस्य गोमतीदासी षष्टिसहस्रेषु वाहेषु प्रक्षरां निवेश्याभिषेणयन्ती परचक्रं त्रासयति। राज्ञः श्रम एव कः ?। तस्य राज्ञो बहवो विद्वांसः। तत्रैको हीरनामा विप्रः। तस्य नन्दनः प्राज्ञचक्रवर्ती श्रीहर्षः। सोऽद्यापि बालावस्थः। सभायां राजकीयेनैकेन पण्डितेन वादिना हीरो राजसमक्षं जित्वा मुद्रितवदनः कृतः। लज्जापङ्के मग्नः। वैरं बभार धारालम्। मृत्युकाले हर्षं स बभाषे—"वत्स ! अमुकेन पण्डितेनाहमाहत्य राजदृष्टौ जितः। तन्मे दुःखम्। यदि सत्पुत्रोऽसि तदा तं जयेः क्ष्मापसदसि।" श्रीहर्षेणोक्तम्—'ओम्' इति हीरो द्यां गतः। श्रीहर्षस्तु कुटुम्बभारमाप्तदायादेष्वारोप्य विदेशं गत्वा विविधाचार्यपार्श्वेऽचिरात्तर्कालङ्कारगीतगणितज्योतिषचूडामणिमन्त्रव्याकरणादीः सर्वा विद्याः सस्फुराः प्रजग्राह।

For Private And Personal

गङ्गातीरे सुगुरुदत्तं चिन्तामणिमन्त्रं वर्षमप्रमतः साधयामास । प्रत्यक्षा त्रिपुराऽभूत् । अमोघादेशत्वादिवराप्तिः । तदादि राजगोष्टीषु भ्रमति । अलौकिकोल्लेखशिखरितं जल्पं करोति । यं कोऽपि न बुध्यते ततोऽतिविद्ययाऽपि लोकागोचरभूतया खिन्नः पुनर्भारतीं प्रत्यक्षीकृत्याभणत्–" मातर् ! अतिप्रज्ञाऽपि दोषाय मे जाता । बुध्यमानवचनं मां कुरु । " ततो देव्योक्तम्–" तर्हि मध्यरात्रेऽम्भःक्लिन्ने शिरसि दधि पिब । पश्चात्स्वपिहि । कफांशावताराज्जडतालेशमाप्नुहि । " तथैव कृतम् । बोध्यवागासीत् । खण्डनादिग्रन्थान् परःशताञ्ग्रन्थ । कृतकृत्यीभूय कासीमायासीत् । नगरतटे स्थितः । जयन्तचन्द्रमजिज्ञपत्–" अहमधीत्यागतोऽस्मि । " राजाऽपि गुणस्नेहलो हीरजेतृपण्डितेन सह सचातुर्वर्ण्यः पुरीपरिसरमसरत । श्रीहर्षो नमस्कृतः । तेनापि यथार्हमुचितं लोकाय कृतं राजानं त्वेवं तुष्टाव–

गोविन्दनन्दनतया च वपुः श्रिया च माऽस्मिन्नृपे कुरुत कामधियं तरुण्यः ।
अस्त्रीकरोति जगतां विजये स्मरः स्त्रीरस्त्रीजनः पुनरनेन विधीयते स्त्री ॥ १ ॥

व्याचख्यौ च तारस्वरं सरसविस्तरम् । तुष्टा सभा राजा च । पितृवैरिणं तु वादिनं दृष्ट्वा सकटाक्षमाचष्टे–

साहित्ये सुकुमारवस्तुनि दृढन्यायग्रहग्रन्थिले तर्के वा मयि संविधातरि समं लीलायते भारती ।
शय्या वास्तु मृदूत्तरच्छदवती दर्भाङ्कुरैरास्तृता भूमिर्वा हृदयंगमो यदि पतिस्तुल्या रतिर्योषिताम् ॥१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एतच्छ्रुत्वा स वादी प्राह--

देव ! वादीन्द्रभारतीसिद्धः, तव समो कोऽपि न किं पुनरधिकः ।

हिंस्राः सन्ति सहस्रशो विपिने शौण्डीर्यवीर्योद्धतास्तस्यैकस्य पुनः स्तवीमहि महः सिंहस्य विश्वोत्तरम् ।
केलिः कोलकुलैर्मदो मदकलैः कोलाहलं नाहलैः संहर्षो महिषैश्च यस्य मुमुचे साहंकृतेर्हुङ्कृते: ॥ १ ॥

अत्र श्रीहर्षे इदमेव वक्तुमर्हम् । प्रतिवादीनां कोऽर्थः ? । सम्यगवसरमज्ञासीः । श्रीहीरवैरिन्नित्यर्थः । अन्योऽन्यं गाढालिङ्गनमचीकरत् द्वयोरपि वसुंधरासुधांशुः । विस्तरेण सौधमानीय माङ्गलिकानि कारयित्वा गृहं प्रति प्रहितः । लक्षसंख्यानि हेमानि ददिरे । निश्चिन्तीकृत्यैकदा मुदा नृपेणोक्तः-"कवीश ! वादीन्द्र ! किञ्चित्प्रबन्धरत्नं कुरु ।" ततो नैषधं महाकाव्यं बद्धं दिव्यरसं महागूढव्यङ्ग्यभारसारम् राज्ञे दर्शितम् । राज्ञोचे-"सुष्ठुतममिदम् । परं काश्मीरं व्रज । तत्रत्यपण्डितेभ्यो दर्शय । भारतीहस्ते च मुञ्च । भारती च तत्र पीठे स्वयं साक्षाद्वसति । असत्यं प्रबन्धं हस्ते न्यस्तमवकरानिकरामिव दूरे क्षिपति । सत्यं तु मूर्द्धधूनन-पूर्वं सुष्ठु इत्युरीकरोति । उपरितः पुष्पाणि पतन्ति ।" श्रीहर्षो राजदत्तार्थनिष्पन्नविपुलसामग्रीकः कश्मीरानगमत् । सरस्वतीहस्ते पुस्तकं न्यास्थत् । सरस्वत्या दूरे क्षिप्तं तत् । श्रीहर्षेण कथितम्-"किं जरतीति

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विकलासि ?। यन्मदुक्तमपि प्रबन्धमितरप्रबन्धमिव मन्यसे।" भारत्याह–" भोः! परमर्मभाषकः न स्मरसि ? यदत्रोक्तं त्वया एकादशे सर्गे चतुःषष्टितमे काव्ये—

देवी पवित्रितचतुर्भुजवामभागा वागालपत्पुनरिमां गरिमाभिरामाम्।
अस्यारिनिष्कृपकृपाणसनाथपाणेः पाणिग्रहादनुगृहाण गणं गुणानाम्॥ १॥

एवं मां विष्णुपत्नीत्वेन प्रकाश्य लोके रूढं कन्यात्वं लुप्तवानसि। ततो मया पुस्तकं क्षिप्तम्।
याचको वञ्चको व्याधिः पञ्चत्वं मर्मभाषकः। योगिनामप्यमी पञ्च प्रायेणोद्वेगहेतवः॥ १॥"

इति वाग्देवीवाचं श्रुत्वा श्रीहर्षो वदति–"किमर्थमेकस्मिन्नवतारे नारायणं पतिं चकुषी, त्वं पुराणेऽपि विष्णुपत्नीति पठ्यसे। ततः सत्यं किमिति कुप्यासि ?। कुपितैः किं छुट्यते कलङ्कात् ?।" इति श्रुत्वा स्वयं गृहीत्वा पुस्तकं हस्ते धारितम्। ग्रन्थश्च श्लाघितः सभासमक्षम्। श्रीहर्षेण पण्डिता उक्तास्तत्रत्याः–"ग्रन्थमत्रत्याय राज्ञे माधवदेवनाम्ने दर्शयत। श्रीजयन्तचन्द्राय च शुद्धोऽयं ग्रन्थ इति लेखं प्रदत्त।" इति श्रुतेऽपि ग्रन्थे भारत्यभिमते ज्ञातेऽपि ते न लेखं ददते, न भूपं दर्शयन्ति। स्थितः श्रीहर्षो बहून्मासान्। जग्धं पाथेयम्। विक्रीतं वृषभादि। मितीभूतः परिच्छदः। एकदा नद्यासन्नदेशे कूपतटासन्नतमे देवकुले रुद्रजपं रहः करोति। तत्रागते कयोश्चिद्गृहिणोरुल्लुण्ठे चेट्यौ। जलप्रथमपश्चाद्ग्रहणघटभरणविषये वादे लग्ने। तयो-

For Private And Personal

श्चिरमुक्तिप्रत्युक्तिरभूत्। शीर्षाणि स्फुटितानि घातप्रतिघातैः। गते राजकुलम्। राजा साक्षिणं गवेषयति। उक्ते ते–"अत्र कलहे कोऽपि साक्षी विद्यते नवा।" ताभ्यां जगदे–"विप्र एकस्तत्रास्ते जपतत्परः।" गता राजकीयाः। आनीतः श्रीहर्षः पृष्टस्तयोर्नयानयौ। श्रीहर्षेण गीर्वाणवाण्योक्तम्–"देव! वैदेशिकोऽहम्। न वेद्मि। किमप्येते प्राकृतवादिन्यौ ब्रूतः। केवलं तान्शब्दान्वेद्मि।" राज्ञोक्तम्–"ब्रूहि।" तत्क्रमस्थमेव तदूभाषितप्रतिभाषितशतमभिहितमनेन। राजा चमुत्कृतः। अहो! प्रज्ञा अहो! अवधारणा। दास्योर्वादं निर्णीय यथासंभवं निग्रहानुग्रहौ कृत्वा प्रहित्य श्रीहर्षमपृच्छद् राजा–"कस्त्वमेवं मेधिरशिरोमणिः?।" श्रीहर्षेणोक्तं सर्वं कथानकं स्वम्। राजन्! पण्डितकृतदौर्जन्यात्तव पुरे दुःखी तिष्ठामि। सम्यक्पारं पर्यज्ञो राजा पण्डितानाहूयावादीत्–"धिग् मूढाः! इदृशेऽपि रत्ने न स्निह्यथ।

वरं प्रज्वलिते वह्नावह्नाय निहितं वपुः। न पुनर्गुणसम्पन्ने कृतः स्वल्पोऽपि मत्सरः॥ १॥
वरं सा निर्गुणाऽवस्था यस्यां कोऽपि न मत्सरी। गुणयोगे तु वैमुख्यं प्रायः सुमनसामपि॥ २॥

तस्मात्खला यूयम्। गच्छत एतं महात्मानं प्रत्येकं स्वगृहेषु सत्कुरुत।" तदा श्रीहर्षः प्रागदीत्—

यथा यूनस्तद्वत्परमरमणीयापि रमणी कुमाराणामन्तः करणहरणं नैव कुरुते।
मदुक्तिश्चेतश्चेन्मदयति सुधीभूय सुधियः किमस्या नाम स्यादरसपुरुषाराधनरसैः॥ १॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इति लज्जिरे पण्डिताः। सर्वे गृहं नीत्वा सत्कृत्यानुनीय राज्ञा च सत्कार्यज्ञैः प्रहितः श्रीहर्षः कासीम्। मिलितो जयन्तचन्द्राय। उक्तं सर्वम्। तुष्टः सः। प्रसृतं नैषधं लोके। अत्रान्तरे जयन्तचन्द्रस्य पद्माकरनामा प्रधाननरः श्रीअणहिलपत्तनं गतः। तत्र सरस्तटे रजकक्षालितायां शाटिकायां केतक्यामिव मधुकरकुलं निलीयमानं दृष्ट्वा विस्मितः। अप्राक्षद्रजकम्–"यस्या युवतेरियं शाटी तां मे दर्शय।" तस्य हि मन्त्रिणस्तत्पद्मिनीत्वे निर्णयस्थं मनः। रजकेन सार्थं गत्वा तस्मै तद्गृहं नीत्वा तामर्पयित्वा तत्स्वामिनी सूहवदेवी नाम्नी शालापतिपत्नी विधवा यौवनस्था सुरूपा दर्शिता। तां कुमारपालराजपार्श्वादुपरोध्य तद्गृहान्नीत्वा सोमनाथयात्रां कृत्वा कासीं गतः। पद्मिनीं जयन्तचन्द्रभोगिनीमकरोत्। 'सूहवदेविः' इति ख्यातिमगात्। सा च सगर्वा विदुषीति कृत्वा कलाभारतीति पाठयति लोके। श्रीहर्षोऽपि नरभारतीति पाठते। तस्य तत्र सहते सा मत्सरिणी। एकदा ससत्कारमाकारितः श्रीहर्षः। भणितश्च–"त्वं कः?।" श्रीहर्षः–"कलासर्वज्ञोऽहम्।" राज्याऽभाणि–" तर्हि मामुपानहौ परिधापय।" को भावः यद्ययं न वेत्ति, इति भणति द्विजत्वात्तर्हि अज्ञः। श्रीहर्षेणाङ्गीकृतम्। गतो निलयम्। तरुवल्कलैस्तथा तथा परिकर्मितैः सायं लोलाक्षः सन् दूरस्थः स्वामिनीमाजूहवत्। चर्मकारविधिनोपानहौ पर्यदीधपत्। अभ्युक्षणं निक्षिपेध्वं चर्मकारोऽहमिति वदन्। राज[illegible]मपि तत्कृतां कुचेष्टां ज्ञापयित्वा खिन्नो गङ्गातीरे संन्यासमग्रहीत्। सा च सूहवदेविः साम्राज्येशा

For Private And Personal

पुत्रमजनयत्। सोऽपि यौवनमाससाद। धीरः परं दुर्नयमयः। तस्य च राज्ञो विद्याधरमन्त्री। स च चिन्तामणिविनायकप्रसादात्सर्वधातुहैमत्वकरणप्रख्यातमाहात्म्यस्पर्शपाषाणलाभात् ८८०० विप्राणां भोजनं दाता, इति लघुयुधिष्ठिरतया ख्यातः। कुशाग्रीयप्रज्ञः। राजा तं जगदे-"राज्यं कस्मै कुमाराय ददामि?।" मन्त्र्याह-" मेघचन्द्राय सुवंशाय देहि, न पुनर्धूतापुत्राय।" राजा तु तया कार्मणितस्तत्पुत्रायैव दित्सति। एवं विरोध उत्पन्नो मन्त्रिराज्ञोः। कथं कथञ्चिन्मन्त्रिणा राज्ञीवाचमप्रमाणीकार्य भूपो मेघचन्द्रकुमाराय राज्यदानमङ्गीकारितः। राज्ञी क्रुद्धा। धनाढ्यतया स्वच्छन्दतया निजप्रधाननरान्प्रेष्य तक्षसिलाधिपतिः सुरत्राणः कासीभञ्जनाय प्रयाणे प्रयाणे सपादलक्षहेमदानेन चालित आयाति। तत्तु विद्याधरेण चरदृशा विदितम्। राज्ञे कथितम्। राजा तत्कार्मणादिङ्मूढः प्राह-"ममेयं वल्लभेश्वरी नैवं पतिद्रोहम् समाचरति।" मन्त्री तु वदति-" राजन्! अमुकप्रयाणे तिष्ठति शाखीन्द्रः।" राज्ञा हक्कितो गतो गृहम्। चिन्तितं च तेन-" नृपस्तावन्मूढः। राज्ञी बलवती, लब्धप्रसरा, अविवेकिनी। मम मरणं स्वामिमरणादर्वाग् भवेत्तदा धन्यता।" प्रातश्चलितो मन्त्री स्वसदनात्। पथि गच्छन्तं पिण्याकं दृष्ट्वा तमजिघ्रस्लिषत्। पुनः पुरो गतः स्फुटितचनकपिटकमालोक्य तदद्ने मनोऽदधत्। तेन कुचेष्टाद्वयेनात्मनो विधिवैपरीत्यं निर्णीयोपराजं गत्वा व्यज्ञपत्-" देव! अहं गङ्गाजले मंक्त्वा म्रिये, यथादिशासि।" राजाऽऽख्यत्-" यदि म्रियसे तदा सुखेन ॥ ६३ ॥

जीवामः । कर्णज्वरो निवर्त्तते ।" मन्त्री दूनः हुं हितवचनानाकर्णनम्, अनये वृत्तिः, प्रियेष्वपि द्वेषः, निजगुरुजनेऽप्यवज्ञा, मृत्योः किल पूर्वरूपाणि । आगतं राज्ञो मरणम् । राजानमापृच्छ्य गृहं गत्वा सर्वं द्विजादिलोकाय प्रदाय भवविरक्तो जाह्नवीजलमध्यं प्रविश्य कुलपुरोहितमाह–"दानं गृहाण ।" विप्रेणापि करः प्रसारितः । दत्तः स्पर्शपाषाणः । तेनोक्तम्–"धिक् ते दानम्, यद्ग्रावाणं दत्से ।" इति क्रुद्धेनान्तरुदकं चिक्षेपे । सोऽश्मा गङ्गादेव्या जले । मन्त्री जले मंक्त्वा मृतः । राजा अनाथो जातः । सुरत्राण आयातः । नगरे भाण्डं भाण्डेन स्फुटितम् । राजा युद्धायाभिमुखमागात् । ८४०० एतावन्ति निस्वानानि निजदले परं एकस्यापि निस्वानस्वनं राजा न शृणोति । आपृच्छच्च तटस्थान् । तैर्भणे–"म्लेच्छधनुर्ध्वानेषु मग्नानि ध्वानान्तराणि ।" राजा हृदये हारयामास । ततो न ज्ञायते किं हृतो गतो मृतो वा गङ्गाजलेऽपतत् । यवनैर्लाता पूः ॥

॥ इति श्रीहर्ष-विद्याधर-जयचन्द्रप्रबन्धः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ अथ हरिहरप्रबन्धः—

श्रीहर्षवंशे हरिहरः गौडदेश्यः सिद्धसारस्वतः । स गूर्ज्जरधरां प्रत्यचालीत् । अश्वशतद्वयं मानवानां शतपञ्चकं करभाः पञ्चाशत् । अनिवारमन्नदानं धवलक्कतटग्राममागात् । राणश्रीवीरधवल-श्रीवस्तुपाल-श्रीसोमेश्वरदेवेभ्यः पृथक् पृथक् आशिर्वादं प्रगल्भबटुहस्तेन प्राहैषीत् । श्रीवस्तुपालो जहर्ष । उत्थाय बटुं सह नीत्वा श्रीवीरधवलाय पण्डितस्याशीर्वादमदीदृशत् । तद्गुणांश्चावर्णयत् । राणकेनोक्तम्—" किमत्र युक्तम् ? । " मन्त्र्याह—" देव ! विस्तरेण प्रातः पण्डितस्य प्रवेशमहोत्सवः क्रियते । विपुलं देयं दीयते । " राणकेनोक्तम्—" न्याय्यम् । " ततो निवृत्तौ मन्त्रिराजश्च बटुश्च । बटुना तृतीयाशिर्वादः पण्डितसोमेश्वर-देवायादर्शि । कवितया तस्य मात्सर्यमदीपिष्ट । स निश्वासमधोऽद्राक्षीत् । बटुमालापीदपि न । आगत उत्थाय बटुर्हरिहरान्तिकम् । उक्तं राणकमन्त्रिणोः सौमनस्यं सोमेश्वरस्य तु दौर्मनस्यम् । कुपितः सोमेश्वर-देवे हरिहरः । जातं प्रातः । राणकः समन्त्रिकः सचातुर्वर्ण्यः सर्वर्द्ध्या संमुखो गतः । मिलितो हरिहरः । तत्र वीरधवलं प्रति—

For Private And Personal

शम्भुर्मानससन्निधौ सुरधुनीं मूर्ध्ना दधानः स्थितः श्रीकान्तश्चरणस्थितामपि वहन्नेतां निलीनोऽम्बुधौ ।
मग्नः पङ्करुहे कमण्डलुगतामेनां दधन्नाभिभूर्मन्ये वीर ! तव प्रतापदहनं ज्ञात्वोल्बणं भाविनम् ॥ १ ॥
दृष्टस्तेन शरान्किरन्नभिमुखः क्षत्रक्षये भार्गवो दृष्टस्तेन निशाचरेश्वरवधव्यग्रो रघुग्रामणीः ।
दृष्टस्तेन जयद्रथप्रमथनोन्निद्रसुभद्रापतिः दृष्टो येन रणाङ्गणे सरभसश्चौलुक्यचूडामणिः ॥ २ ॥

बटुः पृष्टः पण्डितेन–" अत्र सदसि सोमेश्वरोऽस्ति न वा । " बटुराह–" स क्रोधान्नागतः ।" पण्डितो ज्ञात्वाऽस्थात् । जातः प्रवेशः । राणकेन दत्तं सौध-धन-कुप्य-वसन-परिजन-तुरगादि चमत्कारकम् । अथ मन्त्रिगृहं गतोऽसौ । गुर्वी सभा । मन्त्र्यभ्युत्थानं चक्रे । उचे च—

मुधा मधु मुधा सीधु मुधा सोऽपि सुधारसः । आस्वादितं मनोहारि यदि हारिहरं वचः ॥ १ ॥

पण्डितस्तूचे–" देव ! लघुभोजराज ! विचारचतुर्मुख ! सरस्वतीकण्ठाभरण ! अवधारय । वयं पण्डिताः । अस्माकं माता भारती । सा च त्रिभुवनचारिणी । एकदा भारत्या सह महेन्द्रस्य सभामगमाम । सा च सुधर्मा नाम । इन्द्रः श्रीमान् । ३ कोट्यः सुराङ्गनाः । ८४ सहस्राणि सामानिकाः तथा—

द्वादशार्का वासवोऽष्टौ विश्वे देवा त्रयोदश । षट्त्रिंशत् तुषिताश्चैव षष्टिराभास्वरा अपि ॥ १ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

षट् त्रिंशदधिका माहा राजिकाश्च शते उभे । रुद्र एकादशैकोनपञ्चाशद्वायवोऽपि च ॥ २ ॥
चतुर्दश तु वैकुण्ठाः सुशर्माणः पुनर्दश । साध्याश्च द्वादशेत्याद्याः प्रसिद्धा गणदेवताः ॥ ३ ॥

एतत्समृद्धिस्वरूपं विलोक्य वयं विस्मिताः स्थिताः 'अहो! तपःफलभोगः' इत्यादि चिन्तयन्तो यावता स्मः । अत्रान्तरे आगतस्तत्र कोऽपि बुम्बां पातयन्नाह—

देव स्वर्नाथ कष्टं ननु क इह भवान्नन्दनोद्यानपालः
खेदस्तत्कोऽद्य केनाप्यहह हृत इतः काननात्कल्पवृक्षः ।
हुं मा वादीस्तदेतत्किमपि करुणया मानवानां मयैव
प्रीत्यादिष्टोऽयमुर्व्यास्तिलकयति तलं वस्तुपालच्छलेन ॥१॥

एवं तत्रालापं श्रुत्वा विस्मितोऽहं भारत्या सह पञ्चमकल्पद्रुमं त्वां द्रष्टुमागाम् । एवं विस्तरं काव्यं व्याख्याय स्थितः पण्डितः । मन्त्री यावत्किं ददामि इति चिन्तयति तावद् डोडीयावंश्यराणभीमदेवेन जात्या वाहनोत्तीर्णाश्चतुर्विंशातिरश्वा एकं च दिव्यं पदकं प्राभृतमानीतम् । तदेव पण्डिताय सर्वं दत्तम् । तुष्टोऽसौ पञ्चमकल्पतरुर्भवासि इत्युक्त्वा स्वोत्तारकमगात् । गतेषु कतिपयेष्वहःसु मिलितायां सभायां

For Private And Personal

पुरःस्थे सोमेश्वरे राणकेन पण्डितहरिहर उक्तः–" पण्डित ! अत्र पुरेऽस्माभिर्वीरनारायणाख्यः प्रासादः कारितोऽस्ति । तत्प्रशस्तिकाव्यान्यष्टोत्तरं शतं सोमेश्वरदेवपार्श्वात्कारितम् । तत्र भवन्तोऽवदधतु । यथा शुद्धत्वे निश्चयो भवति । महालक्ष्मीदृष्टौ नाणकपरीक्षा यतः । " हरिहरेणोक्तम्–" कथाप्यतां तानि । " उक्तानि सोमेश्वरेण तानि । श्रुत्वा तानि हरिहर ऊचे–" देव ! सुष्ठु काव्यानि परिचितानि च नः । यतो मालवीयेषूज्जयनीं गतैरस्माभिः सरस्वतीकण्ठाभरणप्रासादगर्भगृहे पट्टिकायां श्रीभोजदेववर्णनाकाव्यान्यमून्यदृक्षत । यदि तु प्रत्ययो नास्ति तदा परिपाट्यां श्रूयताम् । " इत्युक्त्वा क्रमेणास्खलितान्यपाठीत् । खिन्नो राणकः । प्रीताः खलाः । व्यथिताः श्रीवस्तुपालादयः सज्जनाः । उत्थिता सभा । हत इव मृत इव स्तम्भित इव जडित इव जातः सोमेश्वरः । गतः स्वगृहम् । ह्रिया वदनं न दर्शयति गृहेऽपि, का कथा राजादिसदनगमनस्य । अथ सोमेश्वरः श्रीवस्तुपालमन्दिरं गत्वोवाच–"मन्त्रिन् ! ममैव तानि काव्यानि । नान्यथा मम शक्तिं जानासि त्वम् । हरिहरस्त्वेवं मां व्यजूगुपत् । किमहं करोमि ? ।" मन्त्र्याह–"तमेव शरणं श्रय । यतः–'भजते विदेशमधिकेन जितस्तदनुप्रवेशमथवा कुशलैः' इति न्यायात् ।" पण्डितः–"तर्हि मां नय ।" तथाकृतं मन्त्रिणा । पण्डितसोमेश्वरं बहिरासयित्वा मन्त्री स्वयं हरिहरान्तिकमगात् । बभाण च–" पण्डितसोमेश्वरदेवस्तवान्तिकमागतोऽस्ति विज्ञीप्सुः ।" हसितो हरिहरः । आनीनयत्स्वसमीपम् । चकाराभ्युत्था-

नालिङ्गनमहासनादिसत्कारम्। सोमेश्वरेणोक्तम्—"पण्डित! निस्तारय मामस्मात्परकाव्यहरणकलङ्क-पङ्कात्। यतः—

आगतस्य निजगेहमप्यरेगौरवं विदधते महाधियः।
मौनमात्मसदनं समेयुषो गीष्पतिर्व्यधित तुङ्गतां कवेः॥ १॥"

तुष्टो हरिहरो भणति स्म—मा स्म चिन्तां विधाः। पुनर्गौरवमारोपयिताऽस्मि त्वाम्। गतः स्वस्थानं मन्त्री सोमेश्वरश्च। प्रत्यूषे राणकसभाभरे सोमेश्वर आह्वायितः। प्रस्तावना चारब्धा। यथा—"जयति परमेश्वरी भारती। यत्प्रसादादेवं मम शक्तिः।" श्रीवस्तुपालेनोक्तम्—"किं किम्?।" हरिहरः—"देव! मया काबेरी-नदीतटे सारस्वतमन्त्रः साधितः। होमकाले गीर्देवी प्रत्यक्षाऽऽसीत्। वरं वृणीष्वेत्याह स्म। मया जगदे—जगदे-कमातर्! यदि तुष्टाऽसि तदा एकदा भणितानां १०८ संख्यानां ऋचां षट्पदानां काव्यानां वस्तुकानां घत्तानां दण्डकानां वाऽवधारणे समर्थो भूयासम्।" देव्याचष्ट—"तथाऽस्तु।" ततः प्रभृति यो यदाह १०८ तत्तु ब्रुवे। यथेदं सोमेश्वरदेवोपज्ञं काव्याष्टोत्तरशतम्। राणकेनोक्तम्—"प्रत्ययः कार्यताम्।" भाणि-तान्यष्टोत्तरशतानि। तत्तच्छन्दसां प्रतिभाणितानि च हरिहरेण तानि। जातो निश्चयः पण्डितहरिहरवचने। क्षुत्तृष्णातपप्रभृतिचिन्तानपेक्षः स्थितो लोकः। राणकेश्वरेण बभणे—"तर्हि पण्डित! कथमेवं दूषितः

सोमेश्वरः।" हरिहरः प्राभाषत्–देव ! राणः—

प्रियं वा विप्रियं वापि सविशेषं परार्पितात्। प्रत्यर्थयन्ति ये नैव तेभ्यः साप्युर्वरा वरा ॥ १ ॥

राणः प्राह–"तर्ह्यस्त्वेवम्। परं मिथः सरस्वतीपुत्रयोः स्नेहो युक्तः।" इत्युक्त्वा कण्ठग्रहणमकारयत्। स्थितो निष्कलङ्कः सोमेश्वरः। वर्तते नित्यमिष्टगोष्ठी। हरिहरो नैषधकाव्यान्यवसरोचितानि पठति। श्रीवस्तुपालः प्रीयते–" अहो! अश्रुतपूर्वाणि काव्यान्यमूनि।" एकदाऽऽलापितः पण्डितहरिहरः–"कोऽयं ग्रन्थः।" पण्डितो वदति–" नैषधं महाकाव्यम्।" कः कविः ?। श्रीहर्षः। वस्तुपालेन गदितम्–" तदादर्शं दर्शय तर्हि।" पण्डितो ब्रूते–" नान्यत्रायं ग्रन्थः। चतुरो यामानर्पयिष्यामि पुस्तिकाम्।" अर्पिता पुस्तिका। रात्रौ सद्यो लेखकनियोगिभिर्लेखिता नवीना पुस्तिका। जीर्णरज्ज्यावृता। वासन्यासेन धूसरीकृत्य मुक्ता। प्रातः पण्डिताय पुस्तिका दत्ता। गृह्यतां तदिदं स्वनैषधम्। गृहिता पण्डितेन पुस्तिका। मन्त्रिणा न्यगादि–" अस्माकमपि कोशे किलास्तीवेदं शास्त्रमिति स्मरामः। विलोक्यतां कोशः।" यावद्विलम्बेनैवं कृष्टा नवीना प्रतिः। यावच्छोध्यते तावत् 'निपीय यस्य क्षितिरक्षिणः कथा' इत्यादि नैषधमुद्घटिष्ट। दृष्ट्वा पण्डितहरिहरेणोक्तम्–" मन्त्रि ! तवैव मायेयम्। यदीदृशेषु कार्येषु नान्यस्य क्रमते मतिः। युक्तम्–त्वया दण्डिताः प्रतिपक्षाः। स्थापितानि जैन-वैष्णव-शैवशासनानि। उद्धृतः स्वामिवंश्यः। यस्यैवं प्रज्ञा प्रका-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इयते।" अत्रान्तरे वीरधवलप्रहितसैन्यकम्पितेन महाराष्ट्रप्रभुणा सपादकोटिहेमप्रमितो दण्डः प्रहितः। श्रीवस्तुपालेन तु तद्धेम चतुर्दिग्यात्रिकेभ्यो याचकेभ्योऽदायि विवेकात्। तद् दृष्ट्वा हरिहरो वर्णयति—

आः! साम्यं न सहेऽहमस्य किमपि क्रोडीकृतैकश्रियो याञ्जोतानकरेण खर्वितनिजाकारोष्मणा शार्ङ्गिणा।
येनैता पुरुषोत्तमाधिकगुणोद्गारेण पुद्धार्णवादाकृष्यैव तथा श्रियः शकलशः कृत्वाऽर्थिनामर्पिता ॥ १ ॥

तदा वीरधवलस्य 'सपादकोटीकाञ्चनवर्षः' इति भट्टादिषु बिरुदं ख्यातिमापादयत्। अथ हरिहरः सोमेश्वरं नन्तुं गतो देवपत्तनम्। पण्डितसोमेश्वरदेवस्य तत्र तद्दौर्जन्यं स्मृत्वा [illegible] काव्यं अधि[illegible]—

क्व यातु क्वायातु क्व वदतु समं केन पठतु क्व काव्यान्यव्याजं रचयतु सु[illegible] निवसतु।
खलव्यालग्रस्ते जगति न गतिः क्वापि कृतिनामिति ज्ञात्वा तत्त्वं हरहरि मूढो [illegible] ॥ १ ॥
आरुक्षाम नृपप्रसादकणिकामद्राक्ष्म लक्ष्मीलवान् किञ्चिद्वाङ्मयमध्यगीष्महि गुणैः [illegible]।
इत्थं मोहमयीमकार्ष्म कियतीं नानर्थकन्थीं मनः स्वाधीनीकृतशुद्धबोधमधुना [illegible] ॥ २ ॥

इत्युक्त्वा धनार्द्धं दत्त्वा शेषार्द्धं गृहीत्वा धवलकक्कमध्ये भूत्वा राणकमन्त्रिणौ आपृच्छ्य काशीं प्राप्य स्वार्थमसाधयदिति ॥

॥ इति हरिहरप्रबन्धः समाप्तः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ अथ अमरप्रबन्धः—

श्रीअणहिल्लपत्तनासन्नं वायटं नाम महास्थानमास्ते, चतुरशीतिमहास्थानानामन्यतमत् । तत्र परकायप्रवेशविद्यासम्पन्नश्रीजीवदेवसूरिसन्ताने श्रीजिनदत्तसूरयो जगर्जुः । तेषां शिष्योऽमरो नाम प्रज्ञाचूडामणिः । स श्रीजिनदत्तसूरिभक्तात् कविराजअरिसिंहात् सिद्धसारस्वतं मन्त्रमग्रहीत् । तद्गच्छमहाभक्तस्य विवेकनिधेः कोष्ठागारिकस्य पद्मस्य विशालतमसदनैकदेशे विजने एकविंशत्याचाम्लैर्निद्राजयासनजयकषायजयादिदत्तावधानस्तं मन्त्रमजपत् । विस्तरेण होमं चक्रे । एकविंशतितम्यां रात्रौ मध्यप्राप्तायां नभस्युभ्युदिताच्चन्द्रबिम्बान्निर्गत्य स्वरूपेणागत्यामरं भारती करकमण्डलुजलममलमपीप्यत् । वरं च प्रादात्—"सिद्धकविर्भव । निःशेषनरपतिपूजागौरवताश्चैधि ।" इति वरं दत्त्वा गता भगवती । जातः कविपतिरमरः । रचिता काव्यकल्पलता नाम कविशिक्षा, छन्दोरत्नावली, सूक्तावली च । कलाकलापाख्यं च शास्त्रं निबद्धं, बालभारतं च बालभारते प्रभातवर्णने—

"दधिमथनविलोलल्लोलदृग्वेणिदम्भादयमदयमनङ्गो विश्वविश्वैकजेता ।
भवपरिभवकोपत्यक्तबाणः कृपाणः श्रममिव दिवसादौ व्यक्तशक्तिर्व्यनक्ति ॥ १ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इत्यत्र वेण्याः कृपाणत्वेन वर्णनाद्वेणीकृपाणोऽमर इति विरुदं कविवृन्दाल्लब्धममरेण। दीपिकाकालिदासवत्। घण्टामाघवच्च कवित्वप्रसिद्धेश्च महाराष्ट्रादिराजेन्द्राणां पूजा उपस्थिरे। तदा विसलदेवो राजा गूर्जराधिपतिर्धवलक्कके राज्यं शास्ति, तेनामरकवेर्गुणग्रामः श्रुतः। ठक्कुरं वइजलं प्रधानं प्रेष्य प्रातराहूतः कवीन्द्रः। आसनादिप्रतिपत्तिः। कृता सभा महती। अमरेण पठितम्—

वीक्ष्यैतद्भुजविक्रमक्रमचमत्कारं नकारं मयि प्रेम्णो नूनमियं करिष्यति गुणग्रामैकगृह्याशया।
श्रीमद्वीसलदेव! देवरमणीवृन्दे त्वदायोधने प्रेक्ष्य प्रक्षुभिते विमुञ्चति परीरम्भान्न रम्भां हरिः॥ १॥
त्वत्प्रारब्धप्रचण्डप्रधननिधनताराातिवीरातिरेकक्रीडत्कीलालकुल्यावलिभिरलभत स्पन्दमाकन्दमुर्वी।
दंभोलिस्तंभभास्वद्भुजगभुजजगद्धर्तुराभर्तुरेनां तेनायं मूर्ध्नि रत्नद्युतिततिमिषतः शोभते शोणभावः॥२॥

रञ्जिता सभा प्रीणितः पृथ्वीपालः। ततो राज्ञा प्रोक्तम्—"यूयं कवीन्द्राः श्रूयध्वे।" अमरोऽभिधत्ते—"सत्यमेव। यदि गवेषयति देवः।" ततो नृपेण सोमेश्वरदेवे दृष्टिः सञ्चारिता। ततः सोमेश्वरेण समस्यार्पिता। यथा 'शीर्षाणां सैव वन्ध्या मम नवतिरभूल्लोचनानामशीतिः' अमरेण सद्यः पूरिता—

कैषा भूषा शिरोऽक्ष्णां तव भुजगपते रेखयामास भूत्या
द्यूते मन्मूर्ध्नि शम्भुः सदशनवशतान(९१०)क्षपातान् विजित्य।

For Private And Personal

गौरी त्वाङ्ग दृष्टीर्जितनखनवभू(१९२०)स्तद्विशेषात्तदित्थं
शीर्षाणां सैव वन्ध्या मम नवतिरभूल्लोचनानामशीतिः ॥ १ ॥

अत्र शिरोऽक्ष्णामिति शिरसा युक्तानामक्ष्णामिति मध्यपदलोपी समासः कार्यः । द्वन्द्वे तु प्राण्यङ्गत्वादेकत्वं प्राप्नोति । ततो वामनस्थलीयकविसोमादित्येन समस्या दत्ता—

'धनुष्कोटौ भृङ्गस्तदुपरि गिरिस्तत्र जलधिः'

अमरेणोक्तम्—

भवस्याभूद्भाले हिमकरकलाऽग्रे गिरिसुता ललाटस्याश्लेषे हरिणमदपुण्ड्रप्रतिकृतिः ।
कपर्दस्तत्प्रान्ते यदमरसरित्तत्र तदहो धनुष्कोटौ भृङ्गस्तदुपरि गिरिस्तत्र जलधिः ॥ २ ॥

ततः कृष्णनगरवास्तव्येन कमलादित्येन समस्या वितीर्णा—

'मशकगलरन्ध्रे हस्तियूथं प्रविष्टम्'

अमरेण पुपूरे—

तटविपिनविहारोच्छृङ्खलं यत्र यादोमशकगलरन्ध्रे हस्तियूथं प्रविष्टम् ।
बत बक न कदाचित्किं श्रुतोऽप्येष वार्द्धिः प्रतनुतिमिनितल्ले क्वापि गच्छ क्षणेन ॥ ३ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अथ वीसलनगरीयेण नानाकेन समस्या विश्राणिता–

'गीतं न गायतितरां युवतिर्निशासु'

अमरेणोक्तम्–

श्रुत्वा ध्वनेर्मधुरतां सहसावतीर्णे भूमौ मृगे विगतलाञ्छन एष चन्द्रः।
मागान्मदीयवदनस्य तुलामितीव गीतं न गायतितरां युवतिर्निशासु ॥ ४ ॥

एवमष्टोत्तरं शतं बहुकविदत्ताः पूरिताः समस्याः श्रीअमरेण। ततो राज्ञाऽभिहितम्–"सत्यं कविसार्वभूमः श्रीअमरः।" तत्र दिने सन्ध्यावधि सभा निषण्णा स्थिता। राजा लज्जितः सभ्यलोकोऽपि। रसावेशे हि कालो व्रजन्नपि न लक्ष्यते। द्वितीयदिने सद्यः काव्यमयैः प्रमाणोपन्यासैः प्रामाणिका जाताः। तृतीयदिने राज्ञा पृष्टम्–"अस्माकं सम्प्रति का चिन्तास्तीति कथ्यताम्।" अमरेण भणितम्–"देव! कथं दूरं गताः स्वर्गे ऐरावणस्य दक्षणकर्णे लुकिताः।" भूपतिः स्वसंवादेऽमोदत, शिरोऽधुनोत्। नित्यं गमनागमने जिनधर्मासन्नः कृतो राजा चैत्येषु पूजाः कारयति। एकदा नृपेण पृष्टम्–"भवतां कः कलागुरुः?" अमरेण गदितम्–"अरिसिंहः कविराज इति।" तर्हि प्रातरत्रानेयः। अमरचन्द्रेणानीतः प्रातः कविराज

For Private And Personal

उपराजम् । तदा राजा खड्गेन भ्रमयन्नास्ते । राज्ञा पृष्टम्–" अयं कविराजः ? । " कविराजेन व्याजह्रे– " ओमिति । " राजाह–" तर्हि वद कालोचितं किञ्चित् । " अरिसिंहः कवयति–

त्वत्कृपाणविनिर्माणशेषद्रव्येण वेधसा । कृतः कृतान्तः सर्प्पस्तु करोद्वर्त्तनवर्त्तिभिः ॥ १ ॥

अत्यर्थाभ्यधिकार्पणं किमपि यः पाणेः कृपाणे गुणः सञ्चक्राम स यद्ददौ द्युपदवीं प्रत्यर्थिषु क्ष्मार्थिषु ।
त्वत्सङ्गान्न स बद्धमुष्टिरभवद्येनारिपृथ्वीभुजां पृष्ठेषु स्वमपि प्रकाममुदितप्रोद्दामरोमोद्गमः ॥ २ ॥

कलयसि किमिह कृपाणं वीसल ! बलवंति शत्रुषु तृणानि । यानि मुखगानि तेषां न चैष लङ्घयितुमसमर्थः ॥ ३ ॥

देव ! त्वं मलयाचलोऽसि भवतः श्रीखण्डशाखीभुजस्तम्भः क्रीडति कज्जलाकृतिरसिर्द्धाराद्विजिह्वः फणी ।
षए त्वां गमनर्गलं रिपुतरुस्कन्धेषु संवेष्टयेत् दीर्घं व्योमविसारिनिर्मलयशो निर्म्मोकमुन्मुञ्चति ॥ ४ ॥

अद्भुतकवितादर्शनात्कविराजो राजेन्द्रेण नित्यसेवकः कृतः । ग्रासो महान् प्रत्यष्टापि । एकदा श्रीवीसलदेवेन भोजनान्ते तृणकरे धृत्वाऽरिसिंहोऽभिदधे–" इदं तृणं सद्यो वर्णय । यदि रुचितभङ्ग्या वर्णयसि, तदा ग्रासद्वैगुण्यं अन्यथा सर्वग्रासत्याजनम् । " इत्युक्तिसमकालमेवाहतप्रतिभतया स ऊचे–

क्षारोऽब्धिः शिखिनो मखा विषमयं श्वभ्रंक्षयीं दुर्मुधा प्राहुस्तत्र सुधामियं तु दनुजत्रस्तैव लीना तृणे ।
पीयूषप्रसवो गवां यदशनाद्दत्त्वा यदास्ये निजे देव ! त्वत्करवालकालमुखतो निर्याति जातिर्द्विषाम् ॥ १ ॥

चमत्कृतो भूपालः । आसद्वैगुण्यं कृतम् । कालान्तरेऽमरेण कोष्ठागारिकपद्मसिरापद्मानन्दाऽऽख्यं शास्त्रं रचितम् । एवं कविताकल्लोलसाम्राज्यं प्रतिदिनं ॥

॥ इति अमरचन्द्रकविप्रबन्धः ॥

(१४)

अथ मदनकीर्त्तिप्रबन्धः—

उज्जयिन्यां विशालकीर्त्तिदिगम्बरः । तच्छिष्यो मदनकीर्त्तिः । स पूर्वपश्चिमोत्तरासु तिसृषु दिक्षु वादिनः सर्वान् विजित्य 'महाप्रामाणिकचूडामणिः' इति बिरुदमुपार्ज्य स्वगुर्वलङ्कृतामुज्जयिनीमागात् । गुरूनवन्दिष्ट । पूर्वमपि जनपरम्पराश्रुततत्कीर्त्तिः स मदनकीर्त्तिः भूयिष्टमश्लाघिष्ट । सोऽपि प्रामोदिष्ट । दिनकतिपयानन्तरं च गुरुं न्यगादीत्–"भगवन् ! दाक्षिण्यात्यान् वादिनो विजेतुमीहे । तत्र गच्छामि ? । अनुज्ञा दीयताम् ।" गुरुणोक्तम्–"वत्स ! दक्षिणां मागाः । स हि भोगनिधिर्देशः । को नाम तत्र गतो दर्शन्यपि न तपसो भ्रश्येत् ।" तद्गुरुवचनं विलङ्घ्य विद्यामदाध्मातो जालकुद्दालनिश्रेण्यादिभिः प्रभूतैश्च शिष्यैः परिकरितो महाराष्ट्रादिवादिनो मृदूनन् कर्णाटदेशमाप । तत्र बिजयपुरे कुन्तिभोजं नाम राजानं स्वयं त्रैविद्यविदं विद्वत्प्रियं सदसि निषण्णं स द्वास्थनिवेदितो ददर्श तमुपश्लोकयामास— ॥ ७० ॥

देव ! त्वद्भुजदण्डदर्पगरिमोद्गारप्रतापानलज्वालापक्तिमकीर्त्तिपारदघटोविस्फोटिनो बिन्दवः ।
शेषाहिः कति तारकाः कति कति क्षीराम्बुधिः कत्यपि प्रालेयाचलशङ्खशुक्तिकरका कर्पूरकुन्देन्दवः ॥१॥
कीर्त्तिः कैकतकुन्तिभोजभवतः स्वर्वाहिनी गाहिनी दिक्पालान् परितः परीत्य दधती भास्वन्मयं गोलकं ।
लङ्घित्वाम्बुधिसप्तमण्डलभुवस्त्वय्येकपत्नीव्रतख्यात्यै विष्णुपदं स्पृशत्यविरतं शेषाहिशीर्णाण्डरे ॥२॥

चमत्कृतो राजा। स्थापितो दिगम्बरः सौधासन्नदेशे । राज्ञादिष्टम् "ग्रन्थमेकं कुरु अस्मत्पूर्वजवर्णनप्रतिबद्धम् ।" तेनोक्तम्–"देव ! अहं श्लोकपञ्चशतीं एकस्मिन् दिने कर्त्तुं क्षमः, तावत्तु लेखितुं न क्षमोऽस्मि । कश्चिल्लेखकः समर्प्यताम् ।" राज्ञोक्तम्–"अस्मत्पुत्री मदनमञ्जरी नाम लिखिष्यति जवनिकान्तरिता सती । दिगम्बरेण ग्रन्थं कर्त्तुमारेभे । राजपुत्री पञ्चशतीं लिखति । एवं कत्यप्यहानि ययुः । एकदा राजसुता तस्य स्वरं कोकिलरवजित्वरं शृण्वती सती चिन्तयति–" अस्य रूपमपि सुन्दरं भविष्यति । जवनिकान्तरितया कथं दृश्यते ?। करोमि तावदुपायम् । रसवत्यां लवणबाहुल्यं कारयामि ।" सोऽपि दिग्वस्त्रः राजपुत्रीं तादृग्विदुर्षी सुस्वरां दिदृक्षते । लवणातिशये दिक्पट ऊचे–"अहो लवणिमा ।" राजपुत्र्यभिदधे–" अहो निष्ठुरता ।" एवमालापप्रत्यालापे दूरे कृता उभाभ्यां मर्यादामयी वस्त्रमयी च जवनिका। परस्परं दिव्यरूपदर्शनम् । तावता दिग्वस्त्रेणोक्तम्—

" निरर्थकं जन्मगतं नलिन्याः यया न दृष्टं तुहिनांशु बिम्बम् ।

राजसुतयापि भणितम्—

उत्पत्तिरिन्दोरपि निष्फलैव, दृष्टा प्रबुद्धा नलिनी न येन ॥ १ ॥

ततश्चक्षुःप्रीतिमुद्भवन्तीवाऽपराणि कुसुमचापचापलानीनि वचनान्निरर्गले मदने भग्नं कौमारव्रतं तयोः। वर्तते विकथा। अल्पो निष्पद्यते ग्रन्थः। सायं राजा विलोकयति शास्त्रम्। को हेतुरद्य स्तोकं निष्पन्नम्?। दिगम्बरस्तेषु त्रिचतुराणि विषमाणि पद्यानि निक्षिपते। ततो राजाग्रे भणति—"देव! ममेयं प्रतिज्ञा अहमबुध्यमानस्य लेखितुः पार्श्वान्न लेखयामि। तव तु पुत्र्या इदं स्थानं कृच्छ्रेण बुद्धम्। इति कालविलम्बाद् ग्रन्थाल्पत्वं जायते।" राजेन्द्रो विमृशति—"शठोत्तरमेवेदं दृश्यते। एकदा हरयामि किमिमौ समाचरतः।" निशायां विभातायां एकदा राजा छन्नरूप एकाकी तयोर्ग्रन्थनिष्पत्तिप्रदेशकुड्यान्तरेऽस्थात्। तदैव दिक्पटो राजपुत्रीं प्रति प्रणयकलहानुनयगर्भमाह—

सुभ्रु! त्वं कुपितेत्यपास्तमशनं त्यक्त्वा कथा योषितां दूरादेव निराकृताः सुरभयः स्वर्गन्धधूपादयः।
रागं रागिणि मुञ्च मय्यवनते दृष्टे प्रसीदाधुना सत्यं त्वद्विरहे भवन्ति दयिते सर्वा ममान्धा दिशः ॥१॥

एतत्काव्यश्रवणाद् द्वयोर्दौःशील्यं निर्णीय मन्दपदं निर्ययौ । स्थाने गतो वसुधाधिपतिः । क्रुद्धेन तेन तत्कालमाहूतो दिक्पट आगतः । भाषितो यथा–"पण्डित ! किमिदं नवीनं पद्यम् ? । 'सुभ्रु ! त्वं कुपितेत्यपास्तमशनम्' इत्यादि ।" दिग्वसनेन विमृष्टम्–"राज्ञा हरितोऽहम् । अपराधी लब्धः । तथाप्युत्तरं ददामि यथातथा ।" इति चिन्तयित्वाऽवनिपतिमभ्यधात्–"देव ! दिनद्वयात्प्रभृतिदृग्मे पीडास्ते वर्त्तते । तदुपश्लोकायानुनयपरं पद्यमिदमपाठिषम् ।

इति प्रस्तावनां कृत्वा निःक्षोभस्तथैवं भङ्ग्या सद्यो व्याचचक्षे । तथा प्रज्ञया तुष्टोऽन्तः क्षितिपः । अकृत्यकरणदर्शनात्तु रुष्टः । स भ्रूभङ्गं भृत्यानूचे–"बध्नीत रे अमुं कुकर्मकारिणं घातयत च ।" बद्धस्तैः । तदाकर्ण्य राजपुत्री द्वात्रिंशता सखीभिः शस्त्रिकापाणिभिः समं आगात् । राजदृष्टिमेत्य स्वयमकथयत्–"यद्यमुं मे मनोरुच्यं मुञ्चसे तदा चारु । अथ न मुञ्चसे तदा चतुस्त्रिंशद्धत्या भावितारः । एका दिगम्बरहत्या त्रयस्त्रिंशद्युवतिहत्या इति ।" ततो राजा मन्त्रिभिर्विज्ञप्तः–"देव ! त्वयैवेयमस्यासन्नीकृता । यूनां स्त्री सन्निधानं च मन्मथद्रुमदोहदः । कस्य दोषो दीयते ।

चित्रस्था अपि चेतांसि हरन्ति हरिणीदृशः । किं पुनस्ताः स्मरस्मेरविभ्रमभ्रमितेक्षणाः ॥ १ ॥

मुच्यतां प्रसद्य दिग्वस्त्रः। इयं वास्यैव भवतु।" इति श्रुत्वा तं मुक्त्वा तां तस्यैव पत्नीमकरोत्। स च राज्यांशभाजनं कृतः। दिग्जयधनानि च श्वशुरसाधकार। व्रतं त्यक्त्वा भोगी जातः। तं तादृशं वृत्तान्तं विशालकीर्त्तिर्गुरुरुज्जयिन्यामश्रोषीत्। अध्यासीच्च। "अहो! यौवनधनकुसङ्गानां महिमा। येनायमेवंविधोऽपि व्रती विद्वान् वादी योगज्ञो भूत्वा एवंविधं उग्रदुर्गतिपतनमूलं कुपथं प्रपन्नः।

हा! हा! धिग् परिच्छेदातीतः सकलवचनानामविषयः पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान्।
विवेकप्रध्वंसादुपचितमहामोहगहनो विकारः कोऽप्यन्तर्जडयति च तापं च तनुते ॥ १ ॥

एवं विमृश्य चतुरांश्चतुरः शिष्यांस्तद्बोधनाय प्राहैषीत्। तैस्तत्र गत्वोक्तोऽसौ—
"विरमत बुधा योषित्सङ्गात्सुखात् क्षणभङ्गुरात् कुरुत करुणाप्रज्ञामैत्रीवधूजनसङ्गमं
न खलु नरके हाराक्रान्तं घनस्तनमण्डलं भवति शरणं श्रोणीबिम्बं रणन्मणिदाम वा ॥ १ ॥

इत्यादि गुरुभिर्बोध्यमानोऽसि। बुध्यस्व। मामुहः।" सोऽथ निस्त्रपतया तेषां हस्ते गुरुभ्यः पद्यानि पत्रे लिखित्वा प्रजिघाय। गतास्ते तत्र। वाचितानि पद्यानि गुरुणा—

तर्कोऽप्रतिष्ठः श्रुतयो विभिन्नाः नासौ गुरुर्यस्य वचः प्रमाणम्।
धर्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः ॥ १ ॥

प्रियादर्शनमेवास्तु किमन्यैर्दर्शनान्तरैः । प्राप्यते येन निर्वाणं सरागेणापि चेतसा ॥ २ ॥
सन्दष्टाधरपल्लवा सचकितं हस्ताग्रमाधुन्वती मा मा मुञ्च शठेति कोपवचनैरानर्त्तितभ्रूलता ।
सीत्काराञ्चितलोचना सरभसं यैश्चुम्बिता मानिनी प्राप्तं तैरमृतं श्रमाय मथितो मूढैः सुरैः सागरः ॥१॥
इत्यादि दृष्ट्वा तस्थौ तूष्णीं गुरुः । मदनकीर्त्तिस्तु व्यलासीद्विविधम् ॥

॥ इति मदनकीर्त्तिप्रबन्धः ॥

(१९)

अथ सातवाहनप्रबन्धः—

इह भारते वर्षे दक्षिणखण्डे महाराष्ट्रदेशावतंसं श्रीमत्प्रतिष्ठानं नाम पत्तनं विद्यते । तच्च निजभूत्याभिभूतपुरन्दरपुरमपि कालान्तरेण क्षुल्लकग्रामप्रायमजनिष्ट। तत्र चैकदा द्वौ वैदेशिकद्विजौ समागत्य विधवया स्वस्रा सार्कं कस्यचित् कुम्भकारस्य शालायां तस्थिवांसौ । कणवृत्तिं विधाय कणान् स्वसुरुपनीय तत्कृताहारयाकेन समया कुरुतः स्म। अन्येद्यु सा तयोर्विप्रयोः स्वसा जलाहरणाय गोदावरीं गता। तस्याः स्वरूपमप्रतिरूपं निरूप्य स्मरपरवशोऽन्तर्ह्रदवासी शेषो नाम नागराजो ह्रदान्निर्गत्य विहितमनुष्यवपुस्तया सह बला-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दपि सम्भोगकेलिमकलयत्। भवितव्यताविलसितेन तस्याः सप्तधातुरहितस्यापि तस्य दिव्यशक्त्या शुक्रपुद्गलसञ्चाराद्गर्भाधानमभवत्। स्वनामधेयं प्रकाश्य व्यसनसङ्कटे मां स्मरेरित्यभिधाय च नागराजः पाताललोकमगमत्। सा च गृहं प्रत्यगच्छत्। व्रीडापीडिततया च स्वभ्रात्रोस्तं वृत्तान्तं न खलु न्यवेदयत्। कालक्रमेण सहोदराभ्यां गर्भलिङ्गानि वीक्ष्य सा जातगर्भा इत्यलक्ष्यत। ज्यायसस्तु मनसि शङ्का जाता–'यदियं खलु कनीयसोपभुक्ता' इति, शङ्कनीयान्तराभवात्। यवीयसोऽपि समजनि विकल्पः–'नूनमेषा ज्यायसा सह विनष्टशीला' इति। एवं मिथः कलुषिताशयौ विहाय तामेकाकिनीं पृथक् पृथग् देशान्तरमयासिष्टाम्। साऽपि प्रवर्द्धमानगर्भा परमन्दिरेषु कर्माणि निर्मिमाणा प्राणवृत्तिमकरोत्। क्रमेण पूर्णेऽह्नि सर्वलक्षणलक्षिताङ्गं प्रासूत सुतम्। स च क्रमाद्वपुषा गुणैश्च वर्द्धमानः सवयोभिः सह रममाणो बालक्रीडया स्वयं भूपतीभूय तेभ्यो वाहनानि करितुरगरथादीनि कृत्रिमाणि दत्तवान्। इति सनोतेर्दानार्थत्वाल्लोकैः 'सातवाहनः' इति व्यपदेशं लम्भितः। स्वजनन्या पाल्यमानः सुखमवस्थितः।

इतश्चोज्जयिन्यां श्रीविक्रमादित्यस्यावन्तिनरेशितुः सदसि कश्चिन्नैमित्तिकः सातवाहनं प्रतिष्ठानपुरे भाविनं नरेन्द्रमादिशत्। अथैतस्यामेव पुर्यामेकः स्थविरविप्रः स्वायुरवसानं ज्ञात्वा चतुरः स्वतनयानाहूय प्रोक्तवान् यथा "वत्सा! मयि मृते मदीयशय्योच्छीर्षकदक्षिणपादादारभ्य चतुर्णामपि पादानामधोवर्त्तमानं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निधिकलशचतुष्टयं युष्माभिर्यथाज्येष्टं विभज्य ग्राह्यम्। येन भवतां निर्वाहः सम्पनिपद्यते।" पुत्रैस्तु तथेत्यादेशः स्वीचक्रे पितुः। तस्मिन्नुपरते तस्यौर्ध्वदेहिकं कृत्वा त्रयोदशेऽहनि भुवं खनित्वा यथायथं चतुरोऽपि निधिकलशास्ते जगृहिरे। यावदुद्घाट्य विलोकयन्ति तावत्प्रथमस्य कुम्भे कनकम्, द्वैतेयीकस्य कृष्णमृत्स्ना, तृतीयस्य बुशम्, तुरीयस्य त्वस्थीनि दद्दशिरे। तदनु ज्यायसा साकमितरे त्रयो विवदन्ते स्म–"तदस्मभ्यमपि विभज्य कनकं वितरेति।" तस्मिंश्चावितरति सति तेऽवन्तिपतेर्द्धर्माधिकारिणमुपस्थिषत। तत्रापि न तेषां वादनिर्णयः समपादि। ततश्चत्वारोऽपि महाराष्ट्रजनपदमुपानंसिषुः। सातवाहनकुमारस्तु कुलालमृदा हस्तिरथसुभटानन्वहं नवनवान्विदधानः कुलालशालायां बालक्रीडादुर्ललितकलितस्थितिरनयत् समयम्। ते च द्विजतनुजाः प्रतिष्ठानपत्तनमुपेत्य परतो भ्रमन्तस्तस्यामेव चक्रजीविनः शालायां तस्थिवांसः। सातवाहनस्तु तानवेक्ष्येङ्गिताकारकुशलः प्रोवाच–"भो विप्राः! किं भवन्तो वीक्षापन्ना इव वीक्ष्यन्ते?।" तैस्तु जगदे–"जगदेकसुभग! कथमिव वयं चिन्ताचान्तचेतसस्त्वया ज्ञाताः।" कुमारेण बभणे–"इङ्गितैः किमिव नावगम्यते।" तैरुक्तम्–"युक्तमेतत्। परं भवतः पुरो निवेदितेन चिन्ताहेतुना किं स्यात्?। बालः खलु भवान्।" बाल आलपत्–"यदि परं जातु मत्तोऽपि साध्यं वः सिध्यति, तन्निवेद्यतां स चिन्ताहेतुः?।" ततस्ते तद्वचनवैचित्र्यहृतहृदयाः सकलमपि स्वस्वरूपं निधिनिर्गम-

For Private And Personal

नादि मालवेशपरिषद्यपि विवादानिर्णयान्तं तस्मै निवेदितवन्तः। कुमारस्तु स्मितविच्छुरिताधरोऽवादीद्- "भो ! विप्राः ! अहं यौष्माकं झगटकं निर्णयामि श्रूयतामवहितैः। यस्मै वप्ता कनककलशं प्रददे, स तेनैव निवृत्तोऽस्तु। यस्य कलशे कृष्णमृत्स्ना निरगात् स क्षेत्रकेदारादीन् गृह्णातु। यस्य तु बुशं स कोष्टागारगतधान्यानि सर्वाण्यपि स्वीकुरुताम्। यस्य चास्थीनि निरगुः सोऽश्वमहिषीदासीदासादिकमुपादत्ताम्। इति युष्मज्जनकस्याशयः।" इति क्षीरकण्ठोक्तं श्रुत्वा सूत्रकण्ठाः छिन्नवादाः तद्वचनं प्रतिश्रुत्य तमनुज्ञाप्य प्रत्याययुः स्वां नगरीम्। प्रथिता सा तद्विवादनिर्णयकथा पुर्याम्। राज्ञाप्याकार्य ते पर्यनुयुक्ताः—"किंनु भो ! भवतां वादनिर्णयो जातः ?।" तैरुक्तम्—"ओम् स्वामिन्।" "केन निर्णीतः ?" इति नृपेणोदिते ते सातवाहनस्वरूपं सर्वमवितथमकथयत्। तदाकर्ण्य तस्य शिशोरपि बुद्धिवैभवं विभाव्य प्रागुक्तं दैवज्ञेन तस्य प्रतिष्ठाने राज्यं च भविष्यतीत्यनुस्मृत्य तं स्वप्रतिपन्थिनमाकलय्य क्षुभितमनास्तन्मारणोपायमचिन्तयत् चिरं नरेश्वरः। अभिघातकरादिप्रयोगैर्मारिते चास्मिन्नयशःक्षात्रवृत्तिक्षती जायेतामिति विचार्य सन्नद्धचतुरङ्गचमूसमूहोऽवन्तिपतिः प्रस्थाय प्रतिष्ठानपत्तनं यथेष्टमवेष्टयत्। तदवलोक्य ते ग्राम्यास्त्रस्ताश्चिन्तयन्ति स्म-"कस्योपरि अयमेतावानाटोपः सकोपस्य मालवेशस्य। न तावदत्र राजा राजन्यो वा वीरस्तादृग्दुर्गादि वा।" इति चिन्तयत्सु तेषु मालवेशप्रहितो दूतः समेत्य सातवाहनम-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वोचत्–" भोः कुमारक ! तुभ्यं नृपः क्रुद्धः । प्रातस्त्वां मारयिष्यति । अतो युद्धाद्युपायचिन्तनावहितेन भवता भाव्यमिति ।" स च श्रुत्वाऽपि दूतोक्तीर्निर्भयं निरन्तरं क्रीडन्नेवास्ते । अत्रान्तरे विदितपरमार्थौ तौ तन्मातुलावितरेतरं प्रति विगतदुर्विकल्पौ पुनः प्रतिष्ठानमागतौ । परचक्रं दृष्ट्वा तां स्वभगिनीं प्रोचतुः–" हे स्वसर्येन दिवौकसा तवायं तनयो दत्तस्तमेव स्मर। यथा स एवास्य साहायकं विधत्ते।" साऽपि तद्वचसा प्राचीनं नागपतेर्वचः स्मृत्वा शिरसि निवेशितघटा गोदावर्यां नागह्रदं गत्वा स्नात्वा च तमेव नागनायकमाराधयत्। तत्क्षणान्नागराजः प्रत्यक्षीभूय वाचमुवाच–"ब्राह्मणि! को हेतुरहमनुस्मृतस्त्वया।" तया च प्रणम्य यथावस्थितमभिहिते बभाषे शेषराजः–"मयि पत्यौ कस्तव तनयमभिभवितुं क्षमः?।" इत्युदीर्य घटमादाय ह्रदान्ते निमज्ज्य पीयूषकुण्डात्सुधया घटं प्रपूर्य च तस्यै दत्तः। त्वं चानेनामृतेन सातवाहनकृतमृन्मयाश्वरथगजपदातिजातमभिषिञ्चेः । यथा तत्सजीवं भूत्वा परबलं भनक्ति । त्वत्पुत्रं च प्रतिष्ठानपत्तनराज्ये अयमेव पीयूषघटोऽभिषेकयिष्यति । प्रस्तावे पुनः स्मरणीयोऽहमित्युक्त्वा स्वास्पदमगमद् भुजङ्गपुङ्गवः। साऽपि सुधाघटमादाय स्वसद्मोपेत्य तेन तन्मृन्मयं सैन्यमदैन्यमभ्युक्षामास । प्रातर्दिव्यानुभावतः सचेतनीभूय तत्सैन्यसंमुखं गत्वा युयुधे परानीकिन्या सार्द्धम् । तया सातवाहनपृतनया भग्नमवन्तीशितुर्बलम् । विक्रमनरपतिरपि पलाय्य ययाववन्तीम् । तदनु सातवाहनो राज्येऽभिषिक्तः । प्रतिष्ठानं च निज-

निजविभूतिपरिभूतवस्त्वौकसाराभिधानं धवलगृह-देवगृह-हट्टपङ्क्ति-राजपथ-प्राकार-परिखादिभिः सुनिविष्टमजनिष्ट पत्तनम् । सातवाहनोऽपि क्रमेण दक्षिणापथमनृणं विधाय तापीतीरपर्यन्तं चोतरापथं साधयित्वा स्वकीयसंवत्सरं प्रावीवृतत् । जैनश्च समजनि । अचीकरच जनितजननयनशैत्यानि चैत्यानि । पञ्चाशद्वीरा अपि । प्रत्येकं स्वस्वनामाङ्कितानि अन्तर्नगरं कारयांबभूवुर्जिनभवनानि । परसमयलोकप्रसिद्धं सातवाहनचरित्रं शेषमपि किञ्चिदुच्यते–" श्रीसातवाहने क्षितिरक्षति सति पञ्चाशद्वीराः प्रतिष्ठाननगरान्तस्तदा वसन्ति स्म पञ्चाशन्नगराद्बहिः । इतश्च तत्रैव पुरे एकस्य द्विजस्य सूनुर्दर्प्पोद्धुरः शूद्रकाख्यः समजनि । स च युद्धश्रमं दर्प्पात् कुर्वाणः पित्रा स्वकुलानुचितमिदमिति प्रतिषिद्धोऽपि नास्थात् । अन्येद्युः सातवाहननृपतिर्बापलाखूंदलादिपुरान्तर्वर्त्तिवीरपञ्चाशदन्वितो द्विपञ्चाशद्धस्तप्रमाणां शिलां श्रमार्थमुत्पाटयन् दृष्टः पित्रा समं गच्छता द्वादशाब्ददेशीयेन शूद्रकेण । केनापि वीरेणाङ्गुलीचतुष्टयं केनचित्षडङ्गुलान्यपरेणत्वङ्गुलान्यष्टौ शिलाभूमित उत्पाटिता महीपतिना त्वाजानु नीता । इत्यवलोक्य शूद्रकः स्फूर्जदूर्जितमवादीत्–" भोः ! भोः ! भवत्सु मध्ये किं शिलामिमा मस्तकं यावन्न कश्चिदुद्धर्त्तुं समर्थः ? । तेऽपि सेर्ष्यमवादिषुर्यथा–" त्वमेवोत्पाटय यदि समर्थमन्योऽसि । " शूद्रकस्तदाकर्ण्य तां शिलां वियति तथोच्छालयांचकार । यथा दूरमुर्ध्वमगमत् । पुनरवादिशूद्रकेण–" यो भवत्सु अलंभूष्णुः स खलु इमां निपतन्तीं स्तभ्नातु । "

For Private And Personal

सातवाहनादिवीरैर्भयाद् भ्रान्तलोचनैरूचे स एव सानुनयम्–" यथा भो ! महाबल ! रक्ष २। अस्माकीनान् प्राणान् इति।" स पुनस्तां पतयालुं तथा मुष्टिप्रहारेण प्रहतवान् , यथा सा त्रिखण्डमन्वभूत्। तत्रैकं शकलं योजनत्रयोपरि न्यपतत्। द्वैतीयिकं च खण्डं नागहृदे। तृतीयं तु प्रतोलीद्वारे चतुष्पथमध्ये निपतितमद्यापि तथैव वीक्ष्यमाणमास्ते जनैः। तद्बलविलसितचमत्कृतचेताः क्षोणिनेता शूद्रकं सुतरां सत्कृत्य पुरारक्षकमकरोत्। शस्त्रान्तराणि प्रतिषिध्य दण्डधारस्तस्य दण्डमेवायुधमन्वज्ञासीत्। शूद्रको बहिश्चरान् वीरान् पुरमध्ये प्रवेष्टुमपि न दत्तवान् , अनर्थनिवारणार्थं। अन्यदा स्वसौधस्योपरितले शयानः सातवाहनक्षितिपतिर्मध्यरात्रे शरीरचिन्तार्थमुत्थितः। पुराद्बहिःपरिसरे करुणं रुदितमाकर्ण्य तत्प्रवृत्तिमुपलब्धुं कृपाणपाणिः परदुःखदुःखितहृदयतया गृहान्निरगात्। अन्तराले शूद्रकेणावलोक्य सप्रश्रयं प्रणतः पृष्टश्च महानिशायां निर्गमनकारणम्। धरणीपतिरवदत्–"यदयं बहिःपुरपरिसरे करुणक्रन्दितध्वनिः श्रवणाध्वनि पथिकभावमनुभवन्नस्ति। तत्कारणप्रवृत्तिं ज्ञातुं व्रजन्नस्मि।" इति राज्ञोक्ते शूद्रको व्यजिज्ञपत्–"देव ! प्रतीक्ष्यपादैः स्वसौधालङ्करणाय पादोऽवधार्यताम्। अहमपि प्रवृत्तिमानेष्यामि।" इत्यभिधाय वसुधानायकं व्यावर्त्य स्वयं रुदितध्वन्यनुसारेण पुराद्बहिर्गन्तुं प्रवृत्तः। पुरस्ताद् व्रजन् दत्तकर्णो गोदावर्याः स्रोतसि कञ्चन रुदन्तमश्रौषीत्। ततः परिकरबन्धं विधाय शूद्रकस्तीर्त्वा यावत्सरितो मध्यं प्रयाति। तावत्पयःपूरप्लाव्यमानं

नरमेकं रुदन्तं वीक्ष्य बभाषे–" भोः ! कस्त्वम् ? । किमर्थं च रोदिषि ।" इत्यभिहितः स नितरामरुदत् । इति निर्बन्धेन पुनः स्पष्टमाचष्ट–" भो ! साहसिकशिरोमणे ! मामितो निष्कास्य भूपतेः समीपं प्रापय । येन तत्र स्ववृत्तमाचक्षे ।" इत्युक्तः शूद्रकस्तमुत्पाटयितुं यावद्यतिष्ट तावन्नोत्पटति स्मः स । ततोऽधस्तात्केनापि यादसा विधृतोऽयं भवेद् । इत्याशङ्क्य सद्यः कृपाणिकामधो वाहयामास शूद्रकः । तदनु शिरोमात्रमेव शूद्रकस्योद्धर्त्तुः करतलमारोहत् । लघुतया शिरःप्रक्षरद्रुधिरधारमवलोक्य शूद्रको विषादमापन्नश्चिन्तयति स्म–" धिग् मामप्रहर्तरि प्रहर्त्तारं शरणागतघातकं च ।" इत्यात्मानं निन्दन् वज्राहत इव क्षणं मूर्च्छितस्तस्थौ । तदनु समधिगतचैतन्यश्चिरमचिन्तयत्—" कथमिवैतत्सुदुश्चेष्टितमवनिपतये निवेदयिष्यामि ।" इति लज्जितमनास्तत्रैव काष्ठैश्चितां विरचय्य तत्र ज्वलनं प्रज्वाल्यैतच्छिरः सह गृहीत्वा यावदुदर्चिषि प्रवेष्टुं प्रववृत्ते । तावत्तेन मस्तकेन निजगादे–" भो महापुरुष ! किमर्थमित्थं करोषि । अहं शिरोमात्रमेवास्मि राहुवत्सदा । तद्वृथा मा विषीद । प्रसीद । मां राज्ञः समीपमुपनय ।" इति तद्वचनं निशम्य चमत्कृतचित्तः प्राणित्ययमिति प्रहृष्टः शूद्रकस्तच्छिरः पट्टांशुकवेष्टितं विधाय प्रातः सातवाहनमुपागमत् । अपृच्छत् पृथिवीनाथः–" शूद्रक ! किमिदम् ? ।" सोऽप्यवोचत्–" देव ! सोऽयं यस्य क्रन्दितध्वनिर्देवेन रात्रौ शुश्रुवे ।" इत्युक्त्वा तस्य प्रागुक्तं वृत्तं सकलमावेदयत् । पुना राजा तमेव मस्तकमप्राक्षीत्–"कस्त्वम् ?।

भोः किमर्थं चात्र भवदागमनमिति ।" तेनाभिदधे—" महाराज ! भवतः कीर्तिमाकर्ण्य करुणरुदितव्याजेनात्मानं ज्ञापयित्वा अहमुपागमम् । दृष्टश्च भवान् । कृतार्थे मेऽद्य चक्षुषी जाते इति ।" कां कलां सम्यगवगच्छसि ? इति राज्ञ आज्ञया निरवगीतं गीतं गातुं प्रचक्रमे । क्रमेण तद्गानकलया मोहिता सकलापि नृपतिप्रमुखा परिषत् । स च मायासुरनामको सुरस्तां मायां निर्माय महीपतेर्महिषीं महनीयरूपधेयामपजिहीर्षुरुपागतो बभूव । न च विदितचरमेतत्कस्यापि । लोकैस्तु शीर्षमात्रदर्शनात् तस्य प्राकृतभाषया सीसुला इति व्यपदेशः कृतः । तदनु प्रतिदिनं तस्मिन्नतितुम्बरौ मधुरस्वरं गायति सति श्रुतं तत्स्वरूपं महादेव्या दासीमुखेन । भूपं विज्ञाप्य तच्छीर्षं स्वान्तिकमानायितम् । प्रत्यहं तमजीगपत् राज्ञी दिनान्तरे रात्रौ । प्रस्तावमासाद्य सद्य एवापहरति स्म तां मायासुरः । आरोपयामास च तां घण्टावलम्बिनामनि स्वविमाने । राज्ञी च करुणं क्रन्दितुमारेभे—"हा ! अहं केनाप्यपह्रिये । अस्ति कोऽपि वीरः पृथिव्यां यो मां मोचयति ।" तच्च खून्दलाभिख्येन वीरेण श्रुत्वा व्योमन्युत्पत्य च तद्विमानस्य घण्टा पाणिना गाढमधार्यत । ततस्तत्पाणिनावष्टब्धं विमानं पुरस्तान्न प्राचालीत् । तदनु चिन्तितं मायासुरेण—"किमर्थं विमानमेतन्न सर्पति ।" यावदद्राक्षीत्तं वीरं हस्तावलम्बितघण्टं । ततः खड्गेन तद्धस्तमच्छिदत् । पतितः पृथिव्यां वीरः । स चासुरः पुरः प्राचलत् । ततो विदितदेव्यपहारवृत्तान्तः क्षितिकान्तः पञ्चाशतमेकोनां वीरानादिशत्—"यत्पट्टदेव्याः शुद्धिः क्रियतां

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

केनेयमपहृतेति।" ते प्रागपि शूद्रकं प्रत्यसूयापराः प्रोचुः–"महाराज ! शूद्रक एवजानीते। तेनैव तच्छीर्षकमानीतम्। तेनैव देवी जह्रे।" ततो नृपतिस्तस्मै कुपितः शूलारोपणमाज्ञापयत्। तदनु देशरीतिवशात्तं रक्तचन्दनानुलिप्ताङ्गं शकटे शाययित्वा तेन सह गाढं बद्ध्वा शूलायै यावद्राजपुरुषाश्चेलुः। तावत्पश्चाशदपि वीराः संभूय शूद्रकमवोचन्–"भोः! महावीर! किमर्थं रण्डेव म्रियसे भवान्। अशुभस्य कालहरणमिति न्यायात् मार्गय नरेन्द्रात्कतिपयदिनावधिम्। शोधय सर्वत्र देव्यपहारिणम्। किमकाण्डे एव स्वकीयां वीरत्वकीर्त्तिमपनयसि !" तेनोक्तम्–"गम्यतां तर्हि उपराजम्। विज्ञाप्यतामेतदर्थं राजा।" तैरपि तथा कृते प्रत्यानायितः शूद्रकः क्षितीन्द्रेण। तेनापि स्वमुखेन विज्ञप्तिः कृता–"महाराज ! दीयतामवधिः। येन विजिनोमि प्रतिदिशं देवीं तदपहारिणं च।" राज्ञा द्विनदशकमवधिर्दत्तः। शूद्रकगृहे च सारमेयद्वयमासीत् तत्सहचारि। नृपतिरवदत्–"एतद्भषणयुगलं प्रतिभूप्रायमस्मत्पार्श्वे मुञ्च। स्वयं पुनर्भवान् देव्युदन्तोपलब्धये हिण्डतां महीमण्डलम्।" सोऽप्यादेशः प्रमाणमित्युदीर्य प्रवर्धितवान् प्रतस्थे। भूचक्रशक्रस्तत्कौलेयकद्वन्द्वं शृङ्खलाबद्धं शय्यापादेऽबध्नीत्। शूद्रकस्तु परितः पर्यटत्। अब्दमात्रोऽपि यावत्प्रस्तुतार्थस्य वार्त्तामात्रमपि क्वापि नोपलेभे। तावदचिन्तयत्–"अहो! ममेदमयशः प्रादुरभूत्। यदयं स्वामिद्रोही भूत्वा देवीमपाजीहरदिति। न च क्वापि शुद्धिर्लब्धा तस्याः। तस्मान्मरणमेव मम शरणम्।" इति विमृश्य दारुभिश्चितामरचयत्।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ज्वलनं चाज्वालयत् । यावन्मध्यं प्राविशत् तावत्ताभ्यां शुनकाभ्यां देवताधिष्ठिताभ्यां ज्ञातम्–"यदस्मदधिपतिर्निधनं वाञ्छलस्तीति ।" ततो दैवतशक्त्या शृङ्खलानि भङ्क्त्वा निर्विलम्बौ गतौ तत्र तौ । यत्रासीच्छूद्रकरचिता चिता । दशनैः केशानाकृष्य शूद्रकं बहिर्निष्कासयामास । तेनापि अकस्मात्तौ विलोक्य विस्मितमनसा निजगदे–"र पापीयांसौ किमेतत्कृतं भवद्भ्यामशुभवद्भ्याम् ? । राज्ञा मनसि विश्वासनिरासो भविष्यति । यत्प्रतिभुवावपि तेनात्मना सह नीतौ ।" भषणाभ्यां बभाषे–"धीरो भव । अस्मद्दर्शितां दिशमनुसर सरभसम् । का चिन्ता तव ।" इत्यभिधाय पुरोभूय प्रस्थितौ तेन सार्द्धम् । क्रमात्प्राप्तौ कोल्लापुरम् । तत्रस्थं महालक्ष्मीदेव्या भवनं प्रविष्टौ । तत्र शूद्रकस्तां देवीमभ्यर्च्य कुशसंस्तरासीनस्त्रिरात्रमुपावसत् । तदनु प्रत्यक्षीभूय भगवती महालक्ष्मीस्तमपोचत्–"वत्स ! किं मृगयसे ? ।" शूद्रकेणोक्तम्–"स्वामिनि ! सातवाहनमहीपालमहिष्याः शुद्धिं वद । कास्ते केनापहृता ।" श्रीदेव्योदितम्–"सर्वान् यक्षराक्षसभूतादिदेवगणान् संमील्य तत्प्रवृत्तिमहं निवेदयिष्यामि । परं तेषां कृते त्वया बल्युपहारादि प्रगुणीकृत्य धार्यम् । यावच्च ते कणेहत्य बल्यादि उपभुज्य प्रीता न भवेयुस्तावत्त्वया विघ्ना रक्षणीयाः । " ततः शूद्रको देवतानां तर्पणार्थं कुण्डं विरचय्य होममारेभे । मिलिताः सकलदैवतगणाः । स्वां स्वां भुक्तिमग्निमुखेन जगृहिरे । तावत्तद्धोमधूमः प्रसृमरः प्राप तत्स्थानम् । यत्र मायासुरोऽभूत् । तेनापि ज्ञानलक्ष्म्यादिष्टशूद्रकहोमस्वरूपेण

For Private And Personal

प्रेषितः स्वभ्राता कोल्लासुरनामा होमप्रत्यूहकरणाय। समागतश्च वियति कोल्लासुरः स्वसेनया समम्। दृष्टःस्वदैवतगणैः। चकितं च तैः। ततो भषणौ दिव्यशक्त्या युयुधाते दैत्यैः सह। क्रमान्मारितौ च तौ दैत्यैः। ततः शूद्रकः स्वयं योद्धुं प्रावृतत्। क्रमेण दण्डव्यतिरिक्तप्रहरणान्तराभावाद्दण्डेनैव बहून्निधनं नीतवानसुरान्। ततो दक्षिणबाहुं दैत्यास्तस्य चिच्छिदुः। पुनर्वामदोष्णैव दण्डयुद्धमकरोत्। तस्मिन्नपि छिन्ने दक्षिणांह्रिणोपात्तदण्डो योद्धुं लग्नः। तत्रापि दैत्यैर्लूने वामपादात्तयष्टिरयुध्यत। तमपि क्रमादच्छिदन्नसुराः। ततो दन्तैर्दण्डमादाय युयुधे। ततस्तैर्मस्तकमच्छेदि। अथाकण्ठतृप्तादैवतगणास्तं शूद्रकं भूमिपतितशिरस्कं दृष्ट्वा अहोऽस्मद्भुक्तिदातुर्वराकस्यास्य किं जातम्?। इति परितप्य योद्धुं प्रवृत्ताः कोल्लासुरममारयत्। ततः श्रीदेव्याऽमृतेनाभिषिच्य पुनरनुसंहिताङ्गश्चक्रे। शूद्रकः प्रत्युज्जीवितश्च सारमेयावपि पुनर्जीवितौ। देवी च प्रसन्ना सती तस्मै खड्गरत्नं प्रादात्। अनेन त्वमजय्यो भविष्यसीति च वरं व्यतरत्। ततो महालक्ष्म्यादिदैवतगणैः सह सातवाहनदेव्याः शुध्यर्थं समग्रमपि भुवनं परिभ्रम्य प्राप्तः शूद्रको महार्णवम्। तत्र चैकं वटतरुमुच्चैस्तरं निरीक्ष्य विश्रामार्थमारुरोह यावत्। तावत्पश्यति तच्छाखायां लम्बमानमधः शिरसं काष्ठकिलिकाप्रवेशितोऽर्द्धपादं पुरुषमेकम्। स च प्रसारितजिह्वोऽन्तर्नीरं विचरतो जलचरादीन् भक्षयन् वीक्षितस्तैः। पृष्टश्च शूद्रकेण—"कस्त्वं?। किमर्थं चेत्थं लम्बितोऽसि?।" तेनोक्तम्—"अहं मायासुरस्य कनिष्ठो

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भ्राता स च मदनोन्मदिष्णुर्मदग्रजः प्रतिष्ठानाधिपतेः सातवाहनस्य नृपतेर्महिषीं वांछनपाहरत् सीतामिव दशवदनः । सा च पतिव्रता तन्नेच्छति । तदनुप्रोक्तो अग्रजन्मा—" न युज्यते परदाराऽपहरणं तव ।

किङ्क्रमाक्रान्तविश्वोऽपि परस्त्रीषु रिरंसया । कृत्वा कुलक्षयं प्राप नरकं दशकन्धरः ॥ १ ॥

इत्यादिवाग्भिर्निषिद्धः क्रुद्धो मह्यं मायासुरोऽस्यां वटशाखायां टंकित्वा मामित्थं व्यडम्बयत् । अहं च प्रसारितवदनः समुद्भ्रान्तः संचरतो जलचरादीनभ्यवहरन्प्राणयात्रां करोमि ।" इति श्रुत्वा शूद्रकोऽप्यभाणीत्—"अहं तस्यैव महीभृतो भृत्यः शूद्रकनामा तामेव देवीमन्वेष्टुमागतोऽस्मि ।" तेनोक्तम्—" एवं चेत्तर्हि मां मोचय । यथाऽहं सह भूत्वा तं दर्शयामि तां च देवीम् । तेन स्वस्थानं परितो जातुषं दुर्गं कारितमस्ति । तत्र निरन्तरं प्रज्वलद्वास्ति ततो दुर्लङ्घ्यम् । तन्मध्ये प्रविश्य तं निपात्य देवी प्रत्याहर्तव्या ।" इत्याकर्ण्य शूद्रकस्तेन कृपाणेन तत्काष्ठबन्धनानि छित्त्वा तं पुरोधाय दैवतगणपरिवृत्तः प्रस्थाय प्राकारमुल्लंघ्य तत्स्थानान्तः प्राविशत् । दैवतगणांश्चालोक्य मायासुरः स्वसैन्यं युद्धाय प्रजिधाय । तस्मिन्पश्चतामश्चिते स्वयं योद्धुमुपतस्थौ । ततः क्रमेण शूद्रकस्तेनासिना तमवधीत् । ततो घण्टावलम्बिविमानमारोप्य देवीं दैवतगणैः सह प्रस्थितः प्रतिष्ठानं प्रति । इतश्च दशमं दिनमवधीकृतमागतमवगत्य जगत्यधिपतिर्ध्यातवान्—"अहो मम न महादेवी न च शूद्रकवीरो न चापि तौ रसनालिहौ सर्वं मयैव कुबुद्धिना विनाशितम् ।" इति शोचनात्स-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

परिच्छद एव प्राणत्यागचिकीः पुराद्बहिश्चितामरचयचन्दनादिदारुभिः । यावत्क्षणादाशुशुक्षणिं क्षेप्स्यति परिजनश्चितायाम् । तावद्वर्धापक एको देवगणमध्यात्समायासीद् । व्यजिज्ञपच्च सप्रश्रयम्–" देव ! दिष्ट्या वर्द्धसे महादेव्यागमनेन । तन्निशम्य श्रवणरम्यं नरेश्वरः स्फुरदानन्दकन्दलितहृदय ऊर्ध्वमवलोकयन्नाकुलोके नभसि दैवतगणं शूद्रकं च । अयमपि विमानादवतीर्य राज्ञः पादोरपतत् महादेवी च । अभिनन्द्य सानन्दं मेदिनीन्दुः शूद्रकम् । राज्यार्द्धं तस्मै आदिशत् । सोत्सवमन्तर्नगरं प्रविश्य शूद्रककृतानुचरितः नव महिम्ना राज्यश्रियमुपबुभुजे महाभुजः । तस्य च सातवाहनस्य चन्द्रलेखाद्याः पञ्चशतानि पत्न्यः सर्वा अपि षड्भाषाकवित्वविदः । राजा पुनरनधीतव्याकरणः । आगत उष्णकालः । आरब्धा जलकेलिः । चन्द्रलेखा तु शीतालुः शीतं न सहते । नृपस्तु प्रेम्णा शृङ्गकजलैस्तामनवरतं सिञ्चति । ततः सा संस्कृतेन प्राह–" देव ! मां मोदकैः पूरय । हालस्तु तत्संस्कृततत्त्वमनवगच्छन् मोदकनाम श्रुत्वा दास्याः पार्श्वान्मोदकपटलिकामानीनयत् । चन्द्रलेखा तां दृष्ट्वा पतिमतिभ्रमदर्शनादहसीत् । अहो ! महाराजस्य शास्त्रोक्तेजितमतिव्यापः । राज्ञाप्युपहासो ज्ञातः । पृष्टा राज्ञी–" किमर्थं वयमुपहस्यामहे । " राज्ञी जगाद–" अन्यार्थस्थानेऽन्यार्थावबोधाद् हसितोऽसि प्रिय ! । लज्जितो राजा । सद्यो विधार्थं भारतीं त्रिरात्रोपवासेनाराध्य प्रत्यक्षीकृत्य तद्वरान्महाकविर्भूत्वा सारस्वतव्याकरणादिशास्त्रशतान्यचीकरत् । तस्येश्वरस्य गणकृत्वो भारती देव-

For Private And Personal

तावसरेऽवतीर्याह (?)। एकदा भारतीमभ्यर्थयत्,–"सकलमपि पुरं आवर्षमार्द्धं अहः कविरूपं भवतु।" तथैव कृतं देव्या। एकस्मिन् दिने दशकोट्यो गाथाः सम्पन्नाः। सातवाहनकशास्त्रं तत्कृतम्। तस्य चोर्वीपतेः खरमुखो नाम दण्डनाथः शूरो भक्तः प्राज्ञः पुण्याढ्यः आरम्भसिद्धः। एकदा हालेनादिष्टं खरमुखाय–"मधुरां लाहि।" आदेशः प्रमाणमित्युक्त्वा बहिर्व्यापारिणां पार्श्वमेत्य राजादेशमचकथत्। व्यापारिभिः प्रोक्तम्–"खरमुख! द्वे मधुरे स्तः। एका दक्षिणमधुरा पाण्डवकृता। अपरा पूर्वमधुरा यदुगोष्ठे कृष्णः समुत्पन्नः यत्र वृन्दावनादीनि वनानि। द्वयोर्मध्यात्का मधुरा ग्राह्येति पृच्छ।" खरमुखेनोक्तम्–"प्रतापमार्तण्डं तं कः प्रष्टुमीष्टे। वक्ष्यति हि रे मम चेतो न जानीथ। तस्य प्रकोपः सद्यः प्राणहरः। द्वे अपि मधुरे ग्रहीष्यामः। सैन्यं द्विखण्डं कृत्वा द्वे मधुरे एकस्मिन्नेव मध्याह्ने खरमुखेन जगृहाते। तत्पुरीद्वयग्रहणवर्द्धापनिकामुखौ द्वौ नरौ आयातौ। यावत्प्रमोदात्तौ नृपतिरालपति तावत्तृतीय एक आगात्। स उवाच–देव! भवत्कार्याप्यमाणजैनप्रासादभूमितलेऽक्षयो निधिः प्रादुर्बभूव दिष्ट्या। यावत्तदभिमुखमीक्षते। तावदेव दासी प्रेमसञ्जूषा शुद्धान्तादायासीत्। स्वामिन्! देव्या चन्द्रलेखया सर्वाङ्गलक्षणः सुतो जातः। चतस्रोऽपि वर्द्धापनिका दत्ता क्ष्मापालेन। तेन प्रमोदेनास्य महोन्माद उत्पन्नः। ततो मेलयित्वा लोकं हयारूढो गोदावरीतीरमुपेत्य तां जगाद तारतरस्वरम्—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सव्वं भण गोदावरि पुव्वसमुद्देण साहिया संती । सालाहणकुलसरिसं जइ ते कूले कुलं अत्थि ॥१॥
उत्तरउ हिमवंतो दाहिणउ सालवाहणराया । समभारभरकंता तेण न पल्लत्थए पुहवी ॥ २ ॥
तादृशं तस्य गर्वमीक्षमाणमहामन्त्रिणोऽन्योन्यं मन्त्रयामासुः–"नृपः श्रिया तरलितः ।
जितश्चेत्पुरुषो लक्ष्म्या, हृतं लोकद्वयं ततः । जिता चेत्पुरुषेणैषा जितं लोकद्वयं ततः ॥ १ ॥
तस्मादस्य दुःखोत्पादनेन मदगदोच्छेदः कर्त्तुमर्हः ।" इत्यालोच्य राजानं व्यजिज्ञपत्–" देव ! ललाटंतपतपनः कालः भोजनावसरो वर्त्तते । पादोऽवधार्यतां सौधायेत्युदित्वा सौधमानैषुः । तत्रापि मदात् स्तम्भादीनि कुट्टयति । ततो मन्त्रिभिः खरमुखं वीरोत्तंसं छन्नीकृत्य राज्ञे उक्तम्–" देव ! खरमुखः सद्यो व्याधिना यामगमत् ।" अथ तच्छ्रवणे क्ष्मापो दुःखाच्छोकान्मदमहासीत् । शोकात्तु वैकल्पमचकलत् । अथामात्यैर्विज्ञप्तम्–" प्रजेश्वर ! विदेशादायातैर्मूलजीवनविदुरैः खरमुखो जीवितः । यद्यादेशः स्यात् तदा पदकमलयुगलतले लोठ्यते ।" इत्युक्ते सुस्थो जातः । दृष्टः खरमुखः । सुष्ठु तुष्टो राजा । एवं तस्योदयः । अन्यदाऽसौ गोदावरीतीरे क्रीडति । तदैकमीनेन जलाद्बहिर्मुखं निष्कास्य हसितः । भीतश्चमुत्कृतश्च भूपः । रात्रौ ध्यानाकृष्टाऽऽयाता ब्राह्मी पृष्टा–" देवि ! मीनः किमर्थं हसति ? ।" आह स्याह–" वत्स ! प्राग्भवे त्वं अत्रैव पुरे काष्ठभारहारक आसीः । स च मध्याह्ने काष्ठकष्टार्जितधनक्रीतान् सक्तून् उष्णोदकविलो-

For Private And Personal

डितान् मासक्षपणिकक्षये मुदा ददे । तेन पुण्येन त्वं भूपोऽभूत् । तदेकस्तत्रत्यो व्यन्तरो वेत्ति । तेन मीने सङ्क्रम्य हसितं त्वया दृष्टम् ।" राजाह–"हास्यस्य को भावः ? ।" ब्राह्मी वक्ति अयं भावः–"अयं दानादाप्तऋद्धिः पुनर्दाने मन्दादरः । धिगात्मकार्यमूढं जीवलोकमिति ।" सातवाहनो जल्पति–"तस्य व्यन्तरस्य मच्चर्चया किं कार्यं ? ।" ब्राह्म्याह–"प्राग्भवेऽयं तवैव सखाऽभूत् । तेन कृपणत्वात्किमपि न दत्तम् । केवलं त्वद्दत्तमेव किञ्चिदनुमोदितम् । तेन पुण्येन व्यन्तरत्वेनावतीर्णोऽयम् । ततस्त्वयि हितार्थित्वमस्य । मां च त्वन्मन्त्रिशक्तिसमाकृष्टिप्रत्यक्षां त्वन्मातृकल्पां जानाति ! ततस्तथाऽहसदिति विद्धि ।" तद्वृत्तान्तज्ञानादवनीशो वदान्यत्वं सुष्ठ्वाददे । ब्राह्मीश्रीदत्तशब्दवेधरससिद्धेरिच्छादानी मानी जैनः । इत्थंकारं नानाविधान्यवदातानि हालक्षितिपालस्य कियन्ति नाम वर्णयितुं पार्यन्ते । स्थापिता चानेन गोदावरीतीरे महालक्ष्मीः प्रासादे । अन्यान्यपि च यथार्हं दैवतानि निवेशितानि तत्तत्स्थानेषु । राज्यं प्राज्यं चिरं भुञ्जाने जगतीजानौ अन्यदा कश्चिद्दारुभारहारकः कस्याचिद्वणिजस्य वीथौ प्रत्यहं चारूकाणि दारूण्याहृत्य विक्रीणीते स्म । दिनान्तरे च तस्मिन्ननुपेयुषि वणिजा तद्भागिन्यापृष्टा–"किमर्थं भवद्भ्राताऽद्य नागतो मद्वीथ्याम् ।" तया बभणे–"श्रेष्ठिश्रेष्ठ ! मत्सोदर्यः स्वर्गेषु सम्प्रति प्रतिवसति ।" वणिगभणत्–"कथमिव ।" साऽवदत्–"कङ्कणबन्धादारभ्य विवाहप्रकरणे दिनचतुष्टयं नरः स्वर्गेष्विव वसन्तमात्मानं मन्यते

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तदुत्सवालोकनकौतूहलात् ।" तच्चाकर्ण्य राजाऽप्यचिन्तयत्–"अहो ! अहं स्वार्गेषु किं न वसामि । चतुर्षु चतुर्षु दिनेषु अनवरतं विवाहोत्सवमय एवास्थास्यामि ।" इति विचार्य चातुर्वर्ण्ये यां यां कन्यां युवतिं रूपशालिनीं पश्यति, वृणोति स्म । तां तां सोत्सवं पर्यणैषीत् । एवं च भूयस्यनेहसि गच्छति लोकैश्चिन्तितम्–"अहो ! कथं भाव्यमनपत्यैरेव सर्ववर्णैः स्थेयम् । सर्वाः कन्यास्तावद्राजैव विवोढा । योषिदभावे च कुतः सन्ततिरिति ।" एवं विषण्णेषु लोकेषु विवाहवाटिकानाम्नि ग्रामे वास्तव्य एको द्विजः पीठजां देवीमाराध्य व्यजिज्ञपत्–"भगवति ! कथं विवाहक्रमोऽस्मदपत्यानां भावीति ।" देव्योक्तम्–"भोः ! वाडव ! त्वद्भवनेऽहमात्मानं कन्यारूपं कृत्वाऽवतरिष्यामि । यदा मां राजा प्रार्थयते तदाऽहं तस्मै देया । शेषमहं करिष्ये ।" तथैव राजा तां रूपवतीं श्रुत्वा विप्रमयाचत । सोऽपि जगाद–"दत्ता मया । परं महाराज ! स्वयमत्रागत्य मत्कन्योद्वोढव्या ।" प्रतिपन्नं राज्ञा । गणकदत्ते लग्ने क्रमाद्विवाहाय प्रचलितः । प्राप्तश्च तं ग्रामं श्वशुरकुलमवनिपतिः । देशानुरोधाद्वधूवरयोरन्तराले जवनिका दत्ता । अञ्जलियुगन्धरीलाजैर्भृतः । लग्नवेलायां तिरस्करणीमपनीय यावदन्योऽन्यस्य शिरसि लाजान्वितरीतुं प्रवृत्तौ । तदनु किल हस्तमेलापो भविष्यतीति । तावद्राजा तां रौद्ररूपां राक्षसीमिवैक्षिष्ट । ते च लाजाः कठिनकर्करपाषाणरूपा राज्ञः शिरसि लगितुं लग्नाः । क्षितिपतिरपि किमपि विकृतमिदमिति विभावयन् पलायितः । तावत्सा पृष्ठलग्नाऽश्मश-

For Private And Personal

कलानि वर्षन्ती प्राप्ता ततो नरपतिर्नागह्रदे प्राविशन्निजजन्मभूमिम्। तत्रैव च निधनमानशे। अद्यापि सा पीठजा देवी प्रतोल्या बहिरास्ते निजप्रसादस्था। शूद्रकोऽपि क्रमेण कालिकादेव्याऽऽज्ञारूपं विकृत्य वापी प्रविष्टया करुणरसितेन विप्रलब्धस्तन्निष्कासनार्थं प्राविशत्। पतितस्य तस्य कूपागतस्य कूपद्वारे तिर्यक्पतनाच्छिन्नाङ्गः पञ्चतामानश्च। महालक्ष्म्या हि वरवितरणावसरेऽस्माद्देवखड्गात्तन्मरणं भावीत्यादिष्टमासीत्। ततः शक्तिकुमारो राज्येऽभिषिक्तः। सातवाहनस्य निर्गमनान्तरमद्यापि राजा न कश्चित्प्रतिष्ठाने प्रविशति वीरक्षेत्रत्वात्। अत्र च यदसद्भाव्यं क्वचिद् गर्भे। तत्र परसमय एव मन्तव्यो हेतुः। यन्नासङ्गलवाग्जनो जैनः। श्रीवीरे शिवं गते ४७० विक्रमार्को राजाऽभवत्। तत्कालीनोऽयं सातवाहनस्तत्प्रतिपक्षत्वात्। यस्तु कालिकाचार्यपार्श्वात् पर्युषणामेकेनाह्ना अर्वागानाययत्, सोऽन्यः सातवाहन इति सम्भाव्यते। अन्यथा—

नवसयतेणउएहिं समइक्कंतेहिं वीरमुक्खाओ। पज्जोसवणचउत्थी कालयसूरेहिंतो ठविआ ॥ १ ॥

इति चिरन्तनगाथाविरोधप्रसङ्गात्। न च सातवाहनक्रमिकः सातवाहन इति विरुद्धम्। भोजपदे बहूनां भोजत्वेन। जनकपदे बहूनां जनकत्वेन रूढत्वात्।

॥ इति शालिवाहनप्रबन्धः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

(१९)

अथ वंकचूलप्रबन्धः—

पारेतजनपदान्तश्चर्मण्वत्यास्तटे महानद्याः । नानाघनवनगहना जयत्यसौ ढींपुरीति पुरी ॥ १ ॥

अत्रैव भारते वर्षे विमलयशा नाम भूपतिरभूत् । तस्य सुमङ्गलदेव्या सह विषयसुखमनुभवतः क्रमा-ज्जातमपत्ययुगलम् । तत्र पुत्रः पुष्पचूलः पुत्री पुष्पचूला । अनर्थसार्थमुत्पादयतः पुष्पचूलस्य कृतं लोकैर्वंकचूल इति नाम । महाजनोपलब्धेन राज्ञा रुषितेन निःसारितो नगराद्वंकचूलः । गच्छंश्च पथि पतितो भीषणायामटव्यां सह निजपरिजनेन स्वस्रा च स्नेहपरवशया । तत्र च क्षुत्पिपासार्दितो दृष्टो भिल्लैः नीतः स्वपल्ल्याम् । स्थापितश्च मृतपूर्वपल्लीपतिपदे । पर्यपालयद्राज्यम् । अलुण्टयद् ग्रामनगरसार्थादीन् । अन्यदा सुस्थिताचार्या अर्बुदाचलादष्टापदयात्रायै प्रस्थितास्तामेव सिंहगुहां नाम पल्लीं सगच्छाः प्रापुः । जातश्च वर्षाकालः । अजनि पृथिवी जीवाकुला । साधुभिः सहालोच्य मार्गयित्वा वंकचूलाद्वसतिं स्थिता तत्रैव सूरयः । तेन च प्रथममेव व्यवस्था कृता—"मम सीमान्तर्धर्मकथा न कथनीया । यतो युष्मत्कथायां अहिंसादिको धर्मः । न चैवं मम लोको निर्वहति ।" एवमस्तु इति प्रतिपद्य तस्थुरुपाश्रये गुरवः । वंकचूलेनाहूय सर्वे प्रधानपुरुषा भणिताः—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

"अहं राजपुत्रस्तन्मत्समीपे ब्राह्मणादय आगमिष्यन्ति। ततो भवद्भिर्जीववधो मांसभक्ष्यादिप्रसङ्गश्च पल्ल्या मध्ये न कर्त्तव्यः। एवं कृते यतीनामपि भक्तपानमजुगुप्सितं कल्पत इति।" तैस्तथैव कृतं यावच्चतुरो-मासान्। प्राप्तो विहारसमयः। अनुज्ञापितो वङ्कचूलः सूरिभिः—

"समणाणं सउणाणं भमरकुलाणं गोकुलाणं च। अनिअओ वसहीओ सारईआणं च मेहाणं ॥ १ ॥

इत्यादि वाक्यैः।" ततस्तैः सह चलितो वङ्कचूलः। स्वसीमां प्रापुषा तेन विज्ञप्तम्—"वयं परकीय-सीमां न प्रविशाम इति।" सूरिभिर्भणितः—"वयं सीमान्तरमुपेता ते किमप्युपदिशामस्तुभ्यं दाक्षिण्यात्।" तेनोक्तम्—"यन्मयि निर्वहति तदुपदेशेनानुगृह्यतामयं जनः।" ततः सूरिभिश्चत्वारो नियमा दत्ताः। तद्यथा "अज्ञातफलानि न भोक्तव्यानि १। सप्ताष्टानि पदान्यपसृत्य घातो देयः २। पट्टदेवी नाऽभिगन्त-व्या ३। काकमांसं न भक्षणीयमिति ४।" प्रतिपन्नास्तेन ते। गुरून् प्रणम्य स्वगृहमगमत्। अन्यदा गतः सार्थस्योपरि धाट्याम्। शकुनकारणान्नागतः सार्थः। त्रुटितं च तस्य पथ्यदनम्। पीडिताः क्षुधा राजन्याः। दृष्टश्च तैः किम्पाकतरुः फलितः। गृहीतानि फलानि। न जानन्ति ते नामधेयम्। इति तेन न भुक्तानि। इतरैः सर्वैर्बुभुजिरे। मृताश्च ते किम्पाकफलैः। ततश्चिन्तितं तेन—"अहो! नियमानां फलम्" तत एका-क्ययेवागतः पल्लीम्। रजन्यां प्रविष्टः स्वगृहम्। दृष्टा पुष्पचुला दीपालोकेन पुरुषवेषा निजपत्न्या सह प्रसुप्ता।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

जातश्च कोपस्तयोरुपरि । द्वावप्येतौ खड्गप्रहारेण छिनद्मि । इति यावदचिन्तयत्तावत्स्मृतो नियमः । ततः सप्ताष्टपदान्यपक्रम्य घातं ददत्; खाटकृतमुपरि खड्गेन । व्याहृतं स्वस्रा—"जीवतु वङ्कचूलः ।" इति तद्वचः श्रुत्वा लज्जितोऽसावपृच्छत्—"किमेतदिति ।" साऽपि नटवृत्तान्तमचीकथत्—"भ्रातर् ! अत्र प्रतिभूपतेर्नटवेषधराश्चरा आगच्छन् । यदि पल्ल्यां वङ्कचूलोऽस्ति तदाऽस्माकं नृत्यं पश्यतु, इत्यब्रुवन् । तदा मयाऽचिन्ति—साम्प्रतं भ्राता वङ्कचूलो नास्ति गृहे । तदा मया तव वेषधारिण्या नृत्यमकारि तेषां पार्श्वात् । दानमदायि तेभ्यः । गताश्च ते स्वस्थानम् । ततो बहुनिशागमनेन निद्रापरवशा तेनैव वेषेण भ्रातृजायापार्श्वे अस्वपम् ।" इति वृत्तान्तं श्रुत्वाऽतीव मनसि खेदो दध्रे तेन । तेन कालक्रमेण तस्य तद्राज्यं शासतस्तत्रैव पल्ल्यां तस्यैवाचार्यस्य शिष्यौ धर्मऋषिधर्मदत्तनामानौ कदाचिद्दुर्वाराक्रमवाहिश्वपानाम् । तत्र तयोरेकस्त्रिमासक्षपणं विदधे, द्वितीयस्तु चतुर्मासक्षपणम् । वङ्कचूलस्तु तद्दत्तनियमानामायतिशुभफलतामवलोक्य व्यजिज्ञपत्—"हे भदन्तौ मदनुकम्पया कमपि पेशलं धर्मोपदेशं दत्तः । ततस्ताभ्यां चैत्यविधापनदेशना पापनाशिनी विदधे । तेनापि शराविकापर्वतसमीपवर्तिन्यां तस्यामेव पल्ल्यां चर्मण्वतीसरित्तीरे कारितमुच्चैस्तरं चारु चैत्यम् । स्थापितं च तत्र श्रीमन्महावीरबिम्बम् । तीर्थतया च रूढं तत् । तत्रागान्तिस्म चतुर्दिग्भ्यः सङ्घाः । कालान्तरे कश्चिन्नैगमः सभार्यः सर्वऋद्ध्या तद्यात्रायै प्रस्थितः प्राप्तः क्रमेण रन्तिनदीम् । नाव-

For Private And Personal

मारूढौ च दम्पती चैत्यशेखरं व्यलोकयताम्। ततः सरभसं सौवर्णकचोलके कुङ्कुमचन्दनकर्पूरं प्रक्षिप्य जलं क्षेप्तुमारब्धवती नैगमगृहणी। प्रमादात् निपातितं तदन्तर्जलतलम्। ततोऽभाणि वणिजा–" अहो! इदं कच्चोलकं नैककोटिमूल्यं रत्नखचितं राज्ञा ग्रहणकेऽर्पितमासीत्। ततो राज्ञः कथं छुटितव्यम्।" इति चिरं विषद्य वङ्कचूलस्य पल्लीपतेर्विज्ञापितं तत् यथा–" अस्य राजकीयवस्तुनो विचितिः कार्यताम्।" तेनापि धीवर आदिष्ट तच्छोधयितुं प्राविशदन्तर्नदीम्। विचिन्वता चान्तर्जलं दृष्टं तेन हिरण्यमयरथस्थं जीवन्तस्वामिश्रीपार्श्वनाथबिम्बम्। यावत्पश्यति स्म स बिम्बस्य हृदये तत्कच्चोलकम्। धीवरेणोक्तम्–" धन्याविमौ दम्पती। यद्भगवतो वक्षसि घुसृणकर्पूरचन्दनविलेपनार्हं स्थितमिदं, ततो गृहीत्वा तदर्पितम् नैगमस्य। तेन दत्तं तस्मै बहुद्रव्यम्। उक्तं च बिम्बस्वरूपं नाविकेन। ततो वङ्कचूलेन श्रद्धालुना तमेव प्रवेश्य निष्कासितं तद्बिम्बम्। कनकरथस्तु तत्रैव मुक्तः। निवेदितं हि स्वप्ने प्राग्भगवता नृपतेः–" यत्र क्षिप्ता सती पुष्पमाला गत्वा तिष्ठति! तत्र बिम्बं शोधयामिति।" तदनुसारेण बिम्बमानीय समर्पितं राज्ञे वङ्कचूलाय। तेनापि स्थापितं श्रीवीरबिम्बस्य बहिर्मण्डपे। यावत्किल नव्यं चैत्यमस्मै कारयामि। इत्यभिसन्धिमता कारिते च चैत्यान्तरे। यावत्तत्र स्थापनार्थमुत्थापयितुमारभन्ते राजकीयाः पुरुषास्तावद्बिम्बं नोत्तिष्टति स्म। देवताधिष्ठानात्तत्रैव स्थितमद्यापि तथैवास्ते। धीवरेण पुनर्विज्ञप्तः पल्लीपतिः–"यत्तत्र देव! मया

नद्यां प्रविष्टेन बिम्बान्तरमपि दृष्टम् । तदपि बहिरानेतुमौचितिमञ्चति । पूजार्हं हि भवति । ततः पल्लीश्वरेण पृष्टा स्वपरिषत्–" भोः ! जानीते कोऽपि अनयोर्बिम्बयोः संविधानकम् ? । केन खल्वेते नद्यन्तर्जलतले न्यस्ते । " इत्याकर्ण्यैकेन पुराविदा स्थविरेण विज्ञप्तम्–" देव ! एकस्मिन्नगरे पूर्वं नृपतिरासीत् । स च परचक्रेण समुपेयुषा सार्द्धं योद्धुं सकलचमूसमूहं सन्नह्य गतः । तस्याग्रमहिषी च निजं सर्वस्वमेतच्च बिम्बद्वयं कनकरथस्थं विधाय जलदुर्गमिति कृत्वा चर्मण्वत्यां कौटिम्बिके प्रक्षिप्य स्थिता । चिरं युद्धयतस्तस्य कोऽपि खलः किल वार्त्तामानैषीत्–" यदयं नृपतिस्तेन परचक्राधिपतिना व्यापादित इति । " तच्छ्रुत्वा देवी तत्कौटिम्बकमाक्रम्यान्तर्जलतलं प्राक्षिपत् । स्वयं च परासुतामासदत् । स च नृपतिः परचक्रं निर्जित्य यावन्निजनगरमागमत् । तावद्देव्याः प्राचीनवृत्तमाकर्ण्य भवाद्विरक्तः पारमेश्वरीं दीक्षां कक्षीचक्रे । तन्नैकं बिम्बं देवेन बहिरानीतं पूज्यमानं चास्ति । द्वितीयमपि चेन्निःसरति तदोपक्रम्यतामिति । तदाकर्ण्य वङ्कचूलः परमार्हतचूडामणिस्तमेव धीवरं तदानयनाय प्राविशत् । स च तद्बिम्बं कटीदघ्नवपुर्जलतले तिष्ठमानं बहिःस्थशेषाङ्गमवलोक्य निष्कासनोपायाननेकानकार्षीत् । न च तन्निर्गतमिति दैवतप्रभावमाकलय्य समागत्य च विशामीशाय न्यवेदयत् तत्स्वरूपम् । अद्यापि तत्किल तत्रैवास्ते ।

श्रूयते ह्यद्यापि केनापि धीवरस्थविरेण नौकास्तम्भजाते तत्कारणं विचिन्वता तस्य हिरण्मयरथस्य

युगकीलिका लब्धा। तां कनकमयीं दृष्ट्वा लुब्धेन तेन व्यचिन्ति–"यदिमं रथं क्रमात् सर्वं गृहीत्वा ऋद्धिमान् भविष्यामीति।" ततश्च स रात्रौ निद्रां न लेभे। उक्तश्च केनापि अदृष्टपुरुषेण–"यदिमां तत्रैव विमुच्य सुखं स्थेयाः। नो चेत्सद्य एव त्वां हनिष्यामीति।" तेन भयार्त्तेन तत्रैव मुक्ता युगकीलिका इत्यादि। किं न सम्भाव्यते देवताधिष्ठितेषु पदार्थेषु? श्रूयते च सम्प्रत्यपि काले–"कश्चिन् म्लेच्छः पाषाणपाणिः श्रीपार्श्वनाथप्रतिमां भङ्क्तुमुपस्थितः स्तम्भितबाहुर्जातः। महति पूजाविधौ कृते सज्जतामापन्न इति।" श्रीवीरबिम्बं महत् तदपेक्षया लघीयस्तरं श्रीपार्श्वनाथबिम्बमिति। महावीरस्यार्भकरूपोऽयं देव इति मेदाश्चेल्लण इत्याख्यां प्राचीकथत् (?)। श्रीमचेलणदेवस्य महीयस्तममाहात्म्यनिधेः पुरस्ताभ्यां महर्षिभ्यां सुवर्णमुकुटाम्नायः साधितः। प्रकाशितश्च भव्येभ्यः। सा च सिंहगुहा पल्ली कालक्रमाद् ढिंपुरीत्याख्यया प्रसिद्धा नगरी सञ्जाता। अद्यापि भगवान् श्रीवीरः स च चेल्लणपार्श्वनाथः सकलसङ्घेन तस्यामेव पुर्यां यात्रोत्सवैराराध्यते इति।

अन्यदा वङ्कचूल उज्जयिन्यां खातपातनाय चौर्यवृत्त्या कस्यापि श्रेष्ठिनः सद्मनि गतः कोलाहलं श्रुत्वा चलितः। ततो देवदत्तायाः गणिकाया गृहं प्राविशत्। दृष्टा सा कुष्ठिना सह प्रसुप्ता। ततो निःसृत्य गतः पुरः श्रेष्ठिनो वेश्म। तत्रैकविंशोपको लेख्यके त्रुटयतीति परुषवाग्भिर्निर्भर्त्स्य निसारितो गेहात्पुत्रः श्रेष्ठिना।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विरराम च यामिनी। यावद्राजकुलं यामीत्यचिन्तयत्, तावदुज्जगाम धामनिधिः। पल्लीपतिश्च निःसृत्य नगराद् गोधां गृहीत्वा तरुतले दिनं नीत्वा पुना रात्रावागाद्राजभाण्डागाराद्बहिः। गोधापुच्छे विलग्य प्राविशत् कोशम्। दृष्टो राजाग्रमहिष्या रुष्टया। पृष्टश्च–"कस्त्वमिति ?।" तेनोचे–"चौर इति।" तयोक्तम्–"माभैषीः। मया सह सङ्गमं कुरु।" सोऽवादीत्–"का त्वम्।" साऽप्यूचे–"अग्रमहिष्यहमिति।" चौरोऽवादीत्–"यद्येवं तर्हि ममाम्बा भवसि। अतो यामि।" इति निश्चिते तया स्वाङ्गं नखैर्विदार्य्य पूत्कृतिपूर्वमाहूता आरक्षकाः। गृहीतस्तैः। राज्ञा चानुनयार्थमागतेन तद् दृष्टम्। राज्ञोक्ताः स्वपूरुषाः–"मैनं गाढं कुर्वीध्वमिति।" ते रक्षितः। प्रातः पृष्टः क्षितिभृता। तेनाप्युक्तम्–"देव! चौर्यायाहं प्रविष्टः पश्चाद्देवभाण्डागारे, देव्या दृष्टोऽस्मि। यावदन्यन्न कथयति। तावत्तुष्टो विदितविद्यो नरेन्द्रः स्वीकृतः पुत्रतया। स्थापितश्च सामन्तपदे। देवी विडम्ब्यमाना रक्षिता वङ्कचूलेन। अहो! नियमानां शुभं फलमिति अनवरतमयमध्यासीत्। प्रेषितश्चान्यदा राज्ञा कामरूपभूपसाधनार्थं गतः। युद्धे घातैर्जर्जरितो विजित्य तमागमत्स्वस्थानम्। व्याहृताश्च राज्ञा वैद्याः। यावद्रूढोऽपि घातव्रणो विकसति। तैरुक्तम्–"देव! काकमांसेन शोभनो भवत्ययम्।" तस्य च जिनदासश्रावकेण सार्द्धं प्रागेव मैत्र्यमासीत्। ततस्तदानयनाय प्रेषितः पुरुषः पुरुषाधिपतिना। येन तद्वाक्यात् काकमांसं भक्षयतीति। तदाऽऽहूतश्च जिनदासोऽवन्तीमागच्छन्नुभे दिव्ये सुदत्यौ रुदत्याव-

For Private And Personal

द्राक्षीत् । तेन पृष्टे–"किं रुदिथः ।" ताभ्यामुक्तम्–"अस्माकं भर्त्ता सौधर्माच्च्युतः । अतो राजपुत्रं वङ्कचूलं प्रार्थयावहे । परं त्वयि गते स मांसं भक्षयिता । ततो दुर्गतिं गन्ता । तेन रुदिवः ।" तेनोक्तम्–"तथा करिष्ये यथा तन्न भक्षयिता ।" गतश्च तत्र राज्ञोपरोधाद्वङ्कचूलमवोचत्–"गृहाण वलिभुक्पिशितम् । पटूभूतः सन् प्रायश्चित्तं चरेः ।" वङ्कचूलोऽवोचत्–"जानासि त्वं यदाचर्याप्यकार्यं प्रायश्चित्तं ग्राह्यम् । ततः प्रागेव तदनाचरणं श्रेय इति ।" 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम्' इति वाक्यान्निषेद्धो नृपतिः । विशेषप्रतिपन्नव्रतनिवहश्चाच्युतकल्पमगमत् । वलमानेन जिनदासेन ते देव्यौ तथैव रुदत्यौ दृष्ट्वा प्रोक्तम्–"किमिति रुदिथः ।" न तावत्स मांसं ग्राहितः । ताभ्यां अभिदधे–"स ह्यधिकाराधनावशादच्युतं प्राप्तः । ततो नाभवदस्मद्भर्त्तेति ।" एवं जिनधर्मप्रभावं सुचिरं विभाव्य जिनदासः स्वावासमाससादेति । अस्य ढिंपुरीतीर्थस्य निर्मापयिता वङ्कचूलः ॥

॥ इति वङ्कचूल प्रबन्धः ॥

(१७)

॥ अथ विक्रमादित्यप्रबन्धः—

विक्रमादित्यपुत्रं विक्रमसेनराजानं प्रति पुरोधसाऽऽशीर्दत्ता–"यस्त्वं पितुर्विक्रमादित्यादधिको भूयाः ।"

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तदा देवताधिष्ठिताभिः सिंहासनस्थाभिश्चतसृभिः काष्ठपुत्रिकाभिर्हसितम् । तदा विक्रमसेनेन पृष्टाः पुत्रिकाः–"किमिति हस्यते ? ।" ताः प्रोचुः–"तेन सह समत्वमपि न घटते कुतो नामाधिक्यम् ? ।" आद्याह–"अवन्त्यां विक्रमो राजा अपूर्वसत्यवार्त्ताकथकाय दीनारपञ्चशतीं दत्ते । एवं श्रुत्वा खर्प्परचौरेण दीनारपञ्चशती याचिता । वार्त्ता चैका कथिता । यथा—" गन्धवहश्मशानसमीपे पातालविवरकूपे मया दीपो देवीहरसिद्धिप्रेषितः पतन् दृष्टः । मयापि तत्पृष्टे झम्पापितम् । पाताले तत्र दिव्यं सौधं दृष्टम् । तत्र तैलकटाहिका ज्वलन्ती दृष्टा । तत्पार्श्वे एको नरो दृष्टः पृष्टश्च–"किमर्थं त्वमिह ।" तेनोक्तम्–"अत्र सौधे शापभ्रष्टा दिव्यकन्याऽस्ति । सा ब्रूते 'यस्तैलकटाहिकायां झम्पां दाता । स मे वर्षशतं पतिर्भविता ।' अतोऽहमेतत्पतित्वार्थमत्र तिष्ठामि । परं साहसं नास्ति ।" इति वार्त्तया पञ्चशती लब्धा । तेन खर्प्परेण समं राजापि तत्र गतो विवरेण । तैलकटाहिकायां झम्पा दत्ता । कन्यया सोऽमुनेन जीवितः । यावत्सा राजानं वृणुते । तावद्राज्ञोक्तम्–"अग्रेतनं नरं वरय ।" वृतः स तया । एवं यः परोपकारी तदधिकोऽयं कथं भावी ? ॥ १ ॥"

द्वितीययोक्तम्–"कासीतो द्वौ द्विजो आयातौ । विक्रमार्केण पृष्टौ राज्यस्वरूपम् । ताभ्यामूचे–"अस्मद्देशे पातालविवरमस्ति । तत्रान्धो राक्षसो वर्त्तते । अस्मद्देशस्वामी तिलकटाहे झम्पां दत्त्वा स्वमांसेन राक्षसस्य पारणं कारयति स्म । राक्षसोऽपि तं पुनर्नवीकरोति । सप्त अपवरिकाः स्वर्णसम्पूर्णाश्च कुरुते । प्रत्यहं प्रातः

For Private And Personal

सप्ताप्यपवरिकास्त्यागेन रिक्तीकुरुते। श्रुत्वेदं विक्रमोऽपि तत्र गतः। कटाहे झम्पा दत्ता। रक्षसा भक्षितो जीवितश्च। राक्षसस्य शापेनान्ध्यमस्ति तच्छापान्तोऽभूत्। दृग्भ्यां पश्यति। दृष्ट्वा चाह–"कस्त्वं साहसी ?।" तेनोक्तम्–"विक्रमोऽहम्।" तुष्टोऽहं ते। याचस्व। राज्ञोक्तम्–"तुष्टश्चेत्तदाऽस्य राज्ञो नित्यं सप्ताप्यपवरिकाः स्वर्णपूर्णा भूयासुः। तथाऽस्य पुनरेवं कटाहिझम्पापातादियातना मा भूत्।" रक्षसोक्तम्–"एवमस्तु।" अतः कथं विक्रमार्कादधिको भावी ?। समोऽपि न अतो हसितः॥२॥"

तृतीययोक्तम्–"एकदा विक्रमार्को निजपूर्वास्तव्यखल्वाटकुम्भकारयुक्तो देशान्तरं गतः। परकायप्रवेशविद्यावेदी योगी मिलितः। स आवर्जितः तुष्टश्च विद्यां दातुमारेभे। राज्ञोक्तम्–"प्रथमं मम मित्रस्य ददत।" तेनोक्तम्–"न योग्योऽसौ।" निर्बन्धात्तस्यापि दत्ता गुणरञ्जितेन योगिना नृपस्य पश्चाद् बलाद्दत्ता। अवन्तीं गतो राजा राज्यं करोति। एकदा पट्टाश्वो मृतः। विद्यापरीक्षार्थं राज्ञा स्वजीवस्तत्र क्षिप्तः। कुम्भकारेण स्वजीवो नृपदेहे। कुम्भकारो राज्यं करोति। तेनाश्वमारणाय चिन्तितः। नृपजीवः पूर्वमृतशुकदेहे प्रविष्टः। शुकोऽपि सोमदत्तश्रेष्ठिभार्याप्रोषितभर्तृकाकामसेनागृहं गतः। सा तच्चातुर्येण हृष्टा राज्ञी समीपं न गच्छति। श्रेष्ठी समागतः। सा राज्ञी समीपं गता। अनागमनकारणं पृष्टा। शुकचातुर्यकारणं प्रोक्तम्।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

तया आनायितः शुकः । सा रञ्जिता तेन, यथा राज्ञा पूर्वम् । एकदा शुकेन राज्ञीस्नेहपरीक्षार्थं गृहगोधिका-देहं गतम् । राज्या तद्वियोगेन काष्ठभक्षणं कर्त्तुमारब्धम् । नृपजीवेन शुको जीवापितः । सा राज्ञी व्यावृत्ता । शुकेन सर्वोऽपि वृत्तान्तो राज्यै कथितः । राज्या कुम्भकारस्यावर्जना कृता । तेन कुम्भकारजीवेन तुष्टेन विद्याप्रदर्शनाय मृतबोकटदेहे स्वजीवः क्षिप्तः । नृपो निजदेहं गतः । अजो भयात्कम्पते । राज्ञा उक्तः–" न भेतव्यम् । नाहं त्वत्समो भावी । सकृपोऽस्मि । त्वं सुखं जीव । चर । पिब । " ततः कथं तेन समो भविष्यति ॥ ३ ॥"

चतुर्थ्योक्तम्—"एकदा विक्रमार्केणोत्तमं सौधं कारितम् । राजा तत्र गतः विलोकनाय । तत्र चेटकयुग्ममुपविष्टमस्ति । चेटकेनोक्तम्–"सुष्ठु सौधमस्ति ।" चेटिकयोक्तम्–"यादृशं स्त्रीराज्ये लीलादेव्या वासगृहमस्ति तादृशमेतत् ।" राज्ञा तच्छ्रुतम् । तद्गमनौत्सुक्यं जातम् । परं स्थानं तु न वेत्ति । तेन सचिन्तो जातः । भट्टमात्रो नृपाशयं ज्ञात्वा तत्स्थानकज्ञानाय चचाल । तन्मार्गे लवणसमुद्रं ततो धूलीसमुद्रमुत्तीर्य तत्र रात्रौ मदनायतने स्थितः । निशीथे हयहेषारवसंसूचितं दिव्यालङ्कारभूषितं दिव्यस्त्रीवृन्दमागमत् । तत्स्वामिन्या कामः पूजितः । व्यावृत्तमानानां तासां अश्वपुच्छे लगित्वा तत्र गतः । दासीभिर्दृष्टः स्वामिनी ॥ ८७ ॥

For Private And Personal

पार्श्वे नीतः । तया स्नानादि कारितः । रात्रौ तद्गृह एव स्थितः । तया स्वपत्या उक्तम्–"मम विक्रमादित्यो भर्त्ता भूयात्, किं वा यो मां चतुर्भिः शब्दैर्जागरयति ।" इत्युक्त्वा सुप्ता । तेन चिन्तितम्–"किं चतुर्भिरपि शब्दैर्न जागर्त्ति । तर्हि एनामहमेव जागरयिष्यामि ।" चत्वारः शब्दाः कृताः यदा न जागर्ति तदापादाङ्गुष्ठश्चम्पितः । तया पादेनाहतः यत्र विक्रमादित्यः सुप्तोऽस्ति तत्र पतितः । राज्ञा पृष्टम्–"किमिदं ? ।" तेन सर्वोऽपि वृत्तान्तः प्रोक्तः । ततो राजाऽग्निसंज्ञं वेतालमारुह्य तत्र गतः । वेतालः प्रच्छन्नो जातः । राजा दासीभिस्तत्र नीतः । तया भक्तिः कृता । तद्रूपदर्शनात्सरागा जाता । परं शायनया प्रतिज्ञा कृता । तथैवोक्तम् । राज्ञा दीपस्थितो वेताल उक्तः–"भोः ! प्रदीपिकामपि कथां कथय ।" स वक्तुमारेभे–

"कश्चिद्विप्रः । तस्य पुत्री । सा चतुर्णां वराणां दत्ता पृथक्पृथग्ग्रामे । चत्वारोऽप्यागताः । विवादो जातः । तया महान्तमनर्थं दृष्ट्वा काष्टभक्षणं कृतम् । स्नेहादेकेन वरेणापि चितामध्ये झम्पापितम् । एकोऽस्थीनि गृहीत्वा गङ्गायां गतः । एकस्तत्रोटजं कृत्वा स्थितो भस्मरक्षार्थम् । एको देशान्तरं गतः । भ्रमता च तेन सञ्जीवनी विद्या शिक्षिता । पुनरपि तत्रागतः । अपरेऽप्यागताः । सा जीवापिता । पुनर्विवादो जातः । तर्हि चतुर्णां मध्ये कस्य सा पत्नी ? । राज्ञोक्तम्–"अहं न वच्मि । त्वमेव ब्रूहि ।" स आह–"यश्चितायां सहोत्थितः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

स भ्राता । योऽस्थिनेता स पुत्रः । येन जीवापिता स पिता उत्पत्तिहेतुत्वात् । यो भस्मरक्षकः स भर्ता पालकत्वात् ॥ ”

राज्ञा ताम्बूलस्थगिका द्वितीयकथां पृष्टा । वेतालाऽधिष्ठानात्साप्याह–“ कुत्रापि मृतभर्तृका ब्राह्मणी अभूत् । तस्या जारेण सह सुता जाता । तां रात्रौ बहिस्त्यक्तुं गता । इतश्च तत्र कोऽपि शूलाक्षिप्तो जीवन्नस्ति । तस्य पादे स्वलिता । तेनोक्तम्–“कः पापी दुखिनोऽपि दुखमुत्पादयति ।” तयोक्तम्–“किं दुःखम् ? ।” सोऽप्याह–“ देहपीडादिकं विशेषतो निष्पुत्रत्वं कथितम् । ” पुनः शूलानरेणोक्तम्–“ त्वमपि कथय । का त्वम् ? ।” निजचरितं तयोक्तम् । तन्निशम्य तेनाप्युक्तम्–“ पुरो हृतं भूनिक्षिप्तं अत्रस्थं द्रव्यं त्वं मदीयमादाय सुतां मया सह विवाहय । ” ब्राह्मणी प्राह–“ त्वमिदानीं मरिष्यसि । सुता च लघ्वी । कथं पुत्रोत्पत्तिः ? । ” तेनोक्तम्–“ ऋतुकाले कस्यापि द्रव्यं दत्त्वा पुत्रमुत्पादयेः ।” तया तथैव सर्वं कृतम् । पुत्रो जातमात्रो राजद्वारे क्षिप्तः । राज्ञः केनाप्यर्पितः । कालेन निष्पुत्रस्य नृपस्य राज्ये स एवोपविष्टः । श्राद्धदिवसे गङ्गायां पिण्डदानं कर्त्तुं गतः । जलाद्धस्तत्रयं निर्गतम् । स राजा विस्मितः । कस्य करस्य पिण्डं ददामि । तर्हि भो राजन् ! वद कस्य देयः पिण्डः । राज्ञोक्तम्–“ चौरहस्तस्य ॥ ”

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

राज्ञा स्वर्णपालनकं जल्पितम्। तदपि कथमाह–"कस्मिन्नपि ग्रामे कश्चित्कुलपुत्रः स परिणीतोऽन्यग्रामे। परं तत्पत्नी श्वसुरगृहे नागच्छति। स स्वजनैर्निर्गुण इति हस्यते। एकदा सर्वजनप्रेरितो मित्रयुतो तत्र गतः। मार्गे यक्षस्य शिरो नामितम्। तत्प्रभावात्सादरा जाता, आगन्तुं प्रवृत्ता। यक्षभवने समीपमागते स एकाकी यक्षं नन्तुमागच्छत्। यक्षेण स्त्रीलोभेन तस्य शिरश्छेदितम्। महत्यां वेलायां मित्रमागतम्। तदवस्थो जातो धार्मिको दृष्टः। चिन्तितं च तेन–"जनप्रवादो भविष्यति यथा—अनेन स्त्रीहेतोर्हतः।" तर्हि ममापि मर्त्तुं युक्तम्। इति विचिन्त्य तेनापि स्वशिरः छिन्नम्। महतिवेलायां साप्यागता। द्वावपि तदवस्थौ प्रेक्ष्य चिन्तितं तया–"जनोऽग्रेऽपि द्वेषिणीं कथयन्नास्ति, सम्प्रति पतिघ्नीमिति कथयिष्यन्ति। तर्हि म्रियेऽहं।" इति ध्यात्वा गले शाखिका लगापिता। तावता यक्षेण करे धृता। मा साहसं कुरु। तयोक्तम्–"द्वावपि जीवय।" यक्षेणोक्तम्–"शिरसी निजनिजकबन्धे योजय!" तयोत्सुकयाऽन्यान्यकबन्धयोर्न्यस्ते। तयोर्भार्याविवादो जातः–"एको वदति मदीया द्वितीयोऽपि तथा।" तर्हि कस्य सा?। राज्ञोक्तं–"यस्य कबन्धे शिरः स भर्त्ता, सर्वस्य गात्रस्य शिरः प्रधानमिति वचनात्॥"

कर्पूरसमुद्गोपि कथमाह–"कुतोऽपि ग्रामात्स्वस्वकलाविदश्चत्वारः सुहृदो देशान्तरं चेलुः, एकः काष्टसूत्रधारः द्वितीयः स्वर्णकारः तृतीयः शालापतिः तुर्यो विप्रः। क्वापि वने रात्रावुषिताः। प्रथमयामे सूत्र-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

धारः प्राहरके स्थितः। तेन काष्ठपुत्रिका तरुणीसदृशी कृता समग्राऽपि। द्वितीयप्रहरे स्वर्णकारो यामिकः। तेनाभरणैर्विभूषिता। तृतीये शालापतिः। तेन क्षौमाणि परिधापिता। चतुर्थे विप्रेण सजीवा कृता। प्रातः सजीवां दृष्ट्वा सर्वेऽपि तज्जिघृक्षया मिथो विवदन्ते। तर्हि कस्य सा भो! विक्रमादित्यनरेन्द्र!?। सा नाम श्रुत्वा चुक्षोभ। राज्ञोक्तम्–"तदहं न वच्मि।" तयोरकथयन्तोश्च तथा जल्पितम्–"भो राजन्! कस्य सा?।" राज्ञोक्तम्–"स्वर्णकारस्य। अधुनापि यः स्वर्णं घटापयति स एव भर्त्ता भवति ४॥"

सा पप्रच्छ–"के यूयम्?।" दीपस्थेन वेतालेनोक्तम्–"असौ स विक्रमादित्यः।" सा हृष्टा व्यूढा च। तां गृहीत्वाऽवन्तीमागमत्। यदीदृग् तत्समकः, आधिक्ये तु का कथेति हसितम्। विक्रमसेनेन गर्वस्त्यक्तः॥

ततो विक्रमसेनः पुरोधसमप्राक्षीत्–"यदि किल एताः काष्टपुत्रिका मम पितरमद्भुतगुणं वर्णयन्ति। तर्हि स एव लोके तत्प्रथमतयोत्तमत्वेनावतीर्णो भविष्यति। ततः प्राक् तु न कोऽपि तादृगुत्तमोऽभूदिति ब्रूमः।" पुरोधाः प्राह–"राजन्! अनादिरियं रत्नगर्भा। अनादिश्चतुर्युगी। युगे युगे नररत्नानि जायन्ते। अहमेव प्रधानमिति गर्वो न हितकारी न च निर्वहते। यतस्त्वत्पितुर्विक्रमादित्यस्य मनस्येकदा एवमभूत्। यथा रामेण व्यवहृत्य लोकः सुखीकृतः। तथाऽहमपि करिष्ये। ततो रामायणं व्याख्यापितम्। तत्र यथा रामस्य

For Private And Personal

दानं आगारस्थापनं वर्णाश्रमव्यवस्था गुरुभक्तिस्तथा सर्वमारब्धम्। ततोऽभिनवो राम इत्यात्मानं पाठयति। तद् दृष्ट्वा मन्त्रिभिश्चिन्त्यते स्म–"अनुचितकारी अस्मत्प्रभुः। यो गर्वादात्मानं तद्वन्मन्यते। अयं गर्वोऽस्योपायेनोत्तारयितव्यः प्रस्तावे।" इतश्च स्वपित्रा विक्रमादित्येन पृष्टम्–"लोके स कोऽपि क्वाप्यास्ते योऽश्रुतपूर्वं रामस्याचरणं ज्ञापयति नः।" तत एकेन ज्यायसा मन्त्रिणाऽपरमन्त्रिप्रेरितेन कथितम्–"राजेन्द्र! कोशलायां विप्र एको वृद्धोऽस्ति। स काश्चित् श्रीरामस्य वार्त्ताः पारम्पर्यायाताः सम्यग् विवेद। आहूय पृच्छयते।" राज्ञा आहूतः सः। सगौरवमायातः पूजितः पृष्टश्च–"वृद्ध! वद काश्चिद्रामकथां नव्याम्।" विप्रो बभाण–"पृथ्वीनाथ! यदि कोशलायामागच्छसि। तदा रामस्य कमपि प्रबन्धं साक्षाद्दर्शयामि। इह स्थितस्तु वक्तुं न पारयामि।" तदा राज्ञा राज्यभारो मन्त्रिषु न्यस्तः। स्वयं महाचमूसहितो वृद्धद्विजयुक् अयोध्योपशल्यां ययौ। स्कन्धावारे तस्थौ। तदानीं स एव सर्वदिगीश इत्यभीः विप्रो भाषितः क्ष्मापालेन–"दर्शय रामदेवचरित्रम्।" ततो विप्रः स्थानमेकं दर्शयित्वा भूपालमालपत्–"इदं भूखण्डं खानयत।" ततः खानयति क्ष्मापालः। खनयत्सु खनकेषु प्रथमं हेमकलशः। ततो हैमी मण्डपिका प्रकटीबभूव। उपरितनं रजोपसारितम्। पश्चानुपूर्व्या प्रथमद्वितीयतृतीयक्षणा हैमा दृष्टा महीभुजा। चतुर्थे क्षणे नीरजे कृते विपुला उपानदेका हैमसूत्रकृता ज्योतिर्जालजटामाणिक्यखचिता दृष्टा। भूपेन विस्मितेन गृहीत्वा हृदि शिरसि निहिता। अहो!

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मान्या रत्नजातिरियं। ततो विप्रेण विज्ञप्तम्–"देव! चर्मकारपत्न्या उपानदेषा न स्प्रष्टुमर्हति तत्र विष्टपपतेः।" विक्रमेणोक्तम्–"सा चर्मकार्यपि धन्या। यस्या ईदृगुपानत्। वद केयं कथा?।" ततो विप्रो ब्रूते–"विश्वेश्वर! श्रीरामे राज्यं कुर्वति सति अत्र चर्मकारसद्मानि आसन्। इदमेकस्य चर्मकारस्य सद्म॥ तस्य पत्नी लाडबहुला। अतो गर्वमुद्वहति। विनयं न करोति। अतः कारणात् सा तेन हक्किता हता च। याहि रे दुःखं गृहीत्वा इत्युक्ता च। ततो रुष्टाऽस्यामेकस्यां उपानहि तटपातितायां अपरिहितायां द्वितीयस्यां तु परिहितायां निजतातस्य सदनं जगाम। गत्वा पत्युः कठोरभाषितं पित्रे बभाण। पित्रा दिनद्वयं स्थापिता आवर्जिता च अथोक्ता–"वत्से! कुलस्त्रियाः पतिरेव शरणम्। तत्रैव याहि।" सोचे–"न यामि मानक्षयात्। द्विस्त्रिरुक्तिप्रत्युक्तयो भणिता। पितृभ्यां भाणितापि यदा पतिगृहं न याति तदा पित्रा भाषितम्–"वत्से। अहमेवं मन्ये–यदा श्रीरामः सीतालक्ष्मणसहितः स्वयमागत्यानुनीय त्वां श्वसुरकुले प्रहिता। तदा तत्र गन्त्री त्वम्।" साप्यलीकाऽभिमानिनी प्रवदति–"इदमित्थमेव। राम एवागते यामि तत्र नापरथा।" इमं वृत्तान्तं चरत्वनियुक्ता प्रच्छन्नाः सुरा गत्वा रामं व्याजिज्ञपन्–"देव! अयं वृतान्तश्चमकारपुत्र्याः।" ततो देवः श्रीरामः प्रजावत्सलः प्रातः ससीतः सलक्ष्मणः सामात्यस्तच्चर्मकारभवनमगात्। तन्मध्यं प्रविष्टः। पूजितः कारुभिर्विस्मितैः। विज्ञप्तश्च–"देव! अयमस्मान् कीटान् प्रति कियान् प्रसादः कृतः। स्वप्नेऽपि नेदं

For Private And Personal

सम्भाव्यते–यद्देवोऽस्मानुपतिष्ठते। किं कारणमागमनस्य ?।" श्रीरामः प्राह–"त्वत्पुत्र्याः श्वसुरकुले प्रेषणायायाताः स्मः। तस्या हि वराक्यास्तथाविधा संधाऽऽस्ते।" ततो हृष्टस्तज्जनकः। अपवरकं गत्वा दुहितरमाह स्म–"मुग्धिके! तव प्रतिज्ञा पूर्णा। श्रीरामदेवो आयातः सदेवीकः। एहि वन्दस्व तं जगत्पतिम्।" ततस्तुष्टा रामान्तिकमागता। ववन्दे तम्। आलापिता प्रजातातेन–"वत्से! गच्छ श्वसुरमन्दिरम्।" तया भणितम्–" आदेशः प्रमाणम्।" गता पतिगृहम्। रामः स्वस्थानमायासीत्। श्रीविक्रम! अस्या द्वितीया उपानत् तत्र पितृगृहे खन्यमाने लप्स्यते। स्वामिन्! आयाहि तत्खान्यते। गतो राजा तत्र। खानितं तत्। लब्धा द्वितीयाप्युपानत्। दृष्टं हैमगृहम्। एवमन्यान्यपि तेन विप्रेण खानयितानि। लातं तद्धेम। राज्ञा विप्रः पृष्टः–" कथमीदृशं सम्यग्जानासि?। विप्रेण गदितम्–" पूर्वजपारम्पर्योपदेशात् ज्ञातं तुभ्यमुक्तं च। परं गर्वं मा धाः। स रामः स एव। तस्य स्वाज्ञया जलज्वलनौ स्तम्भेते स्म। पतन्त्यो भित्तयोर्दत्तायां तदाज्ञायां न पेतुः। लूता द्विचत्वारिंशत् अन्धगडाः सप्तविंशतिः स्फोटिका अष्टोत्तरशतं विड्वराणि दोषाश्च सर्वे व्यनेशन्। या तु तद्देवी सीता ये त्रयस्तद्भ्रातरो ये तद्भृत्या हनूमत्सुग्रीवादयस्तेषां महिमानं वर्षशतेनापि वाक्पतिरपि वक्तुं न शक्तः।" इति श्रुत्वा विक्रमेण गर्वो मुक्तः। बिरुदं निषिद्धं 'अभिनवरामः' इति। पुनरुज्जयिनीमागात्। यथाशक्ति लोकमुद्धरत्। तस्य हि अग्निवेतालपुरुषकसिद्धिभ्यां

सुवर्णसिद्ध्या चोपकारैश्वर्यं तदा निरुपममासीत्। ततो विक्रमो धन्य एव। ततोऽधिकास्तु परः कोटयोऽभूवन्।" इत्याकर्ण्य विक्रमसेनो विवेकी अभूत् ॥

॥ इति विक्रमादित्यप्रबन्धः ॥

(१८)

अथ नागार्जुनप्रबन्धः—

ढण्कपर्वते सुराष्ट्राभूषणशत्रुञ्जयगिरिशिखरैकदेशरूपे राजपुत्ररणसिंहस्य भोपालनाम्नीं पुत्रीं रूपलावण्यसम्पूर्णां पश्यतो जातानुरागस्य सेवमानस्य वासुकिनागस्य पुत्रो नागार्जुननामा जातः। स च जनकेन पुत्रस्नेहमोहितेन सर्वासां महौषधीनां फलानि मूलानि दलानि च भोजितः। तत्प्रभावेन स महासिद्धिभिरलङ्कृतः सिद्धपुरुष इति विख्यातः। पृथ्वीं विचरन् पृथ्वीस्थानपत्तने सातवाहनस्य राज्ञः कलागुरुर्जातः। स च गगनगामिनी विद्याध्ययनार्थं पालित्तानकपुरे पादलिप्ताचार्यान् सेवते। अन्यदा भोजनावसरे पादप्रलेप-

For Private And Personal

बलेन तान् गगने उत्पतितान् पश्यति। अष्टापदादितीर्थानि नमस्कृत्य स्वस्थानमुपागतानां तेषां पादौ प्रक्षाल्य सप्तोत्तरशतमहौषधीनां आस्वादेन वर्णगन्धादिभिर्नामानि निश्चित्य गुरूपदेशं विनापि पादलेपं कृत्वा कुर्कुटपोत इवोत्पतन्नवटतटे निपतितः। व्रणजर्जरिताङ्गो गुरुभिः पृष्टः–"किमेतदिति।" तेन यथास्थिते प्रोक्ते तस्य कौशल्येन चमत्कृतचित्ता आचार्यास्तस्य शिरसि पद्महस्तं दत्वा भणन्ति–"षष्टिकतन्दुलोदकेन तान्यौषधानि वर्त्तयित्वा पादलेपं कृत्वा गगने गरुड इव स्वैरं व्रज।" ततस्तां सिद्धिं प्राप्य परितुष्टोऽसौ ननर्त्त। पुनरपि कदाचिद्गुरुमुखादाकर्णयति–"यथा रससिद्धिं विना दानेच्छासिद्धिर्न भवति।" ततो रसं परिकर्मयितुं प्रवृत्तः स्वेदनमर्दनजारणमारणानि चक्रे। रसस्तु स्थैर्यं न बध्नाति। ततस्तु गुरून् पप्रच्छ–"कथं रसं स्थैर्यमाबध्नाति?।" गुरवः प्राहुर्यथा–"दुष्टदैवतनिर्दलनसमर्थायां श्रीपार्श्वनाथस्य दृशि साध्यमानः सर्वलक्षणोपलक्षितया महासत्या योषिता च मृद्यमानो रसः स्थिरीभूय कोटिवेधी भवति।" तच्छ्रुत्वा स पार्श्वनाथप्रतिमां समहिमामन्वेषयितुमारेभे। परं तादृशी न क्वापि पश्यति। इतश्च नागार्जुनेन स्वपिता वासुकिर्ध्यात्वा प्रत्यक्षीकृतः, पृष्टश्च–"श्रीपार्श्वनाथस्य दिव्यकलानुभावां प्रतिमां कथय।" तेनावाचि–"द्वारवत्यां समुद्रविजयदशार्हेण श्रीनेमिनाथमुखान्महातिशयसम्पन्ना ज्ञात्वा श्रीपार्श्वस्य प्रतिमा प्रासादे स्थापयित्वा पूजिता। द्वारवत्या दाहानन्तरं समुद्रेण प्लाविता सा प्रतिमा तथैव समुद्रमध्ये स्थिता। कालेन कान्तिवासिनो धनप-

तिनामकस्य सांयात्रिकस्य यानपात्रं देवताऽतिशयात् स्खलितम्। अत्र जिनबिम्बं तिष्ठतीत्यदृष्टवाचा नि-श्चित्य नाविकास्तत्र निक्षिप्य सप्तभिरामसूत्रतन्तुभिर्बद्ध्वोद्धृता प्रतिमा निजनगर्यां नीत्वा प्रासादे स्थापि-तास्ति। चिन्तितातिरिक्तलाभप्रहृष्टेन पूज्यते स्म प्रतिदिनम्। ततः सर्वातिशायि तद्बिम्बं ज्ञात्वा नागा-र्जुनो रससिद्धिनिमित्तमपहृत्य सेडीनद्यास्तटेऽतिष्ठिपत्। तस्य पुरतो रससाधनार्थं सातवाहनस्य राज्ञश्चन्द्र-लेखाभिधां महासतीं देवीं सिद्धव्यन्तरसान्निध्येनानाय्य प्रतिनिशं रसमर्दनं कारयति। एवं तत्र भूयो भूयो गतागतेन तया बान्धव इति प्रतिपेदेऽसौ। सा तेषामौषधानां मर्दनकारणं पृच्छति। स च कोटीवेधस्य रसस्य वृत्तान्तं सत्यं कथयति। अन्यदा द्वयोर्निजपुत्रयोस्तया निवेदितं यथा–"सेडीनदीतटे नागार्जुनस्य रससिद्धिर्भविष्यति।" तौ रसलुब्धौ निजराज्यं मुक्त्वा नागार्जुनान्तिकमागतौ। कैतवेन तं रसजिघृक्षू प्रच्छन्नवेषौ यत्र नागार्जुनो जेमति तस्य गृहस्य परिसरे भ्रमतः। रन्धनीमालपतः–"त्वं नागार्जुनाय रस-वतीं लवणबहुलां कुर्याः। यदा तां रसवतीं क्षारां कथयति। तदाऽस्मभ्यं वदेः। साऽप्योमिति प्रतिशुश्राव। अथ सा तज्ज्ञानार्थं तदर्थं सलवणां रसवतीं साधयति। षण्मास्यामतिक्रान्तायां रसवतीं तेन क्षारेति दूषिता। रन्धन्या च राजपुत्रयोरग्रे गदितम्। अद्य क्षारत्वं जज्ञे नागार्जुनेन। ताभ्यामपि तस्य रससिद्धि-र्निश्चिक्ये। अथ तौ तस्य वधोपायं ध्यायतः पृच्छतश्च लोकं तज्ज्ञम्। पृच्छद्भ्यां ज्ञातं यथा–"वासुकिना

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

एवास्य दर्भाङ्कुरान्मृत्युः कथितोऽस्ति।" नागार्जुनेन सिद्धस्य शुद्धस्य रसस्य कृतपौ द्वौ भृतौ ढङ्कपर्वतस्य गुहायां क्षिप्तौ। पृष्टचराभ्यां ताभ्यां ज्ञातौ। मुक्त्वा वलमानो नागार्जुनस्ताभ्यां संमुखस्थो दर्भाङ्कुरेण जघ्ने। मृतः सद्यः।

आलेख्ये चित्रपतिते मृते च मधुसूदन। क्षत्रिये त्रिषु विश्वासश्चतुर्थो नोपलभ्यते ॥ १ ॥

तौ कृतपौ देवतया सङ्गृहीतौ। राजपुत्रौ नरकपङ्कगोचरतां गतौ। देवतया क्रुद्धया हतौ। न रसलाभो न च धर्मस्तयोः। तावपि राजपुत्रौ मरणकाले पश्चात्तापेन दग्धौ–"हा हा! येन खटिकासिद्धिवशाद्दशार्हमण्डपादिकीर्त्तनानि रैवतोपत्यकायां कृतानि। येन रसो लोकोपकाराय साधितः। तस्य प्राणद्रोहेणावाभ्यां किं साधितम्?। एकं तावत्कलापात्रद्रोहः। अपरं च मातुलद्रोहः।" एवं दुःखार्त्तौ मृतौ। रसस्तम्भनात् स्तम्भनं नाम तीर्थं तत्पार्श्वदेवस्य। कालान्तरे तद्बिम्बं ततः स्थानात्स्तम्भनपुरे पूज्यतेऽधुना॥

॥ इति नागार्जुनप्रबन्धः ॥

(१९)

अथ वत्सराजोदयनप्रबन्धः—

पूर्वस्यां वत्सो जनपदः। तत्र कौशाम्बी पूः। श्रीऋषभवंश्यशान्तनु-विचित्रवीर्य-पाण्डु-अर्जुन-अभिमन्यु-परीक्षित-जनमेजयकुले सहस्रानीको राजा। तत्पुत्रः शतानीकः। तस्य पत्नी महासती चेटकराजनन्दनी

मृगाक्षी मृगावती नाम। तयोर्नन्दनः उदयनः। यः किल नादसमुद्रो विख्यातः। यो गीतिशक्त्या उज्जयिन्यां अनलगिरिभं विन्ध्याभिमुखं गच्छन्तं पुनरालाने निवेश्य चण्डप्रद्योतराज्यमद्योतयत्। स सुखेन राज्यं शास्ति यौवनस्थो भोगी कलासक्तो धीरः ललितो नायकः। इतश्च पाताले क्रौञ्चहरणं नाम पत्तनम्। तत्र वासुकिः सर्पराजः श्वेतो नीलसरोजलाञ्छितफणः। तस्य नामलदेवी नाम दयिता। विपुलो देशः। तक्षको नाम तस्य प्रतीहारो विषमादेविप्रियः। यस्य फणामण्डपे त्रयोदशभारकोट्यः विषस्य वसन्तीति श्रुतिः। वासुकेः पुत्री दिव्यरूपा कनी वसुदत्तिनामा। तस्याः सख्यश्चतुर्दश तद्यथा—"धारू १ वारू २ चम्पकसेना ३ वसन्तवल्ली ४ मोहमाया ५ मदनमूर्च्छा ६ रम्भा ७ विमलानना ८ तारा ९ सारा १० चन्दनवल्ली ११ लक्ष्मी १२ लीलावती १३ कलावती १४।" सा ताभिः सह वीणामृदङ्गवंशसूक्तादिभिः क्रीडति। एकदा तासां मध्यादेकया उक्तम्—"स्वामिनि! वसुदत्तिके! अहं स्वपरिच्छदा सध्रीची नरलोके कौशाम्ब्यां दिव्यरूपं महोद्यानं क्रीडितुमगाम्। दृष्टा तत्र बकुलविचाकिलदमनकचम्पकविरहकादिद्रुमाणां सारणीनां द्रुमालवालानां वाटीकोट्टस्य श्रीः। यदि स्वामिनी तत्केलिं काम्यति, तदा तत्र पादमवधारयतु। इदं श्रुत्वा सा वसुदत्तिका ताभिः सर्वाभिः सहेच्छासिद्ध्या सहसा तद्वनं प्राप्ता। तत्र केलिं कुर्वन्ति ताः—"कुसु-

For Private And Personal

मानि चिन्वन्ति । तैः करण्डान्पूरयन्ति । धमिल्लानुत्तङ्गयन्ति । हारान्सारान् रचयन्ति ।" एवं खेलन्तीनां तासां वने कोकिलकुलकलरवकलः कोलाहल उच्छलितः । तदाऽऽकर्णनादुद्यानपालक एत्य ता अद्राक्षीत् । अहोरूपमहो स्वरोऽहो प्रभेति विसिष्मिये । भक्त्या श्री उदयनं ताः समालोकितुमाहातुमगमत् । उदयनोऽपि कुतूहलादल्पपरिच्छदो वनमगात् । वसुदत्तिं ससखीकामालोकिष्ट । अध्यासीच्च-"मनोजन्मनः महाव्याधेः परमरसायनमेतत् । अस्याः रूपसम्पत् जिह्वाभिः कोटिभिः ताभिर्वर्णयितुमशक्या ।

अस्याः सर्गविधौ प्रजापतिरभूचन्द्रो तु कान्तिप्रदः शृङ्गारैकरसः स्वयं नुतनो मासो तु पुष्पाकरः ।
वेदाभ्यासजडः कथं तु विषयव्यावृत्तकौतूहलो निर्मातुं प्रभवेन्मनोहरमिदं रूपं पुराणो मुनिः ॥१॥

तद्यथा—

यत्पश्यन्ति झगित्यपाङ्गसरणिद्रोणीजुषा चक्षुषा गच्छन्ति कमलोलितोभयभुजं यन्नाम वामभुवः ।
भाषन्ते च यदुक्तिभिः सचकितं वैदग्ध्यमुद्रात्मभिस्तद्देवस्य रसायनं रसनिधेर्मन्ये मनोजन्मनः ॥१॥

तं दृष्ट्वा सा पलायिष्ट । नृपोऽप्यन्वमाद् द्रुतं द्रुतम् । क्षणार्द्धेन सर्वाः सख्योऽदृश्याः समपत्सत । सापि पातालविवरप्राये गर्त्ते एकस्मिन् प्रविष्टा । राज्ञापि ज्ञातम्-" कामरूपिणी गमिष्यत्येवेति ।" तावत्करे धृत्वा तस्या वेणीदण्डो यमुनाजलप्रवाहप्रायः कृपाणिकया छिन्नः । गता सा मृगशावलोचमा । वेणी करेऽस्थात् ।

ता वर्णी पश्यंस्तां चमत्कृतचकोरचलाचलाक्षीं स मुहुरस्प्राक्षीत्। ततो हृतप्रारम्भोद्बाष्पः सखेदः पूःपरिसरमेत्य अमात्यानाहूयावादीत्–"मया एवं एवं बालिकायाः कस्याश्चिद्वेणी छिन्ना। सा तु श्वभ्रमूलमगात्। अतो मम राज्येन न कार्यम्। इमामेव वेणीं राज्यं कारयत।" तेऽपि तथेति प्रतिपद्य पूर्बहिर्मण्डपे सोत्सवं वेणीं राज्यं कारयन्ति रामपादुकावत्। इतश्च सा वसुदत्तिका खिन्ना गत्वा स्वसौधेऽस्वाप्सीत्। तस्याः सख्यस्तत्कबरीं छिन्नामीक्षित्वा नामलदेवीमाकार्याऽदीदृशत्। जागरितां पुत्रीं नामलदेवी वत्से! किमेतत्? तवापि परिभवपदमित्यप्राक्षीत्। तनयापि यथास्थितं मात्रे आख्यत्, सापि नागपतये स्वपतये। क्रुद्धः सद्योऽसौ तक्षकमाकार्य कथामुक्त्वा आदिक्षत् यथा–"गच्छ सराष्ट्रं उदयनं भस्मीकुरु।" सोऽपि तदादेशादचालीत्। कौशाम्बीं प्रापत्। तत्परिसरे उत्सवान् दृष्ट्वा नररूपः किश्चित्पप्रच्छ–"किमेतदुत्सवसाम्राज्यम्?" तत्रत्येन जनेनोक्तं "एवं एवं–राज्ञा दिव्यकन्यावेणी छिन्ना। उत्पन्नाऽनुतापेन राज्यं तदायत्तं कृतम्। अतो वेणी राज्ञी। राजा चैव एकदेशे तपस्तप्यते।" तक्षकेणोत्सवो दृष्टो। मध्ये भ्रमता राजाऽप्यालोकितः कुशास्रस्तरगः पद्मासनी जयमालापाणिः तपःक्षामः जितप्राणायामः मौनी। पृष्टश्च तक्षकेण नृरूपेण–"कस्त्वं? किमर्थं तपश्चरसि?।" तेनापि दीर्घमुष्णं च निःश्वस्य गदितम्–"भो! पुरुषविप्र! किं पृच्छसि? मां मन्दभाग्यम्। दृष्टा मयैका पुण्यवती मृगदृग्। तामनुसर्पता मया पातकिना यान्त्यास्तस्याः कबरीं कृपाणि-

कया निजपुण्यदशया सह कृत्वा । सा मनीषितं स्थानं ससर्प । अहं तु उदयनो राजा राज्यं तस्मात्कृत्वा स्वयं तपः कुर्वाणोऽस्मि ।" एवं श्रुत्वा क्षणं स्थित्वा उपद्रवमकृत्वा पाताले यात्वा नागेन्द्रमाललाप-"निष्पापप्रज्ञः देव ! दृष्टो मया उदयनः, वेणीपुरश्च तथा राज्योत्सवः । स पुण्यात्मा मृदुमना बाढं परितप्यते । विनयी मानमर्हति ।" तच्छ्रवणाद् अतुषदाशीविषेन्द्रः । तर्हि किं युक्तमिति तक्षकमूचे । तक्षको बभाषे—देव ! स एव वसुदत्तिविवाहार्हः । कुलेन शीलेन विद्यया वृत्तेन पराक्रमेण रूपेण च किं वर्ण्यते सः । विद्या-कन्यालक्ष्म्यो हि कुस्थाने निवेशिता निवेशयितारं शपन्ति । नागमलदेवीमतं च लात्वा तक्षकेणैव वत्सरा-जमाजूहवत् । प्रवेशमहमचीकरत् । विवाहः प्रारब्धः । प्रथमायां दक्षिणायां सवत्सा गौः कामधेनुर्लब्धा । द्वितीयस्यां विशिष्टा नागवल्ली । तृतीयस्यां सोपधाना खट्वा सतूलिका । चतुर्थ्यां रत्नोद्योतो दीपः । एवं रत्नचतुष्केण सत्कृत्य सजायं जामातरं कौशाम्बीं पुरीं प्रति प्रेषयत् । गतः स्वपुरं तत्र ऋद्धं राज्यं भुनक्ति । क्रमेण स एव वासवदत्तां चण्डप्रद्योतपुत्रीं गुणकीर्त्ति पर्यणैषीत् ॥

इयं च कथा जैनानां न सम्मता, देवजातीयैर्नागैः सह मानवानां विवाहासम्भवतः । विनोदिसभा-ऽर्हेति । नागमताद्युद्धृत्यात्रोक्ता ।

॥ इति उदयनप्रबन्धः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ अथ लक्ष्मणसेनस्य प्रबन्धः–मन्त्रिणः कुमारदेवस्य च ॥

पूर्वस्यां लक्ष्मणावती पूः । तत्र लक्ष्मणसेनो नाम प्रतापी न्यायी नृपः । तस्य द्वितीयमिव जीवितं प्रज्ञाविक्रमभक्तिसारो मन्त्री कुमारदेवः । विपुलं राज्यम् । अपारसैन्यम् । अत्रान्तरे वाराणस्यां गोविन्दचन्द्राख्यनृपपुत्रो जयन्तचन्द्रो राजा । तस्य विद्याधरो मन्त्री । महेच्छानां अन्नदातॄणां सत्यवादिनां च प्रथमः । एकदा जयन्तचन्द्रसभायां वार्त्ता इयमासीत्–" यल्लक्षणावतीदुर्गं दुर्ग्रहं राजा महाचमूसमूहसम्पन्नः । " तां वार्त्तामवधार्य काशीपतिः प्रतिज्ञां सभासमक्षमग्रहीत्–" इतश्चलित्वाऽस्माभिर्लक्षणावतीदुर्गं ग्रहीतव्यम् । अथ न गृह्णामि तदा यावन्ति दिनानि दुर्गतटे तिष्ठामि, तावन्ति हेमलक्षाणि दण्डे गृह्णामि । अन्यथा न निवर्त्ते । " इति सन्धां निर्माय प्रयाणढक्कामदापयत् । मिलितः समकालं राजलोकः । जाता गजमयीव सृष्टिः । भूपालमालामयी च भूमिः । अश्वमयमिव जगत् । निर्गतं सैन्यं बहिः । अखण्डितैः प्रयाणैर्भञ्जन् परबलान्, शोषयन् सरांसि, पङ्कयन्नदीः, समीकुर्वन् विषमाणि, चूर्णयन् शिखराणि, लेखयन् शासनानि, जीवयन् साधुलोकान्, लक्षणावतीं प्राप्तः । दुर्गान्नातिदूरासन्ने भूभागे आवासान् दापयामास । लक्ष्मणसेनस्तु द्वाराणि पिधाय पूर्मध्ये एव तस्थौ । क्षुभिता पुरी । सङ्कीर्णत्वमापन्नमन्नपाथोघृततैलवसनताम्बू-

For Private And Personal

लादिवस्तूनाम् । स्थाने स्थाने वार्त्ता आर्त्ता प्रवर्त्तन्ते-"काशीपतिस्तु मुत्कलं परदेशं ग्रसते । सार्था एहिरे याहिरे कुर्वन्ति । सुभक्षमक्षामम् । नव्यानि कूपादीनि खनितानि । विचरन्ति स्वैरं सैनिकाः । वर्द्धन्ते व्यवसायाद् रिद्धयः । लुण्ठ्यन्ते ग्रामाः । द्वयोर्नृपयोरूर्ध्वमुखैरधोमुखैः शरैर्युद्धानि । गतानि दिनान्यष्टादश ।" तस्मिन् दिने सायं लक्षणसेनेन कुमारदेवो मन्त्री न्यगादि-"मन्त्रिन् ! इदमस्माभिरनुचितमाचरितम् । यदयं रिपुर्देशं प्रविशन्नेव न प्रतिस्खलितः । अधुना दुर्गरोधे लोको दुःखी मानग्लानिर्नः । तस्मात्प्रातर्योद्धव्यम् । दण्डं न ददामि । आह्वय सामन्तअमात्यादीन् ।" कुमारदेवः प्राह-"देव ! युक्तमेवेदम् ।

मृगेन्द्रं वा मृगारिं वा द्वयं व्याहरतां जनः । तस्य द्वयमपि व्रीडा क्रीडादलितदन्तिनः ॥ १ ॥

त्वयि धृतायुधे वज्रायुधोऽपि कातर एव तत्कालं मिलिताः प्रधानयोद्धाः । उक्तो युद्धाभिप्रायः । प्रीतास्ते पीतामृता इव ! उत्तम्भिताास्तत्र वैजयन्त्यः । निष्पन्ना वीरकरम्बकाः । सम्पन्नानि पत्न्यामुत्कलापनानि । एवं सति कुमारदेवो राजान्तिकाद् गृहं गत्वा मन्त्रयते स्म-"अस्माकं प्रभुर्युद्धार्थी जयन्तचन्द्रस्तु बली ।

अस्थाने बलमारम्भो निदानं क्षयसम्पदः ॥ १ ॥

तस्मात् किं कर्त्तव्यम् ?। आः ! ज्ञातम्-"जयन्तचन्द्रमन्त्री विद्याधरोऽनुसरणीयः । स हि प्रतिपन्नशूरः सकृपो निष्पापो दानी ।" इति विमृश्य पत्रीमेकां स्वलिखितां सहादाय प्राकारान्नगरस्रोतोद्वारेणैवैकाकी

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

निर्गत्य मध्यरात्रे बहिः सैन्ये मन्त्रिगृहद्वारेऽस्थात्। तत्र द्वाःस्थैर्मध्ये मन्त्रिणं विद्याधरं आत्मानमायान्तमजिज्ञपत्। सद्यराहूतस्तेन। आसितः स्वसमीपे, पृष्टश्च—"किं भवन्तः ?।" मन्त्रिणोक्तम्—"अहं लक्षणसेनाऽमात्यः कुमारदेवस्त्वां द्रष्टुमायासिषम्। किञ्चिद्वक्तव्यमस्ति। तत्तु वक्तुं न शक्यते। पत्री तु लिखिता वक्षति। इत्युक्त्वा विद्याधरहस्ते तामार्पिपत्। तत्र श्लोको दृष्टः—

उपकारसमर्थस्य तिष्ठन् कार्यातुरः पुरः। मूर्त्या यामार्त्तिमाचष्टे न तां कृपणया गिरा ॥ १ ॥

अस्य श्लोकस्यार्थं चिरं परिभाव्य विद्याधरोऽचिन्तयत्—"अयं महीयान् मदन्तिकमागतः। जयन्तचन्द्रापसारणमीहते। दण्डं च न दित्सते। मय्येव भारमारोपयति। तस्मान्निस्तार्योऽसौ व्यसनसागरात्।

स एव पुरुषो लोके स एव श्लाघ्यतामिह। निर्भयं सर्वभूतानि यस्मिन् विश्रम्य शेरते ॥ १ ॥

इति ध्यात्वा कुमारदेवं जगाद—"मा भैषीः। दण्डं मा दाः। प्रातरत्रास्यत्सैन्यं न स्थास्यत्येव। गच्छ।" इत्युक्त्वा कुमारदेवं सत्कृत्य व्यस्राक्षीत्। गतः स स्वस्थाने। इतश्च विद्याधरो जयन्तचन्द्रान्तिकं गत्वा विज्ञप्तवान्—"राजेन्द्र! अद्य देवस्यात्रागतस्य दिनाष्टादशकं गतम्। कुमारदेवेन स्वयमेत्य ममाष्टादश हेमलक्षाणि प्रवेशितानि अतोऽभयं देहि! प्रसीद। स्वस्थानं गच्छ। काश्यामपि बुभुक्षायां निर्वाहो नास्ति। दुर्ग्रहं च दुर्गं।" इति श्रुत्वा काशीन्द्रः सद्यो रात्रावेव चलितः। दशक्रोशीं गत्वा स्थितः स्वनगर्याभिमुखीभिः पट-

For Private And Personal

कुटीभिः। लक्षणावतीलोको विस्मितो हृष्टश्च। लक्षणसेनेन कुमारदेवः पृष्टः–“किमिति गतो जयन्तचन्द्रः?।” मन्त्रिणोक्तम्–देव! त्वां युद्धोद्यतं श्रुत्वा काशीन्द्रः सभीतः प्राणत्राणार्थं गतः। काश्यधिपोऽपि काश्यासन्नं गतः सन् विद्याधरमादिशत्–“लक्षणावतीशदण्डधनचतुर्दिग्मिलितेभ्योऽर्थिभ्यो देहि। येन यशांसि प्रैधते।” विद्याधरोऽपि स्वामिनं स्माह–“देव! कुमारदेवेन मह्यं रत्नमेकं दण्डपदे दत्तमस्ति। तेन सद्यः कथं हेम निष्पद्यते?” राजोचे–“तर्हि रत्नं दर्शय।” अथ तेन पत्रीगतः श्लोकोऽदर्शि, कुमारदेवागमनवृत्तान्तश्च प्रोक्तः। विद्याधरमुखाच्च तदवधार्य जयन्तचन्द्रो जजल्प अनल्पधीः–“मन्त्रिन्! तदैव किं नेयं पत्री दर्शिता?। येन तेभ्यो विशिष्टां कृपां कुर्मस्तदैव। त्वया स्वधनार्पणाङ्गीकारेणैव वयं तत उत्थापिताः। प्रापितो दण्डोऽस्मभ्यं किल तेन। अथ हेमाष्टादशलक्षाणि कोशादाकृष्यार्थिभ्यो देहि। अष्टादशहेमलक्षास्तु कृपाप्रसादपदे लक्षणसेनाय, अष्टौ हेमलक्षाः कुमारदेवाय प्रेषय।” तथैव कृतं विद्याधरेण। प्रविष्टौ काशीं तौ। स्फीतराज्यं भुङ्क्तः। षड्विंशतिहेमलक्षेषु तत्र गतेषु लक्षणसेनेन कुमारदेवः पृष्टः किमिदं?। कुमारः स्मितपूर्वकमाचष्ट–“त्वां विरोध्य कः सुखी तिष्ठेत्। ततोऽरिणा दण्डस्तेऽर्पितः। पिप्रिये पृथ्वीपतिः। मुमुदे प्रजाः। ववृते महोत्सवः। एवं मन्त्रिणः कालज्ञाः सुगूढाशयाः लोकभूपयोः कार्यं कुर्युरिति ॥

॥ इति लक्षणसेनकुमारदेवप्रबन्धः ॥

॥ अथ मदनवर्म्मप्रबन्धः—

चौलुक्यवंश्यो मूलराजचामुण्डराजदुर्ल्लभराजभीमान्वये कर्णदेवजन्मा मयणल्लदेविकुक्षिभूर्द्वादशो रुद्र इति विदितबिरुदः श्रीजयसिंहदेवनामा महीपतिरभूत्। स अणहिल्लपत्तनान्निर्गत्यामितैः सैन्यैर्मालवदेशराजधानीं धारां द्वादशभिर्वर्षैर्जग्राह। प्रतोलीत्रयं स्फोटयित्वा यशःपटहकुञ्जरेण लोहीमर्गलामन्वभञ्जत्। साऽद्यापि देवपत्तने सोमनाथाग्रे दृश्यते। यशःपटहो मृत्वा व्यन्तरोऽभूत्। जयसिंहो मध्ये पुरं प्रविष्टो नरवर्माणं भूमौ पातयामास। वितस्तमात्रं चर्म्माहिसत्कमुदतीतारत्। अत्रान्तरे प्रधानैर्विज्ञप्तम्—"राजन्! राजाऽवध्य एवेति नीतिवचः। तस्मान्मोक्तुमर्होऽयम्।" ततो मुक्तः सः काष्ठपिञ्जरे क्षिप्तः। नरवर्मचर्माऽन्यचर्मभ्यां सिद्धराजेन निजकृपाणे प्रत्याकारः कारितः। ततः कवीश्वरैर्विविधं स्तूयते सः—

एकधारापतिस्तेऽद्य द्विधारेणासिना जितः। किं चित्रं यदसौ जेतुं शतधारमपि क्षमः॥ १॥

ततो दक्षिणापथे महाराष्ट्र-तिलङ्ग-कर्णाट-पाण्ड्वादिराष्ट्राण्यसाधयत्। अनन्तं धनं सङ्घटितम्। ततो गुर्जरधरां प्रतिन्याघुटत्। यावद्देशसीमसन्धौ सैन्यनिवेशं कृत्वा स्थितस्तावत् सायं एकदा महर्ध्यां सभायामुपविष्टोऽस्ति प्रत्यक्ष इव सुर परिवृढः। तावत्कश्चिद्वैदेशिको भट्टः एत्याशीर्वादं भणित्वा सभां दृष्ट्वाऽवद- ॥ ९७ ॥

दिदं यथा–" अहो ! परमारवंशधूमकेतोः श्रीसिद्धराजस्य सभा मदनवर्मण इव मनोविस्मयजननी ।" तदाकर्ण्य सिद्धेन्द्रस्तमेव भद्रं पुरः उपवेश्य पप्रच्छ–" भद्र! कोऽसौ मदनवर्मा? क्व नगरे राज्यं करोति ?।" भद्रः प्राह–" देव! पूर्वस्यां महोबकं नाम पत्तनं स्फारम् । तत्र मदनवर्मा नाम पृथ्वीपालः प्राज्ञस्त्यागी भोगी धर्मी नयी नल इव पुरुषोत्तम इव वत्सराज इव पुनरवतीर्णः पृथिव्याम् । तं राजानं तच्च पुरं यः खलु नित्यं पश्यति सोऽपि वर्णयितुं न पारयति । केवलं पश्यन्नन्तर्मनसं मूक इव स्वादं तद्गुणं जानाति । अस्माकं वचसि प्रायो लोकस्य विश्वासो नास्ति वावदूकत्वात् । परं प्रेषय किञ्चित्परमाप्तं निजं मन्त्रिणं ज्ञम् । येन स तामृद्धिं दृष्ट्वाऽत्रागत्य देवपादेभ्यो निवेदयति ।" एवं भाट्टीं वाचमवधार्य सिद्धराजो मन्त्रिणमेकं कतिपयजनयुतं द्रष्टुं तत्र तेनैव भद्रेण सह प्राहैषीत् । गतौ तौ भद्रमन्त्रिणौ । महोबकपत्तनं दर्शितं भद्रेण मन्त्रिणा । दृष्ट्वा निर्विलंबं उपराजमेत्य यथास्थितमभाणीत्–" अवधारय स्वामिन् । गतस्तत्राहम् । दर्शितं भद्रेण तत्पत्तनम् । तदा वसन्तोत्सवस्तत्र प्रवर्त्तते । गीयन्ते वसन्तान्दोलकादिरागैर्गीतानि । भ्रमन्ति दिव्यशृङ्गारा नार्यः । मकरध्वजलक्षभ्रान्तिमुत्पादयन्तो विलसन्ति युवानः । क्रियन्ते प्रतिरथ्यं छण्टनानि यक्षकर्दमैः । प्रासादे प्रासादे सङ्गीतकानि । देवे देवे महापूजा । भोजनवारासाराः प्रतिसदनम् । राजकीयसत्राकारे तु दालिकूरा-वस्त्रावणानि मुत्कलानि न मुच्यन्ते । किन्तु गर्त्तायां नियन्त्र्यते, तदा सघण्टो हस्ती निमज्जति । राजाऽश्व-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वाराः परितः पुरं भ्रमन्तो बीटकानि ददते लोकाय। कर्पूरैर्धूलिपर्वादयः। रात्रौ विपणीन् वणिजो न संवृणन्ति उद्‌घाटान् विमुञ्चन्ति । प्रातरागत्योपविशंति । एवं नीतिः । व्यवसायोऽप्याचारमात्रेणैव । तत्र देशे लोह-खानिवत्सुवर्णरूप्यखानीर्वहन्ति तेन सर्वः कोऽपि सिद्धार्थत्वात् । राजा तु कीदृगप्यास्ते मया स न दृष्टः। इदं श्रुतं स नारीकुञ्जरः सभायां कदापि नोपादिशति । केवलं हसितललितानि नेति प्रत्यक्ष इन्द्रः । ”

एवं वचः श्रुत्वा सिद्धराजो महता सैन्येन महोबकं प्रति प्रतस्थे । क्रमेण गच्छन् तस्थौ तदासन्ने भूप्रदेशे क्रोशाष्टकेन। क्षुभितो देशः। स्थानाच्चालितं महोबकम्। प्रधानैर्मदनवर्मा दिव्योद्यानस्थः स्त्रीसहस्रसमावृत्तः एत्योचे–“ स्वामिन् ! सिद्धराजो गौर्जरः उपनगरमागतोऽस्ति, स कथं पश्चान्निवर्त्तनीयः ? ।” मदनवर्मणा स्मित्वा भणितम्–“सिद्धराजः सोऽयं यद्धारायां द्वादश वर्षाणि विग्रहाय अस्थात्। स कबाडी राजा वाच्यो भवद्भिः । यदि नः पुरं भुवं च जिघृक्षसि । तर्हि युद्धं करिष्यामः । अथार्थेन तृप्यति तदाऽर्थं गृहाणेति । ततो यद्याचते सवराकस्तद्देयं भवद्भिः । न वयं धने दत्ते त्रुट्यामः। सोऽपि जीवतु चिरम् , यो वित्तार्थं कृच्छ्र-कर्माणि कुर्वाणोऽस्ति ।” राज्ञो वचोऽनुगृहीत्वा मन्त्रिणः परचक्रमगुः । मन्त्रिभिर्राजवाक्यं दूतमुखेन भाणितम्–“यदि अर्थमीहसे तदाऽर्थं लाहि । भूमिं चेत्तर्हि युद्धामहे वयम् । मदनवर्मदेवाय ज्ञापितं अत्र भवदागमनम् । तेन अस्मत्प्रभुणा उक्तम् , कबाडी राजाऽर्थेन तर्पणीयः सः । ” सिद्धराजस्तल्लीलया विस्मितः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

षण्णवतिकोटीः कनकस्यायार्चीत् । दत्तास्ताः प्रधानैः । सद्यः देशं सुखं तस्थौ । तथापि पश्चान्न याति । तदा प्रधानैर्भाणितम्–राजन् ! अर्थो लब्धस्त्वया । कथमथ न प्रतिगच्छसि ।" सिद्धेशेनभाणितं मन्त्रिपुरः– "तं लीलानिधिं भवत्प्रभुं दर्शयथ ।" तेऽप्येत्य मदनवर्माणमभणत्–" अर्थेन तोषितः स क्लेशी राजा । परं भणति राजेन्द्रं द्रष्टुमीहे ।" ततो मदनवर्मणा निगदितम्–" तर्हि एतु सः सैन्यं तथास्थमेव मुक्त्वा ।" ततो मितसैन्यस्तत्रोद्याने आगतः सिद्धराजः । यत्र महाप्राकारस्थे सौधे मदनवर्माऽस्ति । प्राकाराद्बहिर्योधलक्षास्तिष्ठन्ति । प्रतोलीं यावदागत्य मध्येऽचीकथद् द्वाःस्थैः, आगतमस्माभिः । महाचक्रप्रभुणा भाणितम्– "जनचतुष्केण सहागच्छत ।" आगतो मध्ये सिद्धराजः। यावत्पश्यति काञ्चनतोरणानि सप्तप्रवेशद्वाराणि। अग्रे ददर्श रजतमयीर्वापीः, नानादेशभाषाविचक्षणाः शशाङ्कमुखीर्विशालनितम्बस्थलास्तारुण्यपुण्यावयवाः स्त्रीः, पणववेणुवीणामृदङ्गादिकलासक्तं परिजनजनम् । स्फीतानि गीतानि शुश्राव । नन्दनोद्यानाधिकमुद्यानं, हिमगृहाणि, हंससारसादीन् खगान् , उपकरणानि हैमानि, कदलीदलकोमलानि वसनानि, जनितानन्तरागान् उत्तुङ्गान् पुष्पकरण्डांश्चैक्षत । एवं पश्यन् पश्यन् पुरः पुरो गच्छन् साक्षादिव मदनं मधुरे वयसि वर्तमानं मितमुक्ताफलप्रायभूषणं सर्वाङ्गलक्षणं काञ्चनप्रभं मधुरस्वरं तामरसाक्षं तुङ्गघ्राणं उपचितगात्रं मदनवर्माणमपश्यत् । मदनवर्माप्यभ्येत्याश्लिक्षे । हेमासनं दत्त्वा तमभाणीत्–" सिद्धेन्द्र ! पुण्यमद्यास्माकं येन

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

त्वमतिथिः सम्पन्नोऽसि।" सिद्धराजः प्राह-"राजन्! आवर्जनावचनमिदं मिथ्या। यत्तु त्वन्मन्त्रिणामग्रे कबाडी इत्युक्तं तत्सत्यम्।" मदनवर्मा जहास। सिद्धेश! केन वा विज्ञप्तमिदम्। सिद्धेशः प्राह-"तैरेव मन्त्रिभिस्तावकैः। कोऽभिप्रायो मान्निन्दाभणने देवस्य।" मदनवर्मा आह-"देव! कलिरयम्, अल्पं जीवितम्, मिता राज्यश्रीः, तुच्छं बलम्, तत्रापि पुण्यैः स्फीतं राज्यं लभ्यते, तदपि चेत् न भुज्यते, कल्यते विदेशेषु, तत्कथं न कबाडिकस्त्वम्।" सिद्धेशेनोक्तं-"सत्यम्," तादृशः कर्पाटिक एवाहम्। त्वमेवायं धन्यो यस्येत्थं शर्माणि। त्वयि दृष्टेऽस्माकं जीवितं सफलम्। चिरं राज्यं भुङ्क्ष्व।" इत्युक्त्वा तस्थौ। मदनवर्मणोत्थाय निजपरिजनकोशाद्वनावसरादि सर्वं दर्शितम्। प्रेमाऽवर्धत। विंशत्युत्तरं पात्रशतं स्वाङ्गसेवकं सिद्धराजाय व्यतरत्। तेन प्रीतो जयसिंहदेवः सैन्यं गृहीत्वा धारामध्ये भूत्वा पत्तनं अणहिल्लपुरं प्रविष्टः। तेषां १२० मध्यादर्द्धं पथि मृतं मार्द्दवात्, शेषं पत्तने प्रविष्टम्। पत्तनप्रवेशोत्सवे श्रीपालकविना सिद्धराजा वर्णितः—

मानं मुञ्च सरस्वति त्रिपथगे सौभाग्यभङ्गीं त्यज रे कालिन्दि तवाऽफला कुटिलता रेवे रयस्त्यज्यताम्।
श्रीसिद्धेशकृपाणपाटितरिपुस्कन्धोच्छलच्छोणितश्रोतोजातनदीनवीनवनितारक्तोऽम्बुधिर्वर्तते ॥ १ ॥

एवमन्यैरपि कविभिर्भणितानि ॥

॥ इति मदनवर्मप्रबन्धः ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अथ रत्नश्रावकप्रबन्धः—

उत्तरस्यां दिशि काश्मीरेषु देशेषु नवहुल्लं नाम महर्द्धिमत्पत्तनम् । तत्र विक्रमाक्रान्तभूचक्रो नवहंसो नाम भूपालः । तस्य राज्ञी रूपश्रीहसितरम्भागर्वा विजयादेविनाम्नी । तत्रैव पत्तने पूर्णचन्द्रः श्रेष्ठिराजोऽभूत् । तन्नन्दनास्त्रयः । रत्नो मदनः पूर्णसिंहश्च । त्रयोऽपि जैनाः श्रीमन्तः प्रियंवदाः सात्त्विकाः प्राज्ञाः राजपूज्याः प्रारम्भसिद्धाः । रत्नस्य पत्नी पउमिणीरिति ख्याता । पुत्रस्तु कोमल इति नाम बालो वर्त्तते । तदा श्रीनेमिनाथनिर्वाणादष्टसहस्री वर्षाणां व्यतीताऽस्ति । अस्मिन्नवसरेऽतिशयज्ञानी पद्ममहादेवनामा नवहुल्लपत्तनपरिसरे समवासार्षीत् । देवैर्भूमिः शोधिता । उदकैश्छोटिता । कनकपद्मं मण्डितम् । तत्र पद्ममहादेव उपविष्टः । मध्ये नगरस्य तदागमनं ज्ञापितमुद्यानपालेन लोकाय नृपाय च । प्रथममागतो नृपः सान्तःपुरपरिच्छदः । सरत्नमदनपूर्णसिंहः । अपरोऽपि लोकस्तथैव । श्रेष्ठिनी पउमिणिरपि सपुत्रा तत्रागता । एवं सभायां द्वादशपर्षत्सुन्दरायां गुरुर्देशनां प्रारेभे—

यास्यामीति जिनालये स लभते ध्यायंश्चतुर्थं फलं षष्ठं चोत्थितमुद्यतोऽष्टममथो गन्तुं प्रवृत्तोऽध्वनि ।
श्रद्धालुर्दशमं बहिर्जिनगृहात् प्राप्तस्ततो द्वादशं मध्ये पाक्षिकमीक्षिते जिनपतौ मासोपवासं फलम् ॥१॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सयं पमज्जणे पुन्नं सहस्सं च विलेवणे । सयसाहस्सीया माला अणंतं गीअवाइअं ॥ २ ॥

पूजा कोटिसमं स्तोत्रं स्तोत्रकोटिसमो जपः जपकोटिसमं ध्यानं ध्यानकोटिसमो लयः ॥ ३ ॥

इदं सामान्यतः सर्वजिनसेवाफलम् । शत्रुञ्जये तु सविशेषं तदेव असंख्यानां यतीनां सिद्धत्वेन सिद्धक्षेत्रत्वात् ।

धूवे पक्खो वासो मासक्खवणं च कप्पूरधूवम्मि । कत्तिअमासक्खवणं साहूपडिलाभिए लहइ ॥१॥

इति वचनात् । शत्रुञ्जयादपि रैवतसेवा महाफला । रैवतो हि शत्रुञ्जयैकदेशत्वात् शत्रुञ्जय एव, श्रीनेमिकल्याणकत्रयभावादतिशायितमप्रभावश्च । नेमिनाथस्य माहात्म्यं मिथ्यादृशोऽपि प्रभासपुराणे एवं प्रवदन्तः श्रूयन्ते—

पद्मासनसमासीनः श्याममूर्त्तिर्दिगम्बरः नेमिनाथः शिवेत्याख्यो नाम चक्रेऽस्य वामनः ॥ १ ॥

वामनावतारे हि वामनेन रैवते नेमिनाथाऽग्रे बलिबन्धसामर्थ्यार्थं तपस्तेपे इति तत्र कथा ।

कलिकाले महाघोरे सर्वकल्मषनाशनः दर्शनात्स्पर्शनाद्देवि कोटियज्ञफलप्रदः ॥ २ ॥

ईश्वरोक्तमिदं प्रभासपुराणे एवम्—" तस्मायेन नेमिनाथो वन्दितो रैवतगिरिमारुह्य तेन किल परमपदं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रद्धालुना गृहीतमेवेति तत्त्वम् ।" इत्येतां देशनां श्रुत्वा रत्नः श्रावक उत्थाय गुरोरग्रे प्रतिज्ञां चक्रे-"मया ससङ्घेन यदा रैवते नेमिः प्रणतो भविष्यति। तदा द्वितीया विकृतिर्ग्रहीतव्या। तदैव एकभक्तं भोक्तव्यम्। तावन्तं च कालं यावद् भुवं भूमिशय्याब्रह्मचर्यं धार्यं । वरं प्राणांस्त्यजामि परं नेमिनाथं नमाम्येवेति ।" ततः स्वगृहमायातो राजा लोकश्च। रत्नश्रावकोपरोधात् पट्टमहादेवस्तत्रास्थात्। रत्नस्तूपायनं दत्त्वा राजानमूचे-" राजन् ! मां नेमियात्रायै रैवतगमनाय विसृज ।" राज्ञोक्तम्-" स्वैरं धर्मः समाचर्यताम् । अस्माकं मतमेतत् । यद्विलोक्यते तद् गृहाण ।" रत्नो जहर्ष । सङ्घममेलयत्। गजरथतुरगपदातिरूपं महत्तमं सैन्यं नृपाल्लेभे। यस्य यन्न्यूनं तस्य तत्पूरयामास। अमारिचैत्यपरिपाटीशान्तिकभोजनवाराप्रतिलाभनाबन्दिमोक्षलोकसत्कारांश्चकार । गणितं मुहूर्त्तम् । चलितो देवालयः । राजा महोत्सवकरः परमसखा करभशतैर्धनानि चेलुः। श्रेष्ठिनी पउमिणिर्नृपपत्नीं विजयदेवीं बालवयस्यां भेटयितुं जग्मुषी पादयोस्तस्याः पेतुषी आपपृच्छे-"स्वामिनि ! यात्रायै यान्त्यस्मि। भवद्वियोगदुःखं दिनकतिपयानि धर्मलोभतः सोढुमीहेऽहम्।" राज्ञी अपि शास्तुमूचे-" सखि ! तत्र गता धनकृच्छतया कार्पण्यं कृत्वा मां लज्जापात्रं मा कृथाः । स्वैरं ददीथाः । अमूनि धनानि भूषणानि वसनानि यथेच्छं गृहाण ।" इत्युक्त्वा भूरि ददे । पदानि कतिपयानि सम्प्रेषयत् । निवृत्ता राज्ञी । श्रेष्ठिनी सङ्घमध्यमध्यास्त । श्रीपद्ममहादेवो गुरुः सह व्यवहरत् । तेन सनाथः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सङ्घः। नित्यं धनस्य स्वैरं व्ययः। कोटीश्वराः साधर्मिकाः परलक्षाः। चन्द्रहासखड्गमङ्का भटाः शतसहस्राः।
तेन क्व भीः। एवं पथि तीर्थानि वन्दमानो रत्नः सङ्घपतिर्बान्धवद्वययुतः सपुत्रः सपत्नीकस्तावद् ययौ।
यावद् रोलातोलाख्यौ द्वौ पर्वतौ स्तः। तत्र प्राप्तः। इह किल शत्रुञ्जयमध्ये भूत्वा रैवतं गच्छतां लोकानां
रोलातोलौ गिरी न स्तः। परं भद्रेश्वरपथे गच्छतां स्तः। तत्र रोलातोलयोरद्वयमुखे मिलित्वा तोडुकद्वयमिव
जातमास्ते। तत्र परिसरे सङ्घ आवासितः। दिनं सर्वं स्नात्रचैत्यवन्दनानादपूजाभोजनादीनि स्वैरं ववृतिरे।
रात्रौ सुखं स्थितं। प्रातः पुरो गमनाय संनह्याचलत्सङ्घः। यावदग्रयानं गिरिमुखसङ्कटपथेन चलितुं प्रवृत्तम्।
तावता कश्चिदेको मषीश्यामो व्यात्तवक्त्रो नरसिंहवपुरट्टहासी बहुगव्यूतोच्चो दंष्ट्राकरालास्यो नखरैर्लोकं
दारयितुं प्रववृते। भक्षयामि भक्षयामि च ऊचे। तद् दृष्ट्वा भीतो लोकः पश्चान्निवृत्य गच्छति। तद्राजपुत्रै-
र्ज्ञातम्। तैर्गत्वा स कालरूपः प्रबभाषे—"कस्त्वं कथं जनमुपद्रवसि ?। देवो वा दैत्यो वा राक्षसो वा येन
तन्नाम्ना पूजयामः।" स कालमूर्त्तिर्वदति—"किं रे! बाढं वदथ। यदि पुरः पदमेकं व्रजिष्यथ। तदा सर्वान्
एकैकशश्चर्वयिष्याम्येव।" इति गदति सति तस्मिन् सङ्घरक्षपालैर्भटैर्व्याघुट्य रत्नो विज्ञप्तः—"देव! एव-
मयं वृत्तान्तः। पुरो गन्तुं न लभ्यतेऽभाग्यात्। एवं तद्दंष्ट्राचर्विता लोकाः पुरः पतिताः प्रेक्ष्यन्ताम्। तदा-
कर्ण्य कर्णकटुकं विषण्णो रत्नः। क उपायः ? का गतिः ? का मतिः ? इति कलकलितः सङ्घः। विशेषतः

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सर्वो जनः । स्थाने स्थाने वृन्दशो वार्त्ताः । केचिद्वदन्ति–" पश्चान्निवृत्य गम्यते । अयं सर्वं भक्षयिष्यत्येव । जीवन्नरो भद्रशतानि पश्यतीति ।" अपरे त्वाहुः–"म्रियते चेद् म्रियताम् । गम्यते पुरः, नेमिरेव शरणम् ।" केचिद् द्रुमलतान्तरेनास्तस्थुः । अन्ये ज्योतिषमपश्यन् । इतरे सङ्घप्रस्थानमुहूर्त्तदातारमनिन्दिषुः । इत्येवं विषमे वर्त्तमाने सङ्घपतिरत्नेन भट्टाः प्रभाषिताः–" गत्वा पृच्छत तं घोरं नरम् । त्वं कथं प्रसीदसि । येन तत्कुर्मः । पुरो व्रजामः ।" गता भट्टाः । भाषितं रत्नवचनं तदग्रे । तेनोक्तम्–" अहमेतस्या गिरिभुवोऽधिष्ठाता । एकं सङ्घप्रधानमानुषं भक्षयामि । ततस्तृप्यामि । अन्येषां नोपद्रवामि, प्रतिज्ञां च न लङ्घे ।" ते भट्टास्तत्सकर्णाकर्णीय तदालापं रत्नाय ऊचुः । रत्नेनैकत्रोपवेशिताः सर्वं लोकास्तथा सन्नद्धा एव भणिताश्च ते लोकाः–" पुण्यं मे महद् , येनासौ कोऽपि घोरपुरुषः एकं मानुषं जिघृक्षति । तद्भक्षणात् तृप्तश्चेच्छेषं न भक्षयति । तस्माद् यूयं याता नेमिं वन्दध्वम् । मयाऽस्मै स्थानं देयम् । अहो ! लाभोदयः । इयत्कालं विविधयत्नपालितं देहं सङ्घार्थे उपकृतम् ।" एवमुक्त्वा तूष्णीके सङ्घे राजपुत्राः प्रभणन्ति–" नररत्न ! रत्न ! त्वं चिरं जीव । अस्माकं मध्ये एकतरेण स यातु । वयं हि सेवकाः । सेवकानां च धर्मोऽयम् । यन्मृत्वाऽपि प्रभुरुद्धरणीयः । अन्यथा धर्मयशोवृत्तिक्षयात् ।"

ते मुग्गडा हराविया ये परिविद्धातराहं । अवरुप्परजोयं तह सामिउगं जिउजाहं ॥ १ ॥

For Private And Personal

सङ्घप्रधानसाधर्मिका ऊचुः–"हेरत्न ! त्वं चिरं जीव । युवाऽसि राजपूज्योऽसि सहस्रलक्षजनपोषकोऽसि वयं विनश्वरकलेवरव्ययेन स्थिरं धर्म्मं जघृक्षामहे ।

जइ रक्खिज्जइ तो कुहइ, अह डज्झइ तउ च्छारं । एयह दुट्ठकलेवरह जं वाहियइ तं सार ॥ १ ॥

मदनपूर्णसिंहभ्रातरौ जगदतुः–" आवयोस्त्वं ज्येष्ठो भ्राता । ज्येष्ठो भ्राता पिता यथा । पितुरायत्तश्च पुत्रप्रायो लघुभ्राता । किं रामाग्रे युद्ध्वा लक्ष्मणेन न प्राणास्तृणीकृताः ? ।

स्नेहोन ज्ञायते देव ! प्रणामात्र मृदूक्तितः । ज्ञायते तु क्वचित्कार्ये सद्यः प्राणप्रदानतः ॥ १ ॥

पउमिणिर्ब्रूते–" कुलस्त्रियायाः पत्याधीनाः प्राणाः । पत्यौ लोकान्तरिते जीवन्त्यपि मृताः शृङ्गाराद्यभावात् । यथा—

शशिना सह याति कौमुदी सह मेघेन तडिद् विलीयते । प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ॥१॥

भर्तरि मृते नार्याऽनुमर्तव्यम् । तावद्यदि मयि मृतायां त्वं जीवसि । तदा किं न लब्धं मया ।" कोमलः प्राह तात !—

एकदेहविनिर्माणादधमर्णीकृतैः सुतैः । यशोधर्ममयं देहद्वयं पित्रोर्विनिर्मितं ॥ १ ॥

For Private And Personal

इत्येवं वदतस्तान् सर्वान् युक्तिभिर्बाढं निषेध्य स्वयं मर्त्तुं स्थितः। सङ्घो वहन् कृतः। कालपुरुषेणोपद्रवो न कृतः। गते तु सङ्घे रत्नःश्रीनेमिपरायणः स्थिरः तस्थौ। पउमिणिर्नागे गता। परत्र स्थित्वा कायोत्सर्गमधात्। कोमलोऽपि तथैव। कालपुरुषेण रत्नो गिरिगुहायामेकस्यां क्षिप्तः। द्वारि शिलां दत्त्वा पुच्छं आच्छोटयति। सिंहनादैः खं बधिरयति। तथापि रत्नो न बिभेति। हृदि स्थितजिनरागः। अत्रान्तरे कूष्माण्डीं वन्दितुं रैवतशिखरं क्षेत्रपतयः सप्त कालमेघ १ मेघनाद २ गिरिविदारण ३ कपाट ४ सिंहनाद ५ खोटिक ६ रैवत ७ नामानो मिलिताः। ते देवीं वन्दित्वा ऊचुः–“ देवि ! क्वापि पर्वतो धडहडायते। ईदृशं क्वापि पूर्वं न जातम्। यादृगधुना वर्त्तते। ततः पश्य किमिदं ?। क्वापि पुरुषो महानेक उपद्रूयमाणोऽस्ति केनापि क्रूरेण।” अम्बया ज्ञातं ज्ञानेन। तैः सह तत्र गता। पउमिणिकोमलौ दृष्टौ तथा कायोत्सर्गस्थौ। कृपाभक्ती जाते। गुहाद्वारं गत्वा स आक्षिप्तः क्रूरः। रे ! किमिदं करोषि। युध्यस्व चेत्समर्थोऽसि। रत्नं रक्षामो वयं क्षेत्रपालाः। अहं अम्बा जगदम्बा। तथोक्तेघुर्घुरितः सः। युद्धं वप्तृते। यावता सोऽम्बया पादे धृतः शिरः परितो भ्रमयित्वा स्फालयिष्यते ग्रावणुग्रे तावत्प्रत्यक्षो दिव्यमूर्त्तिः पुरतो नरो ददृशे। रत्नश्च पुरः दिव्याभरणाङ्गरागी सप्रियः सपुत्रः सुखी। उचे च स दिव्याङ्गः–“ अम्बे ! क्षेत्रपाः श्रीरत्नश्च शृणुत। यदा रैवतमहिमानं गुरुर्जगौ। तदाऽनेन रत्नेन प्रतिज्ञा कृता। मया प्राणव्ययेनापि नेमिर्वन्दनीय एवेति। तदाऽहं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वैमानिकः सुरः शङ्करो नाम। तत्र उपगुरु निषण्ण आसम्। मया न सोढा साऽस्य सन्धा। तेनात्रागत्य एवमुपद्रुतोऽयं रत्नः महासत्त्वः। धन्याऽस्य जाया पुण्यवानङ्गजः श्लाघ्या यूयं सङ्घभक्ताः साहाय्यकराश्च। अहं यदि सत्येनैव युध्येयम्। तदा भवद्भिर्न जीयेय। परं क्रीडामात्रमेतदमलिनमनसा कृतमिति। रत्नैर्दृष्ट्वा रत्नमालिङ्ग्य सङ्घमध्ये मुक्त्वा स्वयं द्यां ययौ। अम्बाद्या गिरिमगुः। सङ्घो रैवतकमारुरोह। नेमिं ननाम। लेप्यमूर्त्तौ नेमौ तथा स्नात्रं जलैस्तेने। यथा बिम्बं घटीद्वयेन गलित्वा मृद्भूय भूम्या सह मिलितम्। विषण्णाः सर्वेऽपि। विशेषतस्तु रत्नः। अचिन्तयच्च धिग्मां आशातनाकारिणम्। येन एवंविधतीर्थविध्वंसवृजिनभाजनं जातोऽस्मि। अथ तदा भोक्तव्यम्। यदा तीर्थं पुनः स्थापितं भविष्यति। इत्युक्त्वा बन्धवो सङ्घरक्षायै नियुज्य अम्बां ध्यात्वा तपस्तेपे। षष्ट्युपवासान्तेऽम्बा प्रत्यक्षीभूय तं काञ्चनबलानाख्ये इन्द्रनिर्मिते निःशा निनाय। तत्र तीर्थे द्वासप्ततिजिनबिम्बानि महाकायान्यदीदृशत्। तत्राष्टादश हैमानि अष्टादश रत्नानि अष्टादश राजतानि अष्टादश शैलमयानि एवं द्वासप्ततिः। तत्रैकस्मिन् रत्नमये बिम्बे रत्नः स्वनामसाम्यादिव तुष्टो विलग्नः। इदमर्पय मे स्वामिनि!। येन तत्र स्थाने रोपयामीत्यम्बामूचे। अम्बाऽप्याह स्म– "वत्सक! तीर्थमिदं महत्। आगमिष्यति शनैः शनैः कलिः। तत्र लोको हीनसत्त्वोऽर्थलुब्धः पापकारी सर्वधर्मबाह्यो भावी। तदग्रतो रत्नं बिम्बं न छुटिष्यति। महत्याशातना भाविनी। तस्मादिदं आश्मनं

For Private And Personal

गृहाण।" रत्नेन तथेत्यूरीकृतम्। उदितं च–"मातः! कथमिदं महन्मयाऽऽनेयम्।" देव्योक्तम्–"आमसूत्रतन्तुभिरेभिर्वेष्ट्य। इतश्चलमाने यत्र तु पश्चाद्विलोकयिष्यसि तत्रैव स्थास्यति।" इत्यम्बिकागिरा चलितो रत्नो बिम्बं गृहीत्वा। यावत्कियतीमपि भुवं पुरो याति तावद् विस्मितः पश्चादालुलोके। अम्बा आगच्छति नवेति। तत्रैव तस्थौ बिम्बमुदम्बरोपरि। न चलति स्थानान्मनुष्यलक्षैरपि। ततः परावृत्त्य द्वारस्य प्रासादस्य रचना कृता। साऽद्यापि तथैव तत्रास्ते। एवं प्रतिज्ञां सम्पूर्य रत्नः ससङ्घो रैवताद् व्याघुट्य शत्रुञ्जये ऋषभं प्रणम्य अन्यान्यपि तीर्थानि वन्दित्वा नवहुल्लपत्तनं प्रविष्टः। राजा स्वयमभ्यागतः। गृहे गृहे मङ्गलानि साधर्मिकवात्सल्यानि च प्रवृत्तानि। आचन्द्रार्कस्थायियशो ललौ। रत्नस्थापितं नेमिबिम्बमिदं यद्वन्द्यमानमास्तेऽधुना। तस्य तु स्तुतिरेवं प्राक् कविकृता।

न खानिमध्यादुदखानि सूत्रैर्नासूत्रि टङ्कैरुदटङ्कि नैव
अद्योति न द्योतनकैर्नबाहैरबाहि योऽमन्त्रि न सिद्धमन्त्रैः।
अनादिरव्यक्ततनूरभेद्यः प्रभामयोऽनन्तबलः सुसिद्धः
तरीस्तरीतुं भविनां भवाब्धिं स नेमिनाथः कृपयाऽऽविरासीत्॥१॥

॥ इति रत्नश्रावकप्रबन्धः॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

॥ अथ आभड प्रबन्धः—

अणहिल्लपुरे श्रीमालवंश्यः श्रेष्ठी नृपनागः। तत्पत्नी सुन्दरी। तज्ज: श्रीआभडः। तस्मिन् दशवर्ष-देश्ये मातापितरौ द्यां गतौ। श्रीर्नष्टा। तथाऽप्याभडः सुजनाश्रितो व्यवसायज्ञ इति ववृधे। पूर्वजकीर्त्या कन्या लब्धा। परिणीतः। वृत्त्यर्थं मणिकारकारकाणां गृहे घुघुरान् घर्षयति। लोष्टिकान् पञ्चोपार्जयति। तेषां मध्ये लोष्टिकमेकं धर्मे व्ययति। द्वौ कुटुम्बवृत्तिकार्ये। द्वौ सञ्चयं विधत्ते। चतुर्दशेऽब्दे पुत्रो जातः। तस्याः स्तन्यप्राप्तिरल्पा। अतः छागीगवेषणाय आभडो बहिर्ग्रामं गतः। तत्र आवाहे प्रातर्दन्तपावनं कुरुते। अत्रान्तरे आगतं अजायूथम्। ताः आवाहे सर्वाः पयः पातुं लग्नाः। पयः कम्बुधवलमपि सहसा नागवल्ली-दलच्छायं जातम्। विस्मित आभडः। छागीषु पयः पीत्वा निवृत्तासु यावद् गवेषयति तावदेकस्याः कण्ठे टोकरकं तन्मरकतरत्नगर्भं ज्ञात्वा तेन सहसा क्रीता। बालोऽजीवत् रत्नं तु शिराणे उद्योतितं महातेजः-पुञ्जमयम्। परीक्षकानां दर्शितम्। तैरमूल्यं भणितम्। तदनु जेसिङ्गदेवनृपाय अर्पितम्। तुष्टेन राज्ञा एका स्वर्णकोटी दापिता। नखपृष्ठमात्रं हि तल्लक्षं लभते। आभडोऽपि तेन महर्द्धिर्जातः। सुभिक्षं च तदा। जयसिंह-राज्यं तदा ऋद्धम्। आभडस्य वहिकास्तिस्रः। एका रोक्यवही, अपरा विलम्बवही, तृतीया पारलौकिकवही।

For Private And Personal

एतावता को भावः धरणबन्धनयातनाः कस्यापि न करोति कृपाम्बोधिः। ३६ वेलातटेषु धनर्द्धिः महालाभाः। पूगहट्टिका १ निजसदनं २ श्रीहेमसूरिपौषधशाला ३ माषपिष्टकइष्टकाचिताऽकारि। अमारिकारकश्रीकुमारपालदेवसमये महाव्यापस्तस्य। एकदा श्रीहेमसूरिभिः साधर्मिकवात्सल्यं महाफलमिति राज्ञे व्याख्यातम्। राज्ञा आभड उक्तः–"त्रुटितधनं श्रावककुलं दीनारसहस्रं दत्त्वोद्धार्यम्। वर्षान्ते लेख्यकं वयमवधाराप्याः।" आभडेन वर्षान्ते राज्ञे लेख्यकं दर्शितम्। एका कोटिरायाता। राजा यावद्दापयति। तावदाभडेन विज्ञसम्–"देव! भूभुजां कोशो द्विधा स्थावरो जङ्गमश्च। तत्र स्थावरो हेमादिभाण्डागारः। जङ्गमो वणिग्जनः। वणिग्धनमपि स्वामिधनमेवेति।" राजोवाच–"एवं मावादीः। लोभपिशाचो मां छलयति। तावन्मात्रं तत्कालमेवानाय्य दापितम्। राजा तुष्टः। एवं व्रजति काले राजा कुमारपालदेवः श्रीहेमश्च वृद्धौ जातौ। श्रीहेमसूरिगच्छे विरोधः। रामचन्द्रगुणचन्द्रादिवृन्दमेकतः। एकतो बालचन्द्रः। तस्य च बालचन्द्रस्य राजभ्रातृजेन अजयपालेन सह मैत्री। एकदा प्रस्तावे राज्ञो गुरूणामाभडस्य च रात्रौ मन्त्रारम्भः। राजा पृच्छति–"भगवन्नहमपुत्रः। कं स्वपदे रोपयामि। गुरवो ब्रुवन्ति–"प्रतापमल्लदौहित्रं राजानं कुरु धर्मस्थैर्याय अजयपालात्तु त्वत्स्थापितधर्मक्षयो भावि। अत्रान्तरे आभडः प्राह–"भगवन्! यादृशस्तादृशः आत्मीयो भव्यः। पुनः श्रीहेमः अजयपालं राजानं मा कृथाः सर्वथैव। एवं मन्त्रं कृत्वोत्थितास्त्रयः। स

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मन्त्रो बालचन्द्रेण श्रुतः। अजयपालाय च कथितः। अतो हैमगच्छीयरामचन्द्रादिषु द्वेषः। आम्भडे तु प्रीतिः। श्रीहेमसूरेः स्वर्गगमनं जातम्। ततो दिनद्वात्रिंशता राजा कुमारपालो अजयपालदत्तविषेण परलोकमगमत्। अजयपालो राज्ये निषण्णः। श्रीहेमद्वेषाद् रामचन्द्रादिशिष्याणां तप्तलोहविष्टरासनयातनया मारणं कृतम्। राजविहाराणां बहूनां पातनम्। लघुक्षुल्लकानाहूय प्रातः प्रातर्मृगयां कर्त्तुं अभ्यासयति। पूर्वमेते चैत्यपरिपाटीमकार्षुरित्युपहासात्। बालचन्द्रोऽपि स्वगोत्रहत्याकारापक इति ब्रुवद्भिर्ब्राह्मणैर्नृपमनस उत्तारितः। लज्जितो मालवान् गत्वा मृतः। पापं पच्यते हि सद्यः। प्रासादपातनं दृष्ट्वा श्रावकलोकः खिद्यते। आम्भडः पूर्वप्रतिपन्नत्वान्मान्योऽपि वक्तुं न शक्नोति, उग्रत्वाद्राज्ञः। परं तेन प्रपञ्चेन तु रक्षा कारापिता तदा हा कथं? एकदा आम्भडेन नृपवल्लभः कौतुकी सीलणो नाम भूरिहेमदानेन प्रार्थितः–"तथा कुरु, यथा शेषप्रासादा उद्धरन्ति।" तेनोक्तम्–"निश्चिन्तैः स्थेयम्, रक्षिष्याम्येव।" सीलणेन साठकसौधमेकं कृतम्। धवलितं चित्रितं च। पुत्राः पञ्च कर्णे एवमेवमुपराजं कर्त्तव्यं इति शिक्षिताः। गतो नृपान्तिकं सीलणो वदति–"देव! जरा मे शिरसि स्थिता। पुत्रपौत्रवान् जातः। अधुना तीर्थयात्रायै विदेशान् यामि यथादेशः स्यात्।" राज्ञोक्तम्–"यथारुचि तथा चेष्टस्व।" तदनु तत्सौधं पुत्रांश्चादाय महासभास्थे नृपे आगात्। पुत्रा भलापिताः क्षितिपतये। पुत्राश्च भाषिता राज्ञि पश्यति सति–" एतन्मे सौधं यत्नतो रक्ष्यम्। मम यशःशरीरमेतत्। बहु यशोलिप्सा-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दिति।" तैस्तथेति प्रतिपेदे। नृपादि सर्वं आपृच्छ्य पुरस्तात् कियतीमपि भुवं यावत् सीलणो याति किल तावत्तैस्तत् सौधं लकुटैरास्फाल्य सद्यो भग्नम्। खटत्कारं श्रुत्वा सीलणो व्याघुटितो वदति-" रे हताशा अस्मादपि कुनृपात्कुपुत्रा यूयम्। अनेनात्मीये पितरि मृते सति तद्धर्मस्थानानि पातितानि। भवद्भिः पुनः अहं पदशतकमपि गच्छन् न प्रतीक्षितः।" राजा ललज्जे। चैत्यानामपातनमादिशति स्म। तस्य कुत्सितस्य राज्ञो मातापुत्रयोर्बलाद्विप्लवं कारयितुं रुचिरुत्पन्ना। वंठांस्तथाकारयति। एकदा एकेन वंठेन च्छन्नघृतहस्वकं-कलोहकर्तृकया जघ्ने। दिनकतिपयानि कीर्त्तिपालनामा राजपुत्रो गुर्ज्जरधरायां लोकरक्षामकरोत् छत्रचामरादि न तस्य। तस्मिन् मालवसैन्ये मृते गुर्ज्जरधरायां भीमदेवो राजा आसीत्। स दीर्घजीवी परं विकलः पुण्याधिकः। तस्य सोढू मोढू द्वे गडुरिके। ते द्वे स्नपयति। सर्वांगावयवविभूषिते कारयति। सुखासने उपवेशयति। ग्रामेषु ससैन्यो भ्रमयति। ग्रामाः सैन्यकैर्भक्ष्यन्ते। एवं बहुकालो गतः। एकदा देशपालैः संभूय राजा विज्ञप्तः—" देव! निरर्थकं किमिति स्वदेशं भक्षापयसि। अन्नघृतवसनादिव्ययो वृथाऽयम्।" तदा राजा आह-" कथामेकां शृणुत। कचिद्वेलाकूले पूर्वं जलवेगाऽऽहतो एको मीनस्तटे लग्नः। तत्र दुर्भिक्षं घोरम्। अन्नाभावे क्षुधार्त्तो लोकः। अतः सर्वोऽपि जनो कुठाराद्यैश्छेदं छेदं तं मीनं भक्षयितुं गृह्णाति। तथापि स न म्रियते, महाकायत्वात्। अत्रावसरे क्षुधितः पत्नीप्रेरितः कोऽपि

For Private And Personal

विप्रस्तन्मीनमांसं ग्रहीतुमगमत् । अपरलोकैः छिद्यमानं पश्यतस्तस्य स्वभावदयालोर्विप्रस्य दया आसीत् । तेन न छिनत्ति । तदा व्यन्तरानुप्रवेशात् स मत्स्यो विप्रमाह–“ भो च्छिन्द्धि माम् । अन्येऽपि खादन्तः सन्ति । तवोपकृतो भव्यः । ” विप्रः प्रोचे–“ दया मे, न छिनद्मि । ” मीनो वदति–“ तर्हि शृणु अयं पापी लोको मां म्रियमाणं मारयति । अहं तु मृत्वाऽत्र तटे राजा भविष्यामि पुरन्दरो नाम । राजकुलेऽवतरिष्यामि । त्वं ममोपाध्यायो भविष्यसि । अहं प्राग् वैरादमुं लोकं नवनवभङ्गिभिः कदर्थयिष्यामि । त्वया कस्याप्यर्थे विज्ञप्तिर्नैव करणीया । त्वां तु सत्पुरुषं अहं गुरुबुद्ध्या पूजयिष्यामि । ” इति जल्पन् मृतः स मीनः यथोक्तो राजा पुरन्दरो नाम समभूत् । विप्रस्तु गुरुः । तं लोकं कृतपरमागसं स राजाऽपीपिडत् । विप्रस्तु तदुक्तं स्मरन् न ऊचे किञ्चित् । तस्माद् भो ग्रामण्योऽहमपि तद्विधः कोऽप्यवतीर्णोऽस्मि । क्रीडया पीडयामि लोकम् । तस्माद् भवद्भिर्न वाच्यम् । वक्ष्यथ चेद् तदा रसनां छेत्स्यामि । एवं श्रुत्वा स्थितस्तूष्णीं लोकः । देशोऽपर्चायते । एवं राज्ये आभडस्तथैव ऋद्धिमान् । आभडस्य च चाम्पलदे नाम्नी बालविधवा वाग्मिनी उचितज्ञा सर्वशास्त्रविदुरा तनया गृहव्यापारान् करोति । एकदा लोभात्किञ्चिचोरयन् भाण्डागारिको रुष्टेनाभडेन निष्काशितः । स कोपादुपभीमभूपं गतः । ऊचे च–“ राजन्! आभडस्य अनन्ता ऋद्धिः । एवमेवं तां गृहाण । ” राजाह–“ कोऽप्यस्याप्यन्यायोऽस्ति । भाण्डागारिक उचे–‘ नास्ति ’ तर्हि परधनं ॥ १०६ ॥

कथं वृथा गृह्यते ?।" भाण्डागारिकः प्राह-" छलं किमपि क्रियते।" राजाह-" तथाऽहं करिष्यामि।" इति विचार्य भाण्डागारिकं स्वसौधे एव स्थापयित्वा छगीमांसं दासीशिरसि स्थालस्थं कृत्वा प्राहैषीत्। आगता सा दासी मध्याह्ने आभडसदनद्वारम्। तदा आभडो ध्यानेन जिनमर्चयति। चाम्पलदेव्या स्वयं द्वारमुद्घाटि। दासी मध्यमागता। स्थालं दर्शितम्। चाम्पलदेव्या मांसं दृष्ट्वा तदैव भाण्डागारिकविक्रिया इयमिति ऊहांचक्रे। मध्ये आनीता सगौरवम्। सा पृष्टा किमेतत्?। दास्याह-" राज्ञा महिणिमोत्सवे गौरवाय वः प्रस्थापितमदः।" एतन्मांसं चाम्पलदेव्या स्थालान्तरे लातम्। सपादलक्षमूलहारो राज्ञेऽर्पितः। दास्यै कण्ठाभरणम्। स्थालं मौक्तिकैर्वर्द्धापितम्। दासी हृष्टा उपराजं वव्राज। भोजनादनु आभडःपुत्र्या जगाद-"तात! निष्कासितभाण्डागारिकप्रेरितनृपकर्त्तव्यमेतत्। मया दास्ये रीढा न कृता। यास्यति श्रीः। परं उपायं कुरु। सर्वं स्वधनं टिप्पयित्वा राज्ञे दर्शय कथय च। गृहाण स्वामिन् यदि ते रुचिरस्ति।" तथैव चक्रे सः। नृपो विस्मितो लज्जितो हृष्टश्च। भाण्डागारिकं तटे धृत्वा राजोचे-" रे मूढ! यस्मै विधिर्द्रव्यं दत्ते, तस्मै तद्रक्षोपायबुद्धिमपि दत्ते। ततो माऽत्र वृथा मत्सरा स्याः।" पुनरंवाभडपादयोर्लगितः सः। तृणमपि तत्सत्कं राज्ञा न गृहीतमेव। एवं धनी अखण्डभाग्यः चिरायुः नीरुक् आभडः मरणावसरे पुत्रोपकाराय स्वसदने चतुष्कोण्यां निधिचतुष्कं न्यास्थत्। मृतः स्वयं समाधिना। चाम्पलदेव्यपि द्यां गता।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

पुत्रैर्बाह्ये धने गते सति ते निधयः सम्भालिताः । परं न लभ्यन्ते । अञ्जनं च दापितम् । अञ्जनी भणति- " कोऽपि ह्यामाङ्गा मुद्गरपाणयोऽधोऽधो धनं नयन्ति । किं मुधा क्लिश्यध्वे । " जाता निराशाः सामान्य-वणिजोऽभवत् । तस्मात्पुरुषाणां पुण्योदय एव धनवृद्धिनिबन्धनं न कुलम् ।

॥ इत्याभडप्रबन्धः ॥

(२४)

॥ अथ श्रीवस्तुपालप्रबन्धः—

श्रीवस्तुपालतेजपालौ मन्त्रीश्वरौ उभौ आस्ताम् । यौ भ्रातरौ प्रसिद्धौ, कीर्तनसंख्यान्तयोर्भ्रमः । पूर्वं गुर्ज्जरधरित्रीमण्डनायां मण्डलीमहानगर्यां श्रीवस्तुपालतेजपालाद्याः वसन्ति स्म । एकदा श्रीमत्पत्तनवास्तव्यप्राग्वाटऽन्वयठक्कुरश्रीचण्डपस्तदात्मजठक्कुरश्रीचन्द्रप्रसादस्तदङ्गजमन्त्रिश्रीसोमस्तत्कुलावतंसमंत्रिश्री-अ स्वराजः तन्नन्दनौ कुमरादेवीकुक्षिसरोवरराजहंसौ श्रीवस्तुपालतेजःपालौ श्रीशत्रुञ्जयगिरिनारादितीर्थयात्रायै प्रस्थितौ । हडालकग्रामं गत्वा यावत्स्वां भूतिं चिन्तयन्तस्तावल्लक्षत्रयं जातं सर्वं स्वम् । ततः सुराष्ट्रा-त्स्वं सौस्थ्यमाकलय्य लक्षमेकमवन्यां निधातुं निशीथे महाऽश्वत्थतलं खानयामासतुः । तयोः खानयतोः

For Private And Personal

कस्यापि प्राक्तनः कनकपूर्णः शौल्वः कलशो निरगात्। तमादाय श्रीवस्तुपालः तेजपालजायां अनुपदेवीं मान्यतया अपृच्छत्–" क्व एतन्निधीयते ?। तयोक्तम्–" गिरिशिखरे एतदुच्चैः स्थाप्यते। यथा प्रस्तुतनिधिवन्नान्यसाद् भवति।" तत् श्रुत्वा श्रीवस्तुपालः तद्द्रव्यं श्रीशत्रुञ्जयोज्जयन्तादौ अव्ययत्। कृतयात्रो व्यावृत्तो धवलक्कपुरमगात्। अत्रान्तरे महणलदेवी नामा कन्यकुब्जेश्वरसुता जनकात् प्रसन्नात् गुर्ज्जरधरां कञ्चुलिकापदे लब्धां सुचिरं भुक्त्वा कालेन मृत्वा तस्यैव गुर्ज्जरदेशस्य अधिष्ठात्री महर्द्धिर्व्यन्तरी जाता। सा धवलक्के शय्यायां सुखविश्रान्तं राणकश्रीवीरधवलं प्रत्यक्षीभूय जगाद–" राणक ! इयं गुर्ज्जरधरा वनराजप्रभृतिभिर्नरेन्द्रैः सप्तभिश्चापोत्कटवश्यैः षण्णवत्यधिकं शतं वर्षाणां भुक्ता, तदनु मूलराज–चामुण्डराज–वल्लभराज–दुर्लभराज–भीम–कर्ण–जयसिंहदेव–कुमारपाल–अजयपाल–लघुभीम–अर्णोराज–एवं चौलुक्यैः सनाथीकृताः। सम्प्रति युवां पितापुत्रौ लवणप्रसादवीरधवलौ स्तः। इयं गुर्ज्जरधरा कालवशादन्यायपरैः पापैः स्वाम्यभावान्मात्स्यन्यायेन कदर्थ्यमानास्ते म्लेच्छैरिव गौः। यदि युवां वस्तुपालतेजःपालौ मन्त्रिणौ कुर्वीथे। तदा राज्यप्रतापधर्मवृद्धिर्भवति। अहं महणदेवी सर्वव्यापिभिर्भवत्पुण्यैराकृष्टा वदन्त्यस्मि।" इति वदन्त्येव दिशुदिव सहसाऽदृश्या बभूव। राणकश्रीवीरधवलः पद्मासनस्थस्तल्पोपविष्टश्चिन्तयति–"अहो देव्युपदेशः साक्षात्कर्त्तव्यमेव। तन्मन्त्रिद्वयं यद्देव्योक्तम् यतः—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दृप्यद्भुजाः क्षितिभुजः श्रियमर्जयन्ति नीत्या समुन्नयति मन्त्रिजनः पुनस्ताम् ।
रत्नावलीं जलधयो जनयन्ति किन्तु संस्कारमत्र मणिकारगणः करोति ॥ १ ॥"

इत्यादि चिन्तयन् प्रातरुत्थितः । पूर्वोक्तमेवोपदेशं महणदेवी श्रीलवणप्रसादायाप्यदत्त । कृतप्रातःकृत्यौ मिलितौ पितापुत्रावेकत्र । कथितं रात्रिवृत्तमन्योन्यम् । तुष्टौ द्वावपि । तदैव च तेषां कुलगुरुः पुरुषसरस्वती सोमेश्वरदेवो द्विजः स्वस्त्ययनयोगात् । ज्ञापितोऽसौ तद्वृत्तान्तं ताभ्याम् । सोऽप्युवाच—" देवौ युवयोः प्राचीनपुण्यप्रेरिता देवता अपि साक्षात् । तस्मात्तदुक्तमाचरताम् । मन्त्रिबलं विना न किञ्चिद्राज्यपरिकर्मणां । मन्त्रिणौ च यौ भवतोरग्रे प्रतिपादितौ देव्या । तावत्रागतौ स्तः । मम मिलितौ राजसेवार्थिनौ द्वासप्ततिकलाविदुरौ न्यायनिष्ठौ जैनधर्मज्ञौ स्तः । यथादेशः स्यात् तदाऽऽनीयेते ।" राणकादेशात्पुरोहितेन हि तेन सद्य आनीतौ नमस्कारितौ । आसनादिप्रतिपत्त्या गौरवितौ । उक्तौ च श्रीलवणप्रसादादेशाद्वीरधवलेन स्वयम्—

आकृतिर्गुणसमृद्धिशंसिनी नम्रता कुलविशुद्धिसूचिका ।
वाक्क्रमः कथति शास्त्रसङ्गमः संयमश्च युवयोर्वयोऽधिकः ॥ १ ॥

For Private And Personal

श्लाघ्यतां कुलमुपैति पैतृकं, स्यान्मनोरथतरुः फलेग्रहिः ।
उन्नमन्ति यशसा सह श्रियः स्वामिनां च पुरुषैर्भवादृशैः ॥ २ ॥
यौवनेऽपि मदनान्न विक्रिया, नो धनेऽपि विनयव्यतिक्रमः ।
दुर्जनेऽपि न मनागनार्जवं, केन वामिति नवाकृतिः कृता ॥ ३ ॥
आवयोश्च पितृपुत्रयोर्महानाहितः क्षितिभरः परद्रुहा ।
तद् युवां सचिवपुङ्गवावहं यौक्तुमत्र युगपत्समुत्सहे ॥ ४ ॥
येन केन न च धर्मकर्मणा भूतलेऽत्र सुलभा विभूतयः ।
दुर्लभानि सुकृतानि तानि यैर्लभ्यते पुरुषरत्नमुत्तमम् ॥ ५ ॥

अथ वस्तुपालः प्राह—

देव ! सेवकजनः स गण्यते पुण्यवत्सु गुणवत्सु चाग्रणीः ।
यः प्रसन्नवदनाम्बुजन्मना स्वामिना मधुरमेवमुच्यते ॥ ६ ॥
नास्ति तीर्थमिह पार्थिवात्परं यन्मुखाम्बुजविलोकनादपि ।
नश्यति द्रुतमपायपातकं सम्पदेति च समीहिता सताम् ॥ ७ ॥

For Private And Personal

सप्रसादवदनस्य भूपतेर्यत्र यत्र विलसन्ति दृष्टयः ।
तत्र तत्र शुचिता कुलीनता दक्षता सुभगता च गच्छति ॥ ८ ॥
किन्तु विज्ञपयितास्मि किञ्चन स्वामिना तदवधार्यतां हृदि ।
न्यायनिष्ठुरतरा गिरः सतां श्रोतुमप्यधिकृतिस्तवैव यत् ॥ ९ ॥
सा गता शुभमयी युगत्रयी देव । सम्प्रति युगं कलिः पुनः ।
सेवकेषु न कृतं कृतज्ञता, नापि भूपतिषु यत्र दृश्यते ॥ १० ॥
दृष्टिर्नेष्टा भूपतीनां तमोभिस्ते लोभान्धान् साम्प्रतं कुर्वतेऽग्रे ।
तैर्नीयन्ते वर्त्मना तेन यत्र भ्रश्यन्त्याशु व्याकुलास्तेऽपि तेऽपि ॥ ११ ॥
न सर्वथा कश्चन लोभवर्जितः करोति सेवामनुवासरं विभोः ।
तथापि कार्यः स तथा मनीषिभिः परत्र बाधा न यथाऽत्र वाच्यता ॥ १२ ॥

किञ्च—सम्प्रति आवां मण्डलीनगरात् सेवार्थिनौ वः समीपमागतौ स्तः सकुटुम्बौ । लक्षत्रयी द्रव्यस्य नौ गृहेऽस्ति । यदा देवौ पिशुनवचने लगतः । तदा एतन्मात्रस्वापतेयसहितौ दिव्यं कारयित्वा आवां मोक्तव्याविति । अत्र काहलिकं मर्यादीकृत्य परिग्रहस्य धीरादेवयोश्च भवतु । इति राणकाभ्यां धीरां दत्त्वा दाप-

For Private And Personal

यित्वा प्रधानमुद्रानिवेशस्तेजःपालस्य करे कृतः। स्तम्भतीर्थधवलक्कयोस्त्वाधिपत्यं वस्तुपालस्य निवेशितम्। एवं श्रीकरणमुद्रायां लब्धायां अन्यैव तयोः स्फूर्त्तिरुदलासीत्, देवता सान्निध्यात् सहजबुद्धिबलोदयाच्च। स्वगृहमायातो वस्तुपालः श्रीजिनराजं पूजयामास। अथ तत्त्वं क्षणमचिन्तयत्—

उच्चैर्गर्वं समारोप्य नरं श्रीराशु नश्यति। दैन्यदत्ताऽवलम्बोऽथ स तस्मादवरोहति ॥ १ ॥
अन्धा एव धनान्धाः स्युरिति सत्यं तथाहि ते। अन्योक्तेनाध्वना गच्छन्त्यन्ये हस्तावलम्बिनः ॥ २ ॥
धनी धनाऽत्यये जाते दूरं दुःखेन दूयते। दीपहस्तः प्रदीपेऽस्ते तमसा बाध्यतेऽधिकम् ॥ ३ ॥
छत्रच्छायाच्छलेनामी धात्रा चक्रे निवेशिताः। भ्रमन्तोऽपि स्वमात्मानं मन्यन्ते स्थिरमीश्वराः ॥ ४ ॥
कालेन सौनिकेनेव नीयमानो जनः पशुः। क्षिपत्येष धिगासन्ने मुखं विषयशाड्वले ॥ ५ ॥
कायः कर्मकरोऽयं तन्नात्र कार्याऽतिलालना। भृतिमात्रोचितो ह्येष प्रपुष्टो विचिकीर्षति ॥ ६ ॥
प्रयोजकान्यकार्येषु नश्यन्त्याशु महापदि। दुर्मित्राणीव खान्येषु बन्धुबुद्धिरधीमताम् ॥ ७ ॥
विषयामिषमुत्सृज्य दण्डमादाय ये स्थिताः संसारसारमेयोऽसौ बिभ्यत्तेभ्यः पलायते ॥ ८ ॥
दुःखाग्निर्वा स्मराग्निर्वा क्रोधाग्निर्वा हृदि ज्वलन्। न हन्त शान्तिमायाति देहिनामविवेकिनाम् ॥९॥
विधौ विध्यति सक्रोधे धर्म धर्मः शरीरिणाम्। स एव केवलं तस्मादस्माकं जायतां गतिः ॥ १० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

इत्यादि ध्यात्वा वस्त्राणि परावृत्त्य श्रीवस्तुपालः सपरिजनो बुभुजे । गृहीतताम्बूलो राजकुलमगमत् । एवं दिनसप्तके गते प्रथमं तद्राज्यजीर्णाधिकारी एको एकविंशतिलक्षाणि बृहद्द्रम्माणां दण्डितः । पूर्वमविनीतोऽभूत् । तदनु विनयं ग्राहितः । तैर्द्रव्यैः कियदपि हयपत्तिलक्षणं सारं सैन्यं कृतं तेजःपालेन । पश्चात्सैन्यबलेन धवलक्कप्रतिबद्धग्रामपञ्चशतीग्रामण्यश्चिरसञ्चितं धनं हक्कयैव दण्डिताः । जीर्णव्यापारिणो निश्चयोतिताः । एवं मिलितं प्रभूतं स्वम् । ततः सबलसैन्यसंग्रहपटुतेजसं श्रीवीरधवलं सहैवादाय सर्वत्र देशमध्येऽभ्रमन् मंत्री । अदण्डयत् सर्वम् । ततोऽद्भुतरिद्धिर्वीरधवलः । तेजःपालेन जगदे—"देव! सुराष्ट्रराष्ट्रेऽत्यन्तधनिनः ठक्कुरास्ते दण्ड्यन्ते ।" ततोऽचलदयम् । 'लब्धास्वादः पुमान् यत्र तत्रासक्तिं न मुञ्चति ।'

अथ वर्धमानपुरगोहिलवाट्यादिप्रभून् दण्डयन्तौ प्रभुमन्त्रिणौ वामनस्थलीं आगाताम् । तटे चतुरकान् दत्वा स्थितो वीरधवलः । वामनस्थल्यां तदानीं यौ प्रभू सहोदरौ तौ साङ्गणचामुण्डराजनामानौ उद्दामस्थामानौ राणश्रीवीरधवलस्य शालकौ । इति सौजन्यमर्यादां पालयंस्तद्भगिनीं निजजायां नाम्ना जयतलदेवीं बहुपरिजनपरिवृतां मध्ये प्राहैषीत् । सा गत्वा सहोदरौ अभाषिष्ट—"भ्रातरौ भवतां भगिनीपतिः अदण्डदण्डनः अभङ्गभञ्जनः गुर्ज्जरधरायां प्रतिग्रामं प्रतिपुरं दण्डयन् भवतोर्दण्डनायात्रागतोऽस्ति । दीयतां धनाश्वादिसारम् ।" एतद् भगिनीवचः श्रुत्वा मदोद्ध्मातौ तौ प्रोचतुः—"मन्ये स्वसस्त्वं ततः समायाता

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सन्ध्यर्थम् । यतो माऽस्मद् बान्धवयोः समरारूढयोरहं निर्धवाऽभूवम् । एतां मा स्म चिन्तां कृथाः । अमुं त्वत्पतिं हत्वापि ते चारुगृहान्तरं करिष्यावः । न च निषिद्धोऽसौ विधिः राजपुत्रकुले दृश्यमानत्वात् । " ततो जयतलदेव्याह–" समानोदर्यौ नाहं पतिवधभीता वः समीपमागाम्, किन्तु निष्पितृगृहत्वभीता । सहि नास्ति वो मध्ये यस्तं जगदेकवीरं ऊपरवटाख्यहयारूढं नाराचान् क्षिपन्तं कुन्तं वेल्लयन्तं खड्गं खेलयन्तं वा द्रष्टुमीशिष्यते । कालः साक्षाद्‌रीणां सः । अदृष्टपरशक्तिः सर्वोऽपि भवति बलवान् ।" इत्येवं वदन्त्येव ततो निर्गत्य सा सती पतिसविधं गत्वा तां वार्त्तामुचैरकथयत् । तन्निशम्य वीरधवलः क्रोधकरालाक्षो भ्रकुटीभङ्गभीषणभालानुकृतभीमः सन् सङ्ग्राममण्डयत् । तौ द्वावपि वीराधिवीरौ ससैन्यौ आगतौ । सङ्घटितो रणः । पतितानि योधसहस्राणि पक्षद्वयेऽपि । रजसाच्छादितं गगनं । गतः स्वपरविभागः । वीरधवलो हत इति सैन्यद्वये व्याचक्षे । क्षणार्द्धेन वीरधवलो दिव्याश्वाधिरूढः सारसुभटयुक् साङ्गणचामुण्डराजयोर्मेलापके गत्वा प्रस्तुतः । उचे च–" रे सौराष्ट्रौ गृहीतः करे शस्त्रं यद्यस्ति तेजः " इत्युक्त्वा तच्चक्रे यद्देवैर्दिवि शिरो धूनितं कुर्वद्भिर्ददृशे । हतौ साङ्गणचामुण्डराजौ । असिमुखैः शोधितं रणक्षेत्रम् । पालिताः स्वे परे च पालनार्हाः । प्रविष्टो वीरधवलो वामनस्थलीमध्यम् । गृहीतं शालकयोः कोटिसङ्ख्यं पूर्वजशतसञ्चितं कनकम्, चतुर्दश शतानि दिव्यातुरङ्गमाणाम्, पञ्चसहस्राणि तेजस्वितुरङ्गमाणाम्, अन्यदपि मणिमुक्ता-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

फलादि । जितं जितमित्युद्‌घोषः समुच्छलितः । स्थितस्तत्र मासमेकम् । ततो वाजामानगजेन्द्रचूडासमावालाकादिस्वामिनः प्रत्येकं गृहीतधनाः कृताः । द्वीपवंटपत्तनेषु प्रत्येकं बभ्राम । धनमक्रूशं मिलितम् । एवं सौराष्ट्रजयं कृत्वा समन्त्री राणो धवलक्कं प्राविक्षत् । उत्सवा उत्सवोपर्युपस्फुरन् । तत्र प्रस्तावे चारणेन दोधकपादद्वयं पठितम् ।

" जीतउं कहिं जणेहिं, सांभलिसमइरिवाजलइ ।

एतावदेव पुनः पुनोऽपाठीत् नोत्तरार्द्धम् । गतश्चारणः स्वस्थानम् । तत्र राजवंश्याः षण्णां जनानां मध्ये आत्मीयं नाम न्यासयितुं रात्रौ तस्मै प्रत्येकं लक्षामदुः । सोऽपि समग्रहीत् । एवं ग्राहं ग्राहं परिपारिते एकदा प्रातःसभायां बहुजनाकीर्णायां राणकाग्रे उत्तरार्द्धमप्यपाठीत् ।

विहुं सुजिवीरतणेहिं विहुं पगिऊपरवटतणे ॥ १ ॥"

इति श्रुत्वा सर्वेऽपि चमत्कृता राजन्यकाः । अहो प्रपञ्चेनानेनास्मान् वञ्चयित्वा निर्यासे तत्त्वमेवोक्तम् । पुनः सविशेषं ददुः स्वामिभक्ततत्वात् । तदा भद्रेश्वरवेलाकूले भीमसिंहो नाम प्रतीहारस्तिष्ठति । स आत्मबली कस्याप्याज्ञां न मन्यते । धनी च । तस्मै वीरधवलो राजा आदेशमदीदपत्—" सेवको भव । "

For Private And Personal

सोऽपि प्रत्यदीदपत्–" सेवको भव । यद्दीयते तल्लभ्यते, इति न्यायः ।" वीरधवलस्तद्विग्रहाय गुर्ज्जरधरा-राजपुत्रानमेलयत् बहुसैन्यं च । भीमसिंहोऽपि बलेन प्रबलः । उभयपक्षेऽपि बलवत्ता । अत्रान्तरे जावालिपुरे चाहमानकुलतिलकः श्रीउदयसिंहो नाम राजकुलो राज्यं भुनक्ति । तस्य दायादास्त्रयः सहोदराः सामन्त-पाल-अनन्तपाल-त्रिलोकसिंहनामानो दातारा: शूराः तद्दत्तग्रासेन तृप्तिमदधतो धवलक्कमागत्य श्रीवीरधवलं द्वास्थेनाबभाणत्–"देव ! वयं अमुकवंश्यास्त्रयः क्षत्रियाः सेवार्थिनरा आगताः स्मः । यद्यादेशः स्यात् तदा आगच्छामः ।" राणकेनाहूतास्ते । तेजआकृतिश्रमादिभिः शोभनाः । रुचितास्ते तस्य । परं पृष्टाः–" को ग्रासो वः कल्पते ।" ते प्रोचुः–"देव ! प्रतिपुरुषं लूणसापुरीयद्रम्माणां लक्षं लक्षं ग्रासः ।" राणकेनोक्तम्–" इयता धनेन शतानि भटानां सङ्गच्छन्ते । किमधिकं यूयं करिष्यथ ? । न दास्यामीयत् ।" इति कथयित्वा ते वीटकदानपूर्वं विसृष्टाः । तदा मन्त्रिवस्तुपालतेजःपालाभ्यां विज्ञप्तम्–" स्वामिन् ! न एते मुच्यन्ते । पुरुषसङ्ग्रहाद् धनं न बहु मन्तव्यम् ।

वाजिवारणलोहानां काष्टपाषाणवाससाम् । नारीपुरुषतोयानां अन्तरं महदन्तरम् ॥ १ ॥

एवं विज्ञप्तमपि राणकेन नावधारितम् । मुक्ता एव ते गताः प्रति भटतटम् । श्रीभीमसिंहप्रतीहारेण भेटितास्ते । उक्तो वीरधवलकृतः कार्पण्यव्यवहारः । तुष्टो भीमसिंहः । कृतं तद्दिष्टवृत्तिद्वैगुण्यम् । तैश्चो-

क्तस्-" देव! शीघ्रमेव कथापय वीरधवलाय अस्मद्बलेन। यथा-" यदि क्षत्रियोऽसि। तदा शीघ्रं युद्धाया-
गच्छेः। अन्यथा अस्मदीयो भूत्वा जीवेः।" प्रेषितो भीमसिंहेन भट्टः। उक्तः समेत्य वीरधवलस्तत्। एवं
श्रुत्वा वीरधवलःससैन्यश्चलितः। भट्टं पुरः प्राहैषीत्। पञ्चग्रामाग्रे युद्धमावयोः। तत्र क्षेत्रं कारयन्नस्मि।
शीघ्रमागच्छेरित्याद्याख्यापयत्। सोऽपि तत्र ग्रामे समेतः सैन्येन सबलः। सङ्घटितं सैन्यद्वयम्। वर्त्तन्ते
भटानां सिंहनादाः। नृत्यन्ति पात्राणि। दीयन्ते धनानि। पूज्यन्ते शस्त्राणि। बध्यन्ते महावीराणां टोडराणि।
त्रिदिनांते युद्धं प्रतिष्ठितम्। उत्कण्ठिता योद्धाः। बाहुजानामाहवो हि महामहः। सङ्ग्रामदिनादर्वाग् मन्त्रि-
वस्तुपालतेजःपालाभ्यां स्वामी विज्ञप्तः-"देव! त्रयो मारवाः सुभटास्त्वया न संगृहीतास्ते परबले मिलिताः।
तद्बलेन भीमसिंहो निर्भीर्गर्जति। इति अवधार्यम्। चरैरपि निवेदितमेतन्नौ।" राणकेनोक्तम्-यदस्ति तदस्तु।
किं भयम्। जयो वा मृत्युर्वा युधि भुजभृतां कः परिभवः?।" मन्त्रिणा ज्यायसोक्तम्-" स्वामिन्! कार्मु-
ककरे देवे के परे परोलक्षा अपि। यदुक्तम्—

काल: केलिमलङ्करोतु करिणः क्रीडन्तु कान्तासखाः
कासारे बत कासराः सरभसं गर्जन्त्विह स्वेच्छया।

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अभ्यस्यन्तु भयोज्झिताश्च हरिणा भूयोऽपि झम्पागतिं
कान्तारान्तरसञ्चरव्यसनवान् यावन्न कण्ठीरवः ॥ १ ॥

कण्ठीरवे तु दृष्टे कुण्ठाः सर्वे वन्याः । अन्यच्च प्रभो ! अस्मदीयसैन्ये डोडीयावंशीयो जहुलः चौलुक्यः सोमवर्मागुलकुल्यः क्षेत्रवर्माऽस्ति । देवस्तु किं वर्ण्यते कल्यर्जुनः । एवं वार्त्तासु वर्त्तमानासु द्वाःस्थ एत्य व्यजिज्ञपद्राणकम्-" देव ! पुरुष एको द्वारि वोऽस्ति । कस्तस्यादेशः ।" भूसंज्ञया राणकस्तममोचयत् । मध्यममागत्य स उवाच-देव ! सामन्तपालअनन्तपालत्रिलोकसिंहैस्त्यक्तैर्भीमसिंहमाश्रितैः कथापितमस्ति- " देव ! त्रिभिर्लक्षैर्ये भटास्त्वया स्थापिता भवन्ति । तैरात्मानं सम्यग् रक्षेः । प्रातः कुमार्यां आरण्यां त्वामेव प्रथमतममेष्यामः ।" इति श्रुत्वा हृष्टेन राणेन ससत्कारं स प्रैषि । कथापितं च-एते वयमागता एव प्रातर्भवद्भिरपि ढौक्यम् । सर्वेषामपि तत्रैव ज्ञास्यते भुजसौष्ठवम् ।" गतः स तत्र । प्रातर्मिलितं च बलद्वयम् । वादितानि रणतूर्याणि । अंगेषु भटानां वर्माणि न ममुः । दत्तानि दानानि । तैस्तु त्रिभिर्मारवैरात्मीयं वर्षलभ्यं द्रव्यलक्षत्रयं भीमसिंहात्सद्यो लात्वाऽर्थिभ्यो ददे । स्वयमश्वेष्वारूढाः । प्रवर्त्तन्ते प्रहाराः । उत्थितमान्ध्यं शस्त्रैः । पतन्ति शराः कृतान्तदूताभाः । आरूढं प्रहरमात्रमहः । सावधानो वीरधवलः । दत्तावधाना मन्त्र्यादयस्तद्रक्षकाः । अत्रान्तरे आगतास्ते त्रयो मरुवीराः । भाषितः स्वमुखेन तैर्वीरधवलः-"अयं

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

देवः । इमे वयम् । सावधानीभूय रक्षात्मानम् । त्वद्योधा अपि त्वां रक्षन्तु ।" वीरधवलेनाप्युक्तम्–"किमत्र विकत्थध्वे । क्रिययैव दोः स्थाम प्रकाश्यताम् ।" एवमुक्तिप्रत्युक्तौ लग्नं युद्धम् । यत्नपरेषु तटस्थेषु रक्षत्स्वपि तैर्भल्लत्रयं वीरधवलस्य भाले लिङ्गितम् । एवं त्वां हन्मः । परं एकं तव बीटकं तदा भक्षितमस्माभिः । इति वदद्भिस्तैरेव श्रीवीरधवलस्य तटस्थाः प्रहरणैः पातिताः । तेऽपि त्रयो मारवाः व्रणशतजर्ज्जराङ्गाः सञ्जाताः । राणश्रीवीरधवलः ऊपरवटाऽश्वात्पातितः । उपरवटस्तैर्मारवैःस्वोत्तारके बन्धितः प्रच्छन्नः । रजसान्धं जगत् । तदा राणश्रीवीरधवलो भुवि पातितो भट्टैरुत्पाट्य लले । तावता पतिता सन्ध्या । निवृत्तं सैन्यद्वयम् । रात्रौ भीमसिंहीयाः सुभटाः सर्वेऽपि वदन्ति । अस्माभिर्वीरधवलः पातितः पातितः । ततो मारवैरभिहितं युष्माभिः पातित इति ?। किमत्राभिज्ञानम् । तैरुक्तम्–"किं भवद्भिः पातितः ।" मारवैरभिदधे–"अस्माभिः पातितः । ऊपरवटो वदिष्यति ।" उत्तरकादानीय ऊपरवटो दर्शितः । तुष्टो भीमसिंहः । उक्तवांश्च शुद्धराजपुत्रेभ्यो दत्तं धनं शतधा फलति । इदमेव प्रमाणं रिपुहयहरणं क्षत्रियाणां महान् शृङ्गारः । एवं वार्त्ताः कुर्वतां भटानां रात्रिर्गता । प्रातर्वीरधवलो व्रणजर्ज्जरोऽपि पट्टभूयाक्षान् क्रीडितुं प्रवृत्तः । भीमसिंहसैन्यहेरिकैर्गत्वा तज्ज्ञात्वा तत्रोक्तम्–" वीरधवलः कुशली गर्जति । एवं सति यज्जानीथ तत्कुरुथ ।" अथ भीमसिंहाय तन्मन्त्रिभिर्विज्ञप्तम्–" देव ! अयं बद्धमूलो देशेशः । अनेन विरोधो दुरायतिः तस्मात्सन्धिः श्रेष्ठः । भीम-

For Private And Personal

सिंहेन मानितं तद्वचनम् । परं सङ्ग्रामाडम्बरः कृतः । अन्योऽन्यमपि यावद् मिलितौ द्वौ । तावद् भट्टैरन्तरा प्रविश्य मेलः कृतः । ऊपरवटाश्वो राणाय दापितः । भीमसिंहेन भद्रेश्वरमात्रेण धृतिर्धरणीया । बिरुदानि न पाठनीयानि । इति व्यवस्थाऽऽसीत् । एवं कृत्वा श्रीवीरधवलो दानं तन्वन् श्रीधवलक्कमागात् । शनैः शनैः प्राप्तपरमप्राणो भीमसिंहमपराध्यं तं मूलादुच्छेद्य एकवीरां धरित्रीमकरोत् । एवं धवलक्के राज्यं कुर्वतस्तस्य क्षुभितैः प्रभूतैः परराष्ट्रनृपतिभिः स्वं दत्तम् । तेन स्वेन सैन्यमेव मिलितम् । चतुर्दशशतानि महाकुलानि राजवंश्यानां राजपुत्राणां मेलितानि । तानि समभोजनभोगवसनवाहनानि श्रीतेजःपालस्य सहचारीणि छायावत् समजीवितमरणत्वेन स्थितानि । तद्बलेन सैन्यबलेन च स्वभुजाबलेन च सर्वं जीयते ।

इतश्च महीतटाख्यदेशे गोधिरानाम नगरं वर्त्तते । तत्र घूघुलो नाम मण्डलीकः । स गुर्ज्जरधरासमागन्तुकसार्थान् गृह्णाति । राणश्रीवीरधवलस्याज्ञां न मन्यते । तस्मै मन्त्रिभ्यां वस्तुपालतेजःपालाभ्यां भट्टः प्रेषितः । अस्मत्प्रभोराज्ञां मन्यस्व । अन्यथा साङ्गणचामुण्डराजादीनां मध्ये मिल, इति कथापितम् । तच्छ्रवणात् क्रुद्धेन तेन तेनैव भट्टेन सह स्वभट्टः प्रस्थापितः । तेनागत्य राणश्रीवीरधवलाय कज्जलगृहं शाटिका चेति दत्तं द्वयम् । उक्तं च–" ममान्तःपुरं सर्वोऽपि राजलोकः । इति नः प्रभुणा ख्यापितमस्ति । " राणेन स भट्टः सत्कृत्य प्रहितः स्वस्थानम् । राणेन भाषिताः सर्वे निजभटाः । उक्तं च–" घूघुलविग्रहाय बीटकं

को ग्रहीष्यति ।" परं कोऽपि नाद्रियते । तदा तेजःपालेन गृहीतम् । चलितः प्रौढसैन्यपरिच्छदः । गतस्त-द्देशादर्वाग्भागे । कियत्यामपि भुवि स्थित्वा सैन्यं कियदपि स्वल्पमग्रे प्रास्थापयत् । स्वयं महति मेलापके गुप्तस्तस्थौ । अल्पेन सैन्येनाग्रे गत्वा गोध्रगोकुलानि वालितानि । गोपालाः शरैस्ताडिताः । तैरन्तर्गोध्रकं पूत्कृतम्–" गावो ह्रियन्ते कैश्चित् । क्षात्रं धर्म्मं पुरस्कृत्य ततो धावत धावत ।" इति शब्दे श्रुते घूघुलो ऽचिन्तयत्–" नवीनमिदम् । केनास्मत्पद्रमागत्य गावो ह्रियन्ते ।

वृत्तिच्छेदविधौ द्विजातिमरणे स्वामिग्रहे गोग्रहे सम्प्राप्ते शरणे कलत्रहरणे मित्रापदां वारणे ।
आर्त्तत्राणपरायणैकमनसां येषां न शस्त्रग्रहस्तानालोक्य विलोकितुं मृगयते सूर्योऽपि सूर्यान्तरम् ॥१॥

इति वदन्नेव ससैनस्तुरङ्गममारूढो गतोऽनुपदं गोहर्तॄणाम् । गोहर्त्तारोऽपि घूघुलाय दर्शनं ददते शरान् सन्दधते । न च स्थित्वा युद्ध्यन्ते । इत्येवं खेदयद्भिस्तैस्तावन्नीतो घूघुलः यावन्मन्त्रिणो महति वृन्दे प्रविष्टः । ततो ज्ञातमीदृशं छद्मेदं मन्त्रिणः । भवतु तावत् घूघुलोऽस्मि । निजाः सुभटाः समराय प्रेरिताः । स्वयं सवि-शेषमभियोगं दधौ । ततो लग्नः संहर्त्तुम् । मन्त्रिकटकेनापि ढुढौके । चिरं रणरसरभसोऽभूत् । भग्नं घूघुलेन मन्त्रिकटकं कान्दिशीकं दिशोदिशं गच्छति । तदा मन्त्रितेजःपालेन स्थिरं अश्वस्थितेन तटस्थाः ससकुलीनाः शुद्धराजपुत्राः भाषिताः–" अरिस्तावद्बली । आत्मीयं तु भग्नं सकलं बलम् । नष्टानामस्माकं का गतिः ।

किं यशः । यशो विना जीवितव्यमपि नास्त्येव। तस्मात् कुर्मः समुचितम् । ” तैरपि सप्तभिस्तद्वचोऽभिमतम् । व्याघुटिताऽष्टौ घ्नन्ति नाराचादिभिः परसेनाम् । तावन्मात्रं स्ववृन्दं सङ्कुटितं दृष्ट्वा अपरेऽपि सत्त्वं धृत्वा वलिताः । तदा तेजःपालः एकत्र निजांसेऽम्बिकादेवीं अपरत्र कपर्दियक्षं पश्यति । अतो जयं निश्चित्य प्रहरंस्तावद्ययौ यावद् घूघुलः । गत्वा भाषितः–“ हे मण्डलिक ? येनास्मन्नाथाय कज्जलगृहादि प्रहीयते । तद्भुजाबलं दर्शय । ” घुघूलोऽपि प्रत्याह–“ इदं तद्भुजा बलं पश्य ” इत्युक्त्वा निबिडं युयुधे। द्वन्द्वयुद्धं मन्त्रिमण्डलीकयोः सञ्जातम् । अथ मन्त्री सहसा दैवतबलभुजाबलाभ्यां तमश्वादपीपतत् । जीवन्तं बद्ध्वा काष्टपञ्जरेऽचिक्षिपत् । स्वसेनान्तर्निनाय। स्वयं बहुपरिच्छदो गोध्रानगरं प्रविवेश। अश्वसहस्राणि चत्वारि, अष्टादश कोटीर्हेम्नां कोशं, मूटकं शुद्धमुक्ताफलानां, दिव्यास्त्राणि, दिव्यवस्त्राणि, इत्यादि सर्वं जग्राह । घूघुलस्थाने आत्मीयं सेवकं न्यास्थत् । चलितो मन्त्री गतो धवलक्कके। श्रीवीरधवलेन महत्यां सभायामाकार्य श्रीतेजःपालः परिधापितः। प्रसादपदे स्वर्णं भूरि ददे। तदवसरे कवीश्वरसोमेश्वरे च दृक सञ्चारिता श्रीवीरधवलेन । ततः सोमेश्वरदेवः प्राह—

मार्गे कर्दमदुस्तरे जलभृते गर्त्ताशतैराकुले खिन्ने शाकटिके भरेऽतिविषमे दूरं गते रोधसि।
शब्देनैतदहं ब्रवीमि महता कृत्वोच्छ्रितां तर्जनीमीदृक्षे गहने विहाय धवले वोढुं भरं कः क्षमः? ॥१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

विसृष्टा सभा। मिलितौ वस्तुपालतेजःपालावेकत्र। कृताः कथाश्चिरम्। तुष्टौ द्वौ मन्त्रयेते स्म। धर्म्मे एव धनमिदं पुण्यलब्धं व्ययनीयम्। ततः सविशेषं तथैव कुरुतः। ततः कविना केनाप्युक्तम्—

पन्थानमेको न कदापि गच्छेदिति स्मृतिप्रोक्तमिव स्मरन्तौ।
तौ भ्रातरौ संसृतिमोहचौरे संभूय धर्मेऽध्वनि सम्प्रवृत्तौ ॥ १ ॥

अथ श्रीवस्तुपालः शुभे मुहूर्त्ते स्तम्भतीर्थं गतः। तत्र मिलितं चातुर्वर्ण्यम्। दानेन तोषितं सर्वम्। तत्र च सैदनामा नौवित्तिको वसति। स च सर्ववेलाकूलेषु प्रसरमाणविभवो महाधनाढ्यः बद्धमूलः अधिकारिणं नन्तुं नायाति। प्रत्युत तत्पार्श्वेऽधिकारिणा गतव्यम्। एवं बहुकालो गतः। पूर्वं मन्त्रीन्द्रस्तं भट्टेनोवाच— "अस्मान्नंतुं किमिति नागच्छसि?।" स प्रतिवक्ति—"तव नवेयं रीतिः। प्रागपि नागच्छामि। यत्तु स्यान्न्यूनं तव, तदा तत्पूरयामि स्थानस्थः।" तत् श्रुत्वा मन्त्री रुष्टः कथापयामास—"पुरुषो भूत्वा तिष्ठेः। शास्मि त्वां दुर्विनीतम्।।" ततस्तेन बडूआरूयवेलाकूलस्वामी राजपुत्रः पञ्चाशद्वंशमध्यस्थखादिरमुशलस्य एक-खड्गप्रहारेण छेदने प्रभुः प्रभूतसैन्यत्वात्साहणसमुद्र इति ख्यातः शंखाख्य उत्थापितः। तेन भणितं मन्त्रिणे—"मन्त्रिन्मदीयमेकं नौवित्तिकं न सहसे। मदीयं मित्रमसौ ज्ञेयः।" तस्माद्वचनात् क्रुद्धो मन्त्री तं प्रत्यवोचत्—"श्मशानवासी भूतेभ्यो न बिभेति। त्वमेव प्रगुणो भूत्वा युधि तिष्ठेः" इति श्रुत्वा सन्नद्ध-

For Private And Personal

बद्धो भूत्वा सोऽप्यागतः । मन्त्रिणा वस्तुपालेनापि धवलक्ककाद् भूरि सैन्यमानाय्याभ्यषेणयत् । रणक्षेत्रे मिलितौ द्वौ । प्रारब्धं रणम् । शङ्खेन निर्दलितं मन्त्रिसैन्यं पलायिष्ट दिशोदिशि । तदा श्रीवस्तुपालेन स्वस्य राजपुत्रो माहेचकनामा भाषितः–" इदं अस्मन्मूलघट्टं त्वमेव वर्त्तसे । अथ तत्कुरु येन श्रीवीरधवलो न लज्जते ।" ततोऽसौ राजपुत्रः स्वैरेव कतिपयैर्मित्रराजपुत्रैः सह तमभिगम्योवाच–"हे शङ्ख ! नेयं वहूआल्य ! तव ग्रामसीमआखेटकक्रीडा किन्तु क्षत्रियाणां सङ्ग्रामोऽयम् ।" शङ्खोऽप्याह–" सुष्ठु वक्तुं वेत्सि । नायं तव प्रभोः पट्टः, किल परिपन्थिनः प्रदेशः । किन्तु सुभटस्य क्रीडाक्षेत्रमिदम् । इत्येवं वादे जाते द्वन्द्वरणे माहेचकेन मन्त्रिणि पश्यति मन्त्रिप्रतापाच्छङ्खः पातितः । समरे जातो जयजयकारः । मन्त्रिणा तद्राज्यं गृहीतम् । वेलाकूलनृपऋद्धीनां क्व संख्याः । ततः स्तम्भतीर्थमुत्तोरणमुत्पताकमविशत् । ततो मन्त्री प्रविष्टः सैदसदनम् । तस्य भट्टान् सप्तद्विगुणितशतानि सन्नद्धानि हत्वा तं जीवग्राहं जग्राह । विब्रुवाणं तं कृपाणेन जघान । ततो गृहं तदीयमामूलचूलं खानितं पातितं च । हेमेष्टिकानां संख्या न । तथा मणिमुक्ताफलपदकानां प्रमाणं केनापि न ज्ञातम् । केचिद् वृद्धा वदन्ति–" तत्र तेजनतूरिकायाः करण्डश्चटितः श्रीमन्त्रीश्वरस्य । " आयातो मन्त्री स्वधवलगृहम् । तोषितः स्वस्वामी वीरः परिग्रहलोकश्च । ततः कवीश्वराणां स्तुतिः

श्रीवस्तुपाल प्रतिपक्षकाल ! त्वया प्रपेदे पुरुषोत्तमत्वम् ।
नीरेऽपि वार्द्धैरकृतेऽपि मात्स्ये रूपे पराजीयत येन शङ्खम् ॥ १ ॥

तावल्लीला कवलितसरित्तावदभ्रं लिहोर्मिस्तावत्तीव्रध्वनितमुखरस्तावदज्ञातसीमा ।
तावत्प्रेङ्खत्कमठमकरव्यूहबन्धुः ससिन्धुर्लोपामुद्रासहचरक्रोडवर्त्ती न यावत् ॥ १ ॥

ततश्चोक्षवाटिनौवित्तिकवाद्योः पार्थक्यं कृतम् । मन्त्रिणा आ महाराष्ट्रेभ्यः साधिता भूः । वेलाकूलीयनरेन्द्राणां नरेन्द्रान्तराक्रम्यमाणानां मन्त्री प्रतिग्रहप्रेषणेन सान्निध्यं कृत्वा जयश्रियं अर्पयति । इति कारणात्ते तुष्टाः बोहित्थानि सारवस्तुपूर्णानि प्राभृते प्रहिण्वन्ति । अम्बिकाकपर्दिनौ निधानभुवं रात्रौ समागत्य कथयतः । ते निधयो मन्त्रिणा खातं खातं गृह्यन्ते । तद्भाग्यात् दुर्भिक्षस्य नामापि नाभूत् । विड्वराणि दूरे नष्टानि । मुद्गलबलानि वारं वारमागच्छन्ति जघ्निरे एकदा । पुनर्नाययुः । पल्लीवनेषु दुकूलानि नागोदराणि च बद्धानि । ग्रहीता कोऽपि न । ग्रामे ग्रामे मण्डितानि सत्राणि । सत्रे सत्रे मिष्टान्नानि । उपरि ताम्बूलानि च । तत्र ग्लानार्थं वैद्या विविधाः प्रस्थापिताः । मन्त्रिव्यवस्थया दर्शनद्वेषो न । वर्णद्वेषो न । प्रतिवर्षं स्वदेशे सर्वनगरेषु वारातिस्रस्तिस्रः श्वेताम्बरेभ्यः प्रतिलाभना शेषदर्शनानामप्यर्चा । मन्त्रिवस्तुपालस्य पत्न्यौ द्वे ललतादेविसोषूनाम्न्यौ कल्पवल्लिकामधेनू इव । ललितादेव्याः सुतो मन्त्रिजयन्तसिंहः सूहवदेविजानिः प्रत्यक्षचिन्तामणिः। तेजःपालदयिताऽनुपमाऽनुपमैव । पठितं च कविना—

लक्ष्मीश्चला शिवा चण्डी, शची सापत्न्यदूषिता । गङ्गा न्यग्गामिनी वाणी, वाक्साराऽनुपमा ततः ॥१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रीशत्रुञ्जयादिषु नन्दीश्वरेन्द्रमण्डपप्रभृतिकर्मस्थायाः प्रारम्भिषता आरासणादिदलिकानि स्थलपथेन जलपथेन च तत्र तत्र प्राप्यन्ते। एकदा तौ भ्रातरौ द्वावपि मन्त्रिपुरन्दरौ महर्द्धिसङ्घोपेतौ श्रीपार्श्वं नन्तुं स्तम्भनकपुरमीयतुः। प्रथमदिने ससङ्घौ तौ श्रीपार्श्वस्य पुरः श्रावकश्रेणिपुरःसरौ स्थितौ। तदा गीतगान-रासादिमहारसः प्रवर्त्तते। तदवसरे तत्रत्यसङ्घोपरोधात् तत्रत्याध्यक्षाः सूरयो मल्लवादिनः समाकारिताः। ते यावद्देवगृहं प्रविशन्ति। तावत्तैरेव पठितम्—

अस्मिन्नसारे संसारे सारं सारङ्गलोचनाः।

मन्त्रिभ्यां श्रुतं चिन्तितं च–"अहो मठपतिर्गृहवद्देवगृहेऽपि शृङ्गाराङ्गारगर्भं पदद्वयं कथयन्नस्तीति।" देवनमस्कारादिकमुचितमिह तत्किं नाधीते। तस्मादद्रष्टव्योऽसौ। उपविष्टः सूरिः सः। अन्येऽपि सूरयः शतशः पङ्क्तौ निषण्णाः। मङ्गलप्रदीपान्तेऽपरसूरिभिर्मल्लवादिन एवाऽशीर्वादाय प्रेरिताः। मन्त्री पुरस्तिष्ठति। 'अस्मिन्नसारे संसारे सारं' इत्यादि पादद्वयं भणितम्। तैः व्याख्यातं च तदेव। मन्त्री हस्तेन वन्दित्वा विरक्तो गतः स्वोत्तारकम्। एवं दिनाः ८ स एव पद्यार्द्धपाठश्चक्रे नवनवभङ्ग्या व्याख्यातः। अष्टम्यां रात्रौ मन्त्री मुत्कलापनिकां कर्त्तुं देवरङ्गमण्डपे निविष्टः। पुरो धनषद्दरकाणां राशयः। कोऽपि कविराह—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रीवस्तुपाल ! तव भालतले जिनाज्ञा, वाणी मुखे हृदि कृपा करपल्लवे श्रीः ।
देहे द्युतिर्विलसतीति रुषेव कीर्त्तिः, पैतामहं सपदि धाम जगाम नाम ॥ १ ॥

अपरस्तु—

अनिःसरन्तीमपि गेहगर्भात् कीर्त्तिं परेषामसतीं वदन्ति ।
स्वैरं भ्रमन्तीमपि वस्तुपाल ! त्वत्कीर्त्तिमाहुः कवयः सतीं तु ॥ २ ॥

पुनः कश्चिदूचुः—

क्रमेण मन्दीकृतकर्णशक्तिः प्रकाशयन्ती च बलिस्वभावं ।
कैर्नानुभूता सशिरःप्रकम्पं जरेव दत्तिस्तव वस्तुपालः ॥ ३ ॥

तेभ्यः कविभ्यः सहस्रलक्षाणि ददिरे । एवं गायनभट्टादिभ्योऽपि । यावज्जातं प्रातरेव तदा मल्लवादिभिः स्वसेवकाश्चैत्यद्वारद्वयेऽपि नियुक्ताः । एकं द्वारं अन्यं दिशि एकं च मठदिशि । उक्तं चास्ति तेभ्यः—"मन्त्री चैत्यान्निःसरन् ज्ञापनीयः ।" क्षणेन वस्तुपालो मठद्वारान्निर्गच्छति यावत् तावता सेवकज्ञापिताः सूरयः समागत्य सम्मुखा स्थिताः । मन्त्रिणा रीढया प्रभुप्रणाम इव कृतः, आचार्यैरभिहितम्—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

दूरे कर्णरसायनं निकटतस्तृष्णापि नो शाम्यति ।

विजीयताम् । तीर्थानि पूज्यन्तां । मन्त्री कौतुकात्तथैव तस्थौ । किं पर्यवसानेयं प्रस्तावनेत्ति ध्यानात्, ऊचे च-" न विद्मः परमार्थं किमेतदभिदधे।" आचार्यैरुक्तम्-" पुरो गम्यतां गम्यताम् । भवतां कार्याणि भूयांसि । " मन्त्री सविशेषं पृच्छति । सूरयो वदन्ति सचिवेन्द्र श्रूयताम्—

मरुग्रामे क्वचित् ग्रामाराः स्थूलबहुला लोमशापशवो वसन्ति । पर्षदि निषीदन्ति । कपोलझल्लरीं वादयन्ति । तत्रैकदा वेलाकूलीयचरः पान्थ आगमत् । नवीन इति कृत्वा ग्राम्यैराहूतः । पृष्ठः-" त्वं कः ? क्वत्यः ? । " तेनोक्तम्-"हं समुद्रतटेऽवात्सम् ।" पान्थः-पुरो यामि । तैः पृष्टम्-"समुद्रः केन खानितः।" तेनोचे-" स्वयंभूः । " पुनस्तैः पृष्टम्-" कियान् सः । " पान्थेनोक्तम्-" अलब्धपारः ।" किं तत्रास्ति इति पृष्टे पुनस्तेनाचख्ये—

ग्रावाणो मणयो हरिर्जलचरो लक्ष्मीः पयो मानुषी मुक्तौघाः सिकताः प्रवाललतिकाः सेवालमंभः सुधा ।

तीरे कल्पमहीरुहाः किमपरं नाम्नापि रत्नाकरः

For Private And Personal

इति पादत्रयं पठित्वा व्याख्याय पुरो गतः पान्थः। तेषु ग्राम्येष्वेकः सकौतुकः पृच्छं पृच्छं समुद्रतट-मगात्। दृष्टः कल्लोलमालाचुम्बितगगनाग्रः समुद्रः। तुष्टः सः। अचिन्तयच्च-"इतो ऋद्धयः सर्वा लप्स्यन्ते। प्रथमं तृषितः सलिलं पिबामि।" इति मत्वा पीतं तत्। दग्धकोष्ठः। तेन पठति इति—

दूरे कर्णरसायनं निकटस्तृष्णापि न शाम्यति।

वरवियराजिहिं जणु पियइ घट्टु घट्टुजलुएहिं सायरिअत्थिबहुतजलु छइ खारुं किं तेण ॥१॥

तैरेव पदैर्नष्टः स्वास्पदं गतः। तथा वयमपि स्मः। मन्त्रिणोक्तम्-"कथं तथा यूयं यथा स ग्राम्यः। सूरयस्तारमूचुः-"महामात्य! वयमत्र श्रीपार्श्वनाथसेवकाः त्रैविद्यविदः, सर्वर्द्धयः। अत्रस्थाः शृणुमः। यथा-धवलक्कके श्रीवस्तुपालो मन्त्री सरस्वतीकण्ठाभरणो भारतीप्रतिपन्नपुत्रो विद्वज्जनमधुकरसहकारः सारासा-रविचारवेद्यास्ते इति। तदुत्कण्ठितास्तत्रागन्तुम्। इश्वरस्त्वाच न गच्छामः क्वापि। पुनश्चिन्तितं च-कदाचिद् तीर्थनत्यै एताऽत्र मन्त्री। तस्य पुरो वक्ष्यामः स्वैरं सूक्तानि। इति ध्यायतामस्माकं मन्त्रिमिश्राः अत्रागताः। यावत्पठ्यते किमपि तावदसत्सम्भावनयाऽवज्ञापरा यूयं स्थिताः। ततः किं पठ्यते गच्छत गच्छत उत्सूरं भवति।" मन्त्री प्राह-"ममापराधः क्षम्यतां किमेतत्पठितुमारेभे भवद्भिः।" आचार्या जगदुः-"देव! यदा गुर्वां सबान्धवौ श्रावकश्रेण्यऽग्रे राजराजेश्वरौ दिव्यभूषणौ, श्रावकाश्च धनाढ्या दृष्टाः, गीताद्युच्छ्रयश्च।

For Private And Personal

तदा एतन्नश्चित्ते बभूव–जगति स्त्रीजातिरेव धन्या । यद्गर्भे जिनचक्रधर्द्धचक्रिनल–कर्ण–युधिष्ठिर–विक्रम सातवाहनाद्यो जाताः । सम्प्रत्यपि ईदृशाः सन्ति । तस्मात् श्रीसाम्बश्रीशान्ति ब्रह्मनागआम–दत्तनागड-वंश्यश्रीआभूनन्दिनी कुमरा देवी श्लाघ्या । यया एतौ कलियुगमहान्धकारमज्जज्जिनधर्मप्रकाशनप्रदीपौ ईदृशौ नन्दनौ जातौ । इत्येवं चिन्तयतामस्माकं पद्यपादद्वयं वदनादुद्गतम् । जिननमस्कारादि विस्मृतं । पश्चार्द्धं तु श्रृणुत ।

यत्कुक्षिप्रभवा एते वस्तुपालभवादृशाः ॥ १ ॥

सविस्तरतरं व्याख्यानं कृतम् । लज्जितः सचिवेन्द्रः । पादौर्लगित्वा सूरीन् क्षमयित्वा चलितः । कोशान्ते ग्राम एक आगात् । तत्र स्नातभुक्तविलिप्तः । तदनु स्वभृत्यं सचिवमेकमाकार्य आदिक्षत् । इयं वाहिनी हेमसहस्रदशबदरकयुक् सूरिभ्यो मठे देयाः । गतो मन्त्रिसेवकस्तत्र । भाषिताः सूरयः । मन्त्रिदत्तमिदमवधार्यतां । आचार्यैर्दृष्टम् । अश्वमारुह्य भटशतोल्लालितकृपाणजलप्लावितरवास्तत्र गताः, यत्र श्रीवस्तुपालः । उदितश्च तैः–"मन्त्रिन् ! किमहमुचितभाषी चारणः ? । किं वा बन्दी ? । किन्तु सर्वसिद्धान्तपारगः सम्यग् जैनसूरिः । मया मनःप्रमोदेन यद् वः उपश्लोकनमुक्तं तन्मूल्यभूतामिमां वो दत्तिं कथं गृह्णामि । न मयैवं वित्ताय्याभिहितम् । किन्त्विदं अन्तर्मनसं ध्यात्वा भणितम् । यथाऽद्यापि जयति जिनपतिमतं तीर्थकृद्धारक-

सदृशां एवंविधः पुरुषरत्नैः। धनं न गृह्णाम्येव।" मन्त्री प्राह–भवन्तो निस्पृहत्वान्न गृह्णन्ति। वयं तु दत्तत्वान्न प्रतिगृह्णीमः। तर्हि कथमनेन हेम्ना भवितव्यमिति। शिक्षां दत्त।" ततः सूरिभिर्जगदे–"जगदेकदानवीर! मन्त्रिन्? स्वगृहाय सम्प्रति गंस्यते भवद्भिस्तीर्थाय कस्मै चिद्वा।" मन्त्रीआह–"प्रभो! श्रीसुव्रततीर्थवन्दनार्थं गच्छन्तः स्मः।" आचार्याः प्राहुः–"तर्हि लब्धः इदं हेमव्ययोपायः। तत्र लेप्यमयी प्रतिमास्ते। तत्र स्नात्रसुखासिका न पूर्यते श्रावकाणाम्। तस्मादनेन हेममयी स्नात्रप्रतिमां निर्मापयत।" मन्त्रिणोर्ध्वनितं मनः। तत्तथैव कृतम्। ततः समायातः स्वसदनं गूर्जरमन्त्री। अन्येद्युरादर्शे प्रातर्वदनं पश्यता सचिवेन पलितमेकमालोकि अपाठि च।

अधीता न कला काचित् न च किञ्चित्कृतं तपः। दत्तं न किञ्चित्पात्रेभ्यो गतं च मधुरं वयः॥ १॥

आयुर्यौवनवित्तेषु स्मृतिशेषेषु या मतिः सैव चेज्जायते पूर्वं न दूरे परमं पदम्॥ २॥

आरोहन्ती शिरःस्वान्तादौन्नत्यं तनुते जरा। शिरसः स्वान्तमायान्ती दिशते नीचतां पुनः॥ ३॥

लोक पृच्छति मेवार्त्तां शरीरे कुशलं तव। कुतः कुशलमस्माकमायुर्याति दिने दिने॥ ४॥

For Private And Personal

ततोऽधिकं जिनधर्मे रेमे । अथैकदा द्वावपि भ्रातरौ राणश्रीवीरधवलं व्यजिज्ञपताम्–" देव ! देवपादै-रियं गुर्ज्जरधरा साधिता । राष्ट्रान्तराणि करदानि कृतानि । यथादेशः स्यात् तदा राज्याभिषेकोत्सवः क्रियते । " राणकेनोक्तम्–मन्त्रिणौ ऋजू भक्तिजडौ युवां ।

अजित्वा साऽर्णवामुर्व्वीमनिष्ट्वा विविधैर्मखैः । अदत्वा चार्थमर्थिभ्यो भवेयं पार्थिवः कथम् ॥ १ ॥

ततो राणकमात्रत्वमेवास्तु । इत्युक्त्वा व्यसृजत्तौ । एकदा मन्त्रिभ्यां श्रीसोमेश्वरादिकविभ्यो विपुला वृत्तिः कृता भूम्यादिदानैः । ततः पठितं सोमेश्वरेण—

सूत्रे वृत्तिः कृता पूर्वं दुर्गसिंहेन धीमता । विसूत्रे तु कृताऽस्माकं वस्तुपालेन मन्त्रिणा ॥ १ ॥

श्रीवीरधवलोऽपि सेवकान् सुष्ठु पद्वीमारोपयन् जगत्प्रियोऽभूत् । किमुच्यते तस्य । पश्यत पश्यत

श्रीवीरधवलो ग्रीष्मे चन्द्रशालायां सुप्तोऽस्ति । वण्ठश्चरणौ चम्पयत्येकः । राणकः पटीपिहितवदनो जाग्रदपि वण्ठेन सुप्तो मेने । ततश्चरणाङ्गुलिस्था रत्नाङ्कामुद्रा जगृहे । मुखे च चिक्षिपे । राणकेन किमपि नोक्तम् । उत्थितो राणः । भाण्डागारिकपार्श्वाद् गृहीत्वाऽन्या मुद्रा तादृगेव पादाङ्गुलौ स्थापिता । द्वितीयदिने पुनः राणकस्तत्रैव शालायां प्रसुप्तः । वण्ठश्चरणौ स एव चम्पयति । राणस्तथैव पटीस्थगितवदनोऽस्ति ।

वण्ठः पुनः पुनः मुद्रामालोकते । अहो प्राक्तनी चेयम् । ततो राणेन्द्रः प्राह–"भो वंठ ! इमां तु मुद्रां मा ग्रहीः । या कल्ये गृहीता सा गृहीता । एतद्वचनाकर्णन एव वण्ठो भीत्या वज्राहत इवास्थात् ।

यतो–हसन्नपि नृपो हन्ति मानयन्नपि दुर्जनः । स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजङ्गमः ॥१॥

तां तस्य दीनतां दृष्ट्वा राणकेन भणितम्–" बत्स ! मा भैषीः । अस्माकमेवायं कार्पण्यजो दोषः । येन तेऽल्पा वृत्तिः । इच्छा न पूर्यते । ततो बह्वपाये चौर्ये बुद्धिः । अतः परं हय आरोहाय दीयमानोऽस्ति लक्षार्द्धं वृत्तौ । " इत्याश्वासितः सः ।

अतो वीरधवलः क्षमापरत्वाज्जगद्वल्लभः सेवकसदाफलत्वेन प्रपथे । स सहजदयार्द्र इति कारगान्मन्त्रिभ्यां इह कथान्तरे शान्तिपर्वणि द्वैपायनोक्तभीष्मयुधिष्ठिरोपदेशद्वारायातं द्वैपायनोक्तद्वात्रिंशदधिकारमयेतिहासशास्त्रीयाष्टाविंशाधिकारस्थं शिवपुराणमध्यगतं च मांसपरिहारं व्यस्ख्याय व्याख्याय प्रायो मांसमद्यमृगयाविमुखकृतः पुनर्मलधारिश्रीदेवप्रभसूरिसविधे व्याख्यां श्रावं श्रावं सविशेषं तेन तत्त्वपरिमलितमतिर्विरचितः । अन्येद्युर्वस्तुपालो ब्राह्म्ये मुहूर्त्ते विमृशति–"यद्यर्हद्यात्रा विस्तरेण क्रियते तदा श्रीःफलवती भवेत् ।

श्रीणां स्त्रीणां च ये वश्यास्तेऽवश्यं पुरुषाऽधमाः । स्त्रियः श्रियश्च यद्वश्यास्तेऽवश्यं पुरुषोत्तमाः ॥१॥

For Private And Personal

नृपव्यापारपापेभ्यः सुकृतं स्वीकृतं न यैः । तान् धूलिधावकेभ्योऽपि मन्ये मूढतरान् नरान् ॥ २ ॥"

इत्यादि विमृश्य तेजःपालेन नित्यभक्तेन सांमत्यं कृत्वा मलधारिश्रीनरचन्द्रसूरिपादानपृच्छत्— "भगवन् ! या मे चिन्ताऽधुना वर्त्तते सा निष्प्रत्यूहं सेत्स्यति ? ।" प्रभुभिः शास्त्रज्ञकिरीटैरुक्तम्—"जिनयात्राचिन्ता वर्त्तते, सा सेत्स्यति ।" वस्तुपालेन गदितम्—"तर्हि देवालये वासक्षेपः क्रियताम् ।" तदा श्रीनरचन्द्रसूरयः प्राहुः—"मन्त्रीश ! वयं ते मातृपक्षे गुरवो न पितृपक्षे । पितृपक्षे तु नागेन्द्रगच्छीयाः श्रीविजयसेनसूरयः उदयप्रभसूरिसंज्ञकशिष्ययुजो विशालगच्छा पील्हूआईदेशे वर्तन्ते । ते वासनिक्षेपं कुर्वन्तु परं न वयं । यदुक्तम्—

जा जस्स ठिई जा जस्स संतइ पुव्वपुरिसकयमेरा कंठठिए वि जीए सा केण न लंघियव्वत्ति ॥१॥"

अथ मन्त्र्याह—"अस्माभिर्भवदन्तिके त्रैविद्यषडावश्यककर्मप्रकृत्याद्यधीतम् । यूयमेव गुरवः ।" प्रभुभिरुक्तम्—"नैवं वाच्यम्, लोभपिशाचप्रवेशप्रसङ्गात् ।" ततो मन्त्रिभ्यां मरुदेशाद् गुरवः शीघ्रमानायिताः । मुहूर्तप्रतिष्ठादेवालयप्रस्थापनं वासनिक्षेपणं कुलगुरुभिः कृतम् । साधर्मिकवात्सल्यं शान्तिकं मारिवारणं स्वामिपूजनं लोकरञ्जनं चैत्यपरिपाटीपर्यटनं च विहितम् । अथ प्रतिलाभना तत्र मिलिताः कवीश्वराः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नरेश्वराः सङ्घेश्वराः। दत्तानि कौशेयकटककुण्डलहारादीनि लोकेभ्यः। यतिपतिभ्यस्तु तदुचितानि वस्त्रकम्बलभोज्यादीनि। तदा श्रीनरचन्द्रसूरिभिः सङ्घानुज्ञातैर्व्याख्या कृता।

चौलुक्यः परमार्हतो नृपशतस्वामी जिनेन्द्राज्ञया निर्ग्रन्थाय जनाय दानमनर्घं न प्राप जानन्नपि।
स प्राप्तस्त्रिदिवं स्वचारुचरितैः सत्पात्रदानेच्छया त्वद्रूपोऽवततार गुर्जरभुवि श्रीवस्तुपालो ध्रुवम् ॥ १ ॥

ध्वनितः सङ्घः। अथ चलितः सुशकुनैः ससङ्घो मन्त्री। मार्गे सप्तक्षेत्राण्युद्धरन् श्रीवर्द्धमानपुरासन्नमावासितः। तदा वर्द्धमानपुरमध्ये बहुजनमान्यः श्रीमान् रत्ननामा श्रावको वसति। तद्गेहे दक्षिणावर्तः शङ्खः पूज्यते। स रात्रौ करण्डान्निर्गत्य स्निग्धगम्भीरं घुमघुमायते नृत्यति च। तत्प्रभावात्तस्य गृहे चतुरङ्गा लक्ष्मीः। शङ्खेन रात्रौ रत्न आलेपे–“ तव गृहेऽहं चिरमस्थाम्। इदानीं तव पुण्यमल्पम्। मां श्रीवस्तुपालपुरुषोत्तमकरपङ्कजप्रणयिनं कुरु। सत्पात्रे मद्दानात् त्वमपीह परत्र च सुखी भव।” तस्याभिप्रायं व्यक्तं तज्ज्ञात्वा रत्नो विपुलसामग्र्याऽभिमुखो गत्वा मन्त्रीशं ससङ्घं निमन्त्र्य स्वगृहे बहुपरिकरं भोजयित्वा परिधाप्योचे–“ एवमेवं शङ्खादेशो मे। गृहाणेमम्।” मन्त्र्याह–“ न वयं परधनार्थिनः। पिशुनाच्छङ्खसत्तां ज्ञात्वा तं ग्रहीष्यति स्वयं मन्त्री। तस्मात् स्वयमेव ददामि। इत्यपि मा शङ्किष्ठाः, निर्लोभत्वादस्माकमस्मत्प्रभूणां च।” इत्युक्त्वा विरते मन्त्रिणि रत्नेन गदितम्–“ देव! मद्गृहावस्थानमस्मै न रोचते। ततः किं

For Private And Personal

क्रियते गृहाणैव ।" ततो गृहीतो मन्त्रिणा शङ्कः । तत्प्रभावोऽनन्तः । शनैः शनैः सङ्घः श्रीशत्रुञ्जयतलहट्टिकां प्राप्तः । तत्र ललितामरः प्रासादादिकीर्त्तनानि पश्यन् प्रमुदितः ससङ्घः सचिवः । आरूढः शत्रुञ्जयाद्रिं विवेकं च भावं च । तत्र मन्त्री प्रथमं ऋषभं वन्दते । तदा काव्यपाठः—

आस्यं कस्य न वीक्षितं क्व न कृता सेवा न के वा स्तुताः, तृष्णापूरपराहतेन विहिता केषां च नाभ्यर्थना ।
तत्तातर्विमलाद्रिनन्दनवना कल्पैककल्पद्रुम, त्वामासाद्य कदा कदर्थनमिदं भूयोऽपि नाहं सहे ॥ १ ॥

अथावारितसत्रमेरुध्वजारोपणेन्द्रपदार्थिरञ्जनादीनि कर्त्तव्यानि विहितानि । देवेभ्यो हैमानि आभरणानि तिलकादीनि दत्तानि । कुङ्कुमकर्पूरागुरुमृगमदचन्दनकुसुमपरिमलमिलदलिकुलझङ्कारभारपूरितमिव गगनमभवत् । गीतरासध्वनिभिर्दिक्कुहराणि अभ्रियन्त । पूर्वं मन्त्रिश्रीउदयनदत्ता देवदायाः सर्वेऽपि सविशेषाः कृताः । देवद्रव्यनाशनिषेधार्थं चत्वारि श्रावककुलानि अद्रौ मुक्तानि । अनुपमा दानाधिकारिणी कृताऽस्ति । तस्याः साधुभ्यो दानानि ददत्याः किल महति वृन्दे पतता घृतकडहट्टकेन क्षौमाण्यभ्युक्तानि । तदा याष्टीकेन कडहट्टभृते साधवे यष्टिप्रहारलेशो दत्तः । मन्त्रिण्या देशनिर्वासनं समादिष्टम् । भणितं च—
" रे न वेत्सि ! यद्यहं तैलिकपत्नी कान्दविकपत्नी वाऽभविष्यम् । तदा प्रतिपदं तैलघृताभिष्वङ्गान्मलिनान्येव वासांस्यभविष्यन् । एवं तु वस्त्राभ्यङ्गो भाग्यलभ्यः दर्शनप्रसादादेव स्यात् । य इदं न मन्यते तं न नः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कार्यमेव न ।" इत्युक्तं च । अहो दर्शनभक्तिरिति ध्वनितं सर्वम् । एकदा मन्त्रीश्वरो नाभेयपुरआरात्रिके स्थितोऽस्ति दिव्यधवलवासाश्चान्दनतिलको दिव्यपदकहारभूषितोरस्थलः । सूरीणां कवीनां श्रावकश्राविकाणां च नतिः । तिलकं तिलकोपरि । पुष्पस्रक्पुष्पस्रगुपरि । तदा सूत्रधारेणैकेन दारवी कुमरादेव्या मातुर्मूर्त्तिर्महन्तकायनवीनघटिता दृष्टौ कृता । उक्तं च तेन-" मातुर्मूर्त्तिरियम् ।" तदा मन्त्रीश्वरेणाशिखानखं दृष्टा मूर्त्तिः । दृष्ट्वा च रुदितम् । प्रथममश्रुमात्रं ततोऽव्यक्तइतरो ध्वनिः । ततो व्यक्ततरः । सर्वे तटस्थाः पृच्छन्ति-" देव ! किं कारणं रुद्यते ? । हर्षस्थाने को विषादः ? । यथा श्रुतशील इव नलस्य । उद्धव इव विष्णोः । अभय इव श्रेणिकस्य । कल्पक इव नन्दस्य । जम्बक इव वनराजस्य । विद्याधर इव जयन्तराजस्य । आलिग इव सिद्धराजस्य । उदयन इव कुमारपालस्य । तथा त्वं मन्त्री वीरधवलस्य । विपद्गीताः पर्वता इव सागरं तथा त्वामाश्रयन्ति भूपाः । तार्क्ष्येणेव पन्नगास्तथा त्वया हताः सपत्नाः पृथिवीपालाः । चन्द्राय इव चकोरास्तथा तुभ्यं स्पृहयन्ति स्वजनाः । हिमवत इव गङ्गा तथा त्वत्प्रभवति राजनीतिः । भानोरिव पद्मास्तथा तवोदयमीहन्ते सूरयः । विष्णाविव त्वयि रमते श्रीः । तन्नास्ति यन्नास्ति ते । एवं सति किमर्थं दुःखं ध्रियते ।" ततो मन्त्रिणोक्तम्- " इदं दुःखं यन्मे भाग्यं सङ्घाधिपत्यादिविभूतिर्मातृमरणादनन्तरं सम्पन्नाः । यदि तु सा मे माता इदानीं स्यात् । तदा स्वहस्तेन मङ्गलानि कुर्वत्यास्तस्या मम च मङ्गलानि कारयतः पश्यतश्च

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

लोकस्य कियत्सुखं भवेत् । परं किं कुर्मो धात्रा हताः स्मः एकैकन्यूनीकरणेन । ” तदा श्रीनरचन्द्रसूरिभिर्मलधारिभिरभिहतम्–“मन्त्रीश्वर ! यथा त्वं सचिवेषु तथाऽत्र देशे प्रधानराजसु सिद्धराजो व्यजीयत । स मालवेन्द्रं जित्वा पत्तनमागतो मङ्गलेषु क्रियमाणेष्वपाठीद् यथा—

माऽस्म सीमन्तिनी कापि, जनयेत् सुतमीदृशम् । बृहद्भाग्यफलं यस्य, मृतमातुरनन्तरम् ॥ १ ॥

तस्मात् हृदयं अधःकृत्वा स्थीयते विवेकिभिः । न सर्वेऽपि नृणां मनोरथाः प्रपूर्यन्ते । ” इत्याद्युक्त्वा मन्त्री बलादारात्रिकमङ्गलदीपादि कारितः । ततो चैत्यवन्दना गुरुवन्दनं च । तदा श्रीनरचन्द्रसूरिभिराशीर्दत्ता—

तवोपकुर्वतो धर्मं तस्य त्वामुपकुर्वते । वस्तुपाल द्वयोरस्तु युक्त एव समागमः ॥ १ ॥

इत्यादि । अथ रात्रौ तन्मयतया नाभेयपूजाध्यानदानः । तदा कवयः पठन्ति । एकः कश्चित्—

ये पापप्रवणाः स्वभावकृपणाः स्वामिप्रसादोल्बणास्तेऽपि द्रव्यकणाय मर्त्यभषणा जिह्वे भवत्या स्तुताः ।
तस्मात् त्वं तदघापघातविधये बद्धादरा सम्प्रति श्रेयःस्थानविधानाधिकृतकलिं श्रीवस्तुपालं स्तुहि ॥१॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

अपरस्तु—

शूरो रणेषु चरणप्रणतेषु सोमो, वक्रोऽतिवक्रचरितेषु बुधोऽर्थबोधे ।
नीतौ गुरुः कविजने कविरक्रियासु मन्दोऽपि च ग्रहमयो नहि वस्तुपालः ॥ २ ॥

अन्यस्तु—

श्रीभोजवदनाम्भोजवियोगविधुरं मनः । श्रीवस्तुपालवक्त्रेन्दौ विनोदयति भारती ॥ ३ ॥

इतरस्तु—

श्रीवासाम्बुजमाननं परिणितं पञ्चाङ्गुलिछद्मनो, जग्मुर्दक्षिणपञ्चशाखमयतां पञ्चापि देवद्रुमाः ।
वाञ्छापूरणकारणं प्रणयिनां जिह्वैव चिन्तामणिर्जाता यस्य किमस्य शस्यमपरं श्रीवस्तुपालस्य तत् ॥४॥

सर्वत्र लक्षदानम् । अष्टाहिकायां गतायां ऋषभदेवं गद्गदोक्त्या मन्त्री अपृच्छत्—
"त्वत्प्रासादकृते नीडे, वसन् शृण्वन् गुणां स्तव । सद्दर्शनतुष्टात्मा भूयासं विहगोऽप्यहम् ॥ ५ ॥
यद्दाये द्यूतकारस्य यत्प्रियायां वियोगिनः । यद्राधावेधिनो लक्षे तद्ध्यानं मेऽस्तु ते मते ॥ ६ ॥
इत्याद्यकथयत् । एवं सङ्घोऽपि चलितः । ससङ्घः सचिवः मरुदेवाशिखरादग्रे यावत् कियदपि याति ।
तावत् श्रमवशाविगलत्स्वेदक्लिन्नगात्रवसनान् कत्यपि मालिकान् पुष्पकरण्डकभारितशिरसोऽपश्यत् । पृष्टास्ते—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

" कथमुत्सुका इव यूयम् । " तैर्विज्ञप्तम्–" देव ! वयं दूरात् पुष्पाण्याहार्ष्म । सङ्घः किल शत्रुञ्जयशिखरेऽस्ति । प्रकृष्ट मूल्यं लप्स्यामहे । तत्पुनरन्यथा जातम् । सङ्घश्चलितः । तस्माद्भाग्या वयमिति । " तेषां दैन्यं दृष्ट्वा मन्त्रिणाऽभाणि–" अत्रैव स्थीयतामूर्ध्वैः क्षणम् । " तावता पाश्चात्यं सर्वमायातं । श्रीवस्तुपालेन स्वकुटुम्ब सङ्घश्चाभाण्यतां । यथा–" भो धन्याः ! सर्वेषां पूर्णस्तीर्थवन्दनपूजाभिलाषः । " लोकेनोक्तम्–" भवत्प्रसादात्पूर्णः । " मन्त्र्याह–" किमपि तीर्थमपूजितं स्थितमस्ति । " लोकः प्राह–"प्रत्येकं सर्वाणि तीर्थानि पूजितानि ध्यातानि । " मन्त्रिमहेन्द्रः प्राह–" यद्विस्मृतं तन्न जानीथ यूयम् । वयं स्मारयामः । " सङ्घो वदति–" किं विस्मृतं, तत्कथयन्तु । " मन्त्री वदति–" भो लोकाः ! पूर्वं तीर्थमयं पर्वतः । यत्र स्वयमृषभदेवः समवासार्षीत् । ततो नेमिवर्जितास्त्रयोविंशतिर्जिनाः समवासार्षुः । असङ्ख्याः सिद्धाश्च यत्र । सोऽद्रिः कथं न तीर्थम् ? । लोकोऽप्याह–" सत्यं तीर्थमयं पर्वतः । " तर्हि पूज्यताम् । पुष्पादीनि क्वेति चेद् कथयिष्यन् तदा इमे मालिका इमानि पुष्पाणि वः पुण्यैरुपास्थिषतेति । " ततः सङ्घेन तानि पुष्पाणि गृहीत्वाऽद्रिपूजा कृता । द्रम्मेण पुष्पं जातम् । नालिकेरास्फालनवस्त्रदानादिकेलयश्च । तुष्टा मालिकाः । एवं पराशाभङ्गपराङ्मुखः आसराजभूः । ततः शनैः शनैः पशुतुरङ्गशिश्वाद्यपीडया सङ्घो रैवतकमारुरोह च । नेमिनि दृष्टे मन्त्री ननर्त्त । पपाठ च आनन्दाश्रुनिर्झरिताक्षः—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

कल्पद्रुमतरुरसौ तरवस्तथाऽन्ये, चिन्तामणिर्मणिरसौ मणयस्तथाऽन्ये ।
धिग्जातिमेव ददृशे बत यत्र नेमिः, श्रीरैवते स दिवसो दिवसास्तथाऽन्ये ॥ १ ॥
अभङ्गवैराग्यतरङ्गरङ्गे, चित्ते त्वदीये यदुवंशरत्न ! ।
कथं कृशाङ्ग्योऽपि हि मान्तु हन्त, यस्मादनङ्गोऽपि पदं न लेभे ॥ २ ॥

तत्राऽप्यष्टाह्निकादिविधिः प्रागिव । नाभेयभवनकल्याणत्रयगजेन्द्रपदकुण्डान्तिकप्रासादअम्बिकाशाम्बप्रद्युम्नशिखरतोरणादिकीर्त्तनदर्शनैर्मन्त्री सङ्घस्य नयनयोः स्वादुफलमार्पिपताम् । आरात्रिकेऽर्थिनां ससम्भ्रमं मन्त्रिमध्ये झम्पापनं दृष्ट्वा श्रीसोमेश्वरकविः प्राह—

इच्छासिद्धिसमुन्नते सुरगणे कल्पद्रुमैः स्थीयते पाताले पचमानभोजनजने कष्टं प्रनष्टो बलिः ।
नीरायानगमन् मुनीन् सुरभयश्चिन्तामणिः काप्यगात् तस्मादर्थिकदर्थनां विषहतां श्रीवस्तुपालः क्षितौ ॥१॥

लक्षः सपादोऽस्य दत्तो मन्त्रिणः । दानमण्डपिकायां निषण्णो निरर्गलं दानं ददत् एवं स्तुतः केनापि कविना—

पीयूषादपि पेशलाः शशधरज्योत्स्नाकलापादपि, स्वस्था नूतनचूतमञ्जरिभराद्प्युल्लसत्सौरभाः ।
वाग्देवीमुखसाममूक्तविशदोद्गारादपि प्राञ्जलाः, केषां न प्रथयन्ति चेतसि मुदं श्रीवस्तुपालोक्तयः ॥ १ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वस्तुपाल ! तव पर्वशर्वरीगर्वितेन्दुकरजित्वरं यशः ।
क्षीरनीरनिधिवाससः क्षितेरुत्तरीयतुलनां विगाहते ॥ २ ॥

एवं भावं सम्पूर्य देवोत्तमं श्रीनेमिमापृच्छय सर्वासां तीर्थचिन्ताकृतां निर्माल्यपदं दत्त्वा पर्वतादुदतारीत्, न सतां हृदयात् नापि महत्त्वात्। अथ खङ्गारदुर्गाद्रिदेवपत्तनादिषु देवान् ववन्दे। तेजःपालं खङ्गारदुर्गे स्थापयित्वा स्वयं ससङ्घो वस्तुपालः श्रीधवलक्कके श्रीवीरधवलमगमत्। स्वागतप्रश्नः स्वामिना कृतः। आरम्भसिद्धिप्रश्नश्च। ततो मन्त्र्याह—

कामं स्वामिप्रसादेन प्रेष्याः कर्म्मसु कर्म्मठाः। तद् वैभवं बृहद्भानोः क्वचिद्भस्मा जलेऽपि यत् ॥ १ ॥

राणकेन ससङ्घः सचिवः स्वसदने भोजितः परिधापितः स्तुतश्च। तेजःपालोऽपि खङ्गारदुर्गस्थो भूमिं विलोक्य तेजलपुरममण्डयत्, सत्रारामपुरप्रपाजिनगृहादिरम्यं। प्राकारश्च तेजलपुरं परितः कारितः पाषाणबद्धस्तुङ्गः। अथ वस्तुपालः श्रीवीरधवलपार्श्वे सेवां विधत्ते। देशः सुस्थः धर्मो वर्त्तते। एवं सत्येकदा ढिल्लीनगरादेत्य चरपुरुषैः श्रीवस्तुपालो विज्ञप्तः—“देव! ढिल्लीनः श्रीमोजदीनसुरत्राणस्य सैन्यं पश्चिमां दिशामुद्दिश्य चलितम्। चत्वारि प्रयाणानि व्यूढं। तस्मात्सावधानैः स्थेयम्। मन्ये अर्बुदमध्ये भूत्वा गुर्ज्जरधरां प्रवेष्टा।” मन्त्रिणा सत्कृत्य ते चरा राणपार्श्वे नीताः कथापितः स प्रबन्धः। ततो राणकेनाभाणि—

For Private And Personal

" वस्तुपाल ! म्लेच्छैर्गर्दभल्लो गर्दभीविद्यासिद्धोऽप्यभिभूतः । नित्यं सूर्यबिम्बनिर्यत्तुरङ्गमकृतराजपाटीकः शिलादित्योऽपि पीडितः । सप्तशतयोजनभूनाथो जयन्तचन्द्रोऽपि क्षयं नीतः । विंशतिवारबद्धसहावदीनसु रत्राणमोक्ता पृथिवीराजोऽपि बद्धः । तस्माद् दुर्जया अमी । किं कर्त्ताऽसि ? ।" वस्तुपाल उवाच-"स्वामिन् ! प्रेषय माम् यदुचितं तत्करिष्यामि ।" ततः साराश्वलक्षेण सह चलितो मन्त्री । तृतीयप्रयाणे महणलदेवीं कर्पूरादिमहापूजापूर्वं सस्मार । सा तद्भाग्यात्प्रत्यक्षीभूयोवाच-"वत्सक ! मा भैषीः । अर्बुदगिरिदिशा यवनाः प्रवेक्ष्यन्ति । तव देशं यदाऽमी प्रविशन्ति तदैव तल्लङ्घिता घण्टिकाः स्वराजन्यै रोधयेथाः । तेऽथ यत्रावासान् गृह्णन्ति । तत्र स्थिरचित्तः ससैन्यो युद्धाय सरभसं ढौकेथाः । जयश्रीस्तव करपङ्कजे एव ।" इदं श्रुत्वा धारावर्षायाऽर्बुदगिरिनायकाय स्वसेवकाय नरान् प्रैषयत् । अकथापयच्च-" म्लेच्छसैन्यमर्बुदमध्ये भूत्वा आजिगमिषदास्ते । त्वयैतानागच्छतो मुक्त्वा पश्चाद् घंट्टिका रुन्ध्याः ।" तेन तथैव कृतम् । प्रविष्टा यवनाः । यावदावासान् गृहीष्यन्ति तावत्पतितो वस्तुपालः कालः । हन्यन्ते यवनाः । उच्छलितो बुम्बारवः । केचिद्दन्तान्तरं अङ्गुलीं गृह्णन्ति । अपरे तोबां कुर्वन्ति । तथाऽपि न च्छुटन्ति । एवं तान् हत्वा तच्छीर्षलक्षैः शकटानि भृत्वा धवलक्कमेत्य मन्त्री स्वस्वामिनं प्रत्यदर्शयत् । श्लाघितश्च तेनायम् ।

न ध्वानं तनुषे न यासि विकटं नोच्चैर्वहस्याननं दर्पान्नोल्लिखसि क्षितिं खरपुटैर्नावज्ञया वीक्ष्यसे ।
किन्तु त्वं वसुधातलैकधवलस्कन्धाधिरूढे भरे तीर्थान्युच्चतटीविटङ्कविषमाण्युल्लङ्घयन् लक्ष्यसे ॥ १ ॥

ततः परिधापितः । विसृष्टः स्वगृहाय । तत्र मङ्गलकरणाय लोकागमः । द्रम्मेण पुष्पं लभ्यते तदवसरेऽपि । एवं पुष्पस्रक्क्रयो लोकैः कृतः ।

इतश्च नागपुरे साधुदेल्हासुतः सा० पूनडः श्रीमोजदीनसुरत्राणपत्नीबीबीप्रेमकमलाप्रतिपन्नबन्धवो अश्वपतिगजपतिनरपतिमान्यो विजयते । तेन प्रथमं श्रीशत्रुञ्जये यात्रा त्रिसप्तत्यधिकद्वादशशतवर्षे विक्रमात् १२७३ वर्षे बिम्बेरपुरात् कृता । द्वितीया सुरत्राणादेशात् षडशीत्यधिके द्वादशशतसङ्ख्ये १२८६ वर्षे नागपुरात्कर्त्तुमारब्धा । तत्सङ्घेऽष्टादशशतानि शकटानि । बहवो महाधराः । तदनुसारेण शेषः परिवारः । माण्डलिग्रामासन्नो यावदायातः ससङ्घः । तावत्सम्मुखमागत्य तेजःपालमन्त्रिणा धवलक्कमानीतः । श्रीवस्तुपालः सम्मुखमागात् । सङ्घस्य धूली पवनानुकूल्याद् यां यां दिशमनुधावति । तत्र तत्र स गच्छति । तटस्थैर्नरैर्भणितम्–" मन्त्रीश ! इतो रजः । इतः पादोऽवधार्यतां । " ततः सचिवेन बभणे–"इदं रजः स्प्रष्टुं पुण्यैर्लभ्यते । अनेन रजसा स्पृष्टेन पापरजांसि दूरे नश्यन्ति । यतः—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रीतीर्थपान्थरजसा विरजीभवन्ति तीर्थेषु बम्भ्रमतो न भवे भ्रमन्ति ।
द्रव्यव्ययादिह नराः स्थिरसम्पदः स्युः पूज्या भवन्ति जमदीशमथार्चयन्तः ॥ १ ॥

ततः सङ्घपतिपूनडमन्त्रिणोर्गाढमालिङ्गनप्रियालापौ संवृत्तौ। सरस्तीरे स्थितः सङ्घः। रात्रौ श्रीवस्तुपालेन कथापितं पूनडाय पुण्यात्मने–"प्रातः सर्वसङ्घेनास्मदावासे भोक्तव्यम्। धूमो न कार्यः।" पूनडेन तथेति प्रतिपन्नम्। रात्रौ मण्डपो द्विद्वारो रसवतीप्रकारश्च। सर्वं निष्पन्नम्। भोजनमण्डपे प्रातरायान्ति नागपुरीयाः। सर्वेषां चरणक्षालनं तिलकरचनां च श्रीवस्तुपालः स्वहस्तेन करोति। एवं लग्ना द्विप्रहरी। मन्त्री तु तथैवानिर्विण्णः। तदा तेजःपालेन विज्ञप्तम्–"देव! अन्यैरपि सङ्घभक्तिः कारयिष्यते। यूयं भुङ्ध्वम्। तापो भावी।" मन्त्री भणति–"मैवं वादीः। पुण्यैरयमवसरो लभ्यते।" गुरुभिरपि कथापितम्–

यस्मिन् कुले यः पुरुषः प्रधानः स एव यत्नेन हि रक्षणीयः।
तस्मिन् विनष्टे हि कुलं विनष्टं न नाभिभङ्गे त्वरका वहन्ति ॥ १ ॥

तस्माद् भोक्तव्यं भवद्भिः।" मन्त्रिणा गुरून् प्रति पुनरिदं काव्यं प्रहितम्–

"अद्य मे फलवती पितुराशा मातुराशिषशिखा कुरुताञ्च।
यद् युगादिजिनयात्रिकलोकं, पूजयाम्यहमशेषमखिन्नः ॥ २ ॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भोजयता मन्त्रिणा नागपुरीयाणामेकपङ्क्तित्वं दृष्ट्वा शिरो धूनितम् । अहो ! शुद्धा लोका एते । एवं भोजयित्वा परिधाप्य च रञ्जितो नागपुरसङ्घः । गतौ वस्तुपालपूनडौ श्रीशत्रुञ्जयं ससङ्घौ । वन्दितः श्रीऋषभः । एकदा स्नात्रे सति देवार्चको देवस्य नासां पिधत्ते पुष्पैः । किल कलसेन नासां मापीडीदित्याशयतः । तदा मन्त्रिणा चिन्तितम्–"कदाचिद्दैवाद् देवाधिदेवस्य कलशादिना परचक्रेण वाऽवक्तव्यममङ्गलं भवेत् तदा का गतिः सङ्घस्य ।" इति चिन्तयित्वा पूनड आलेपे–"भ्रातः ! सङ्कल्पोऽयमेवं मे संवृत्तः । यदि बिम्बान्तरमश्ममम्माणीमयं क्रियते तदा सुन्दरम् । तत्तु सुरत्राणमोजदीनमित्रे त्वयि यतमाने स्यान्नान्यथा ।" पूनडेनोक्तम्–"ततः गतैश्चिन्तयिष्यतेऽदः ।" इत्यादि वन्दतौ रैवतादितीर्थान् वन्दित्वा व्याघृत्तौ तौ । गतः पूनडो नागपुरम्। मन्त्री स्तम्भतीर्थे राज्यं शास्ति ।

एवं स्थितेऽन्येद्युः सुरत्राणमोजदीनमाता वृद्धा हजयात्रार्थिनी स्तम्भपुरमागता । नौवित्तगृहेऽतिथित्वेनास्थात् । सा समागता सचिवेन चरेभ्यो ज्ञाता । चराः प्रोक्ताः श्रीमन्त्रिणा–"रे ! यदा इयं जलपथेन याति तदा मे ज्ञाप्या ।" तैस्तथा कृतम् । गच्छन्ती ज्ञापिता । मन्त्रिणा निजकोलिकान् प्रेष्य तस्याः सर्वं कोटीम्बकस्थं वस्तु ग्राहितम् । सुष्ठु रक्षापितं च क्वचित् । तदा नौवित्तैः पूत्कृतं उपमन्त्रि–"देव ! जरत्येकाऽस्मद्यूथ्या हजयात्रायै गच्छन्ती त्वत्पद्रे तस्करैर्लुण्टिता ।" मन्त्रिणा पृष्टम्–"का सा जरती ? ।" तैरुक्तम्–

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

" देव! किं पृच्छसि ? मा मोजदीन सुरत्राणमाता पूज्या ।" मन्त्रिणा भणितं नायका:-" अरे ! वस्तु विलो-कयत विलोकयत ।" दिनद्वयं विलम्ब्यानीयार्पितं सर्वम् । जरती तु स्वगृह आनिन्ये । विविधा भक्तिः क्रियते । पृष्टा च-" किं हजयात्रेच्छा वः ।" तयोक्तम्-" अस्ति ।" तर्हि दिनकतिपयान् प्रतीक्षध्वम् । प्रतीक्षां चक्रे सा । तावतारासणे आश्मीयं तोरणं घटापितम् , आनायितं च । भेलयित्वा विलोकितं च । पुनर्विघटितं । स्तेन बद्धम् । सूत्रधाराः सह प्रगुणिताः । मन्त्रिणश्च मार्गश्चान्तरे त्रिविधोऽस्ति । एको जलमार्गः । अपरः करभगम्यः । इतरस्तु अश्वलङ्घ्यः । यत्र ये राजानोऽयोध्वा यथोल्लङ्घ्यन्ते तथा सूत्रं कृतम् । राज्ञां उपदार्थे द्रव्याणि प्रगुणीकृतानि । एवं सामग्र्या स्वयं सह भूत्वा सा प्रहिता तत्र । रचितं तोरणं मसीतिद्वारे । तत्र दीपतैलादिपूजाचिन्ता तद्राजपार्श्वात् शाश्वती कारिता । दत्तं भूरि भूरि तत्र । उद्भूद् भूरि यशः । व्या-वृत्ता जरती । आनीता स्तम्भपुरम् । प्रवेशमहः कारितः । स्वयं तदंह्रिक्षालनं चक्रे । एवं भक्त्या दिनदशकं स्थापिता स्वगृहे । तावता धवलकिशोरशतपञ्चकं अन्यदपि दुकूलगन्धराजकर्पूरादि गृहीतम् । वृद्धा प्रोक्ता-" मातश्चलसि । यथादिशसि तत्र मानं च दापयसि तदाऽहमप्यागच्छामि तव सम्प्रेषणार्थम् ।" तया भणितम्-" तत्राहमेव प्रभुः । स्वैरमेहि । पूजा ते तत्र बहुतरा ।" श्री वीरधवलानुमत्या चलितो मन्त्रि-महेन्द्रः । गतो ढिल्लीतटं राजमातृवचनात् । क्रोशद्वयेऽर्वाग् तस्थौ । सुरत्राणः सम्मुखमागान्मातुः । माता

For Private And Personal

प्रणता पृष्टा च सुखयात्रां । जरत्या प्रोक्तम्– " कथं न मे भद्रम् । यस्याः ढिल्ल्यां त्वं पुत्रः । गूर्जरधरायां तु वस्तुपालः ।" राज्ञा पृष्टम्– " कोऽसौ ? ।" जरत्या वृत्तान्तः प्रोक्तः तद्दिनगच्छातिगमः । राजाह:–' स कामिनि नात्रानीतः ।" वृद्धाह–"आनीतोऽस्ति ।" दृश्यतां नहि ? । अश्ववारान् प्रहित्य आनाय्य दर्शितो वस्तुपालः । दत्तापदा मन्त्रिणा । आलापितश्च राज्ञा–" मात्रा मदधिकस्त्वं पुत्रो मतः । तेन मम बान्धवस्त्वम् । अस्मन्माता त्वां स्तौति ।" एवं सुखवार्त्तां कृत्वा महनोत्सवेन स्वमातुरग्रेसरः कृत्वा श्रीवस्तुपालो ढिल्लीपुरं नीतः आवासितश्च साधुपूनडस्यावासे । स्वमुखेन सुरत्राणेन निमन्त्र्य साधुपूनडसदने भोजयित्वा निजधवलगृहे आकारितः सचिवेन्द्रः । सविनयं सत्कृत्य परिधापितः । सुवर्णकोटिमेकां प्रसादपदे दत्त्वा उक्तश्चेति–" किञ्चिद्याचस्व ।" वस्तुपालेनाभिहितम्–" देव ! गुर्ज्जरधरया सह देवस्य यावज्जीवं सन्धिः स्यात् । उपलपञ्चकं ममाणीखनीतो दापय ।" राज्ञा मतं तत् । दत्ता धीरा । तत्फलहीपञ्चकं नृपादेशात् पूनडेन प्रेषितं शत्रुञ्जयाद्रौ । तत्रैका ऋषभफलही । द्वितीया पुण्डरीकफलही । तृतीया कपर्दिनः । चतुर्थी चक्रेश्वर्याः । पञ्चमी तेजलपुरे श्रीपार्श्वफलही । वलितः पश्चान्मन्त्रीश्वरः स्वपुरं गतः । प्रणतः स्वस्वामी तेन चिरदर्शनोत्कण्ठाविह्वलेन । पूर्वमपि कर्णाकर्णिकया श्रुतं ढिल्लीगमनवृत्तान्तम् । पुनः सविशेषं मन्त्रिणं पप्रच्छ । सोऽपि निरवशेषमगर्वपरः प्राचख्यौ । तुष्टो वीरधवलः । दत्ता दशलक्षी हेम्नां प्रसादपदे । सा तु

गृहाद्वर्वागेव दत्ता बहुमिलितयाचकेभ्यः। मिलितो मन्त्रिगृहे सर्वोऽपि लोकः। स सत्कृत्य प्रेषितः। कव-यस्तु पठन्ति।

श्रीमन्ति दृष्ट्वा द्विजराजमेकं पद्मानि सङ्कोचमहो भजन्ति।
समागतेऽपि द्विजराजलक्षे सदा विकासि तव पाणिपद्मः ॥ १ ॥

उच्चाटने विद्विषतां रमाणामाकर्षणे स्वामिहृदश्च वश्ये।
एकोपि मन्त्रीश्वरवस्तुपाल! सिद्धस्तव स्फूर्त्तिमियर्त्ति मन्त्रः ॥ २ ॥

एवं स्तूयमान उत्तमत्वात्लज्जमानो वस्तुपालोऽधो विलोकयामास। ततो महानगरवासिना नानककविना भणितम्—

एकस्त्वं भुवनोपकारक इति श्रुत्वा सतां जल्पितं, लज्जानम्रशिराः स्थिरातलमिदं यद्वीक्षसे वेद्मि तत्।
वाग्देवीवदनारविन्दतिलक श्रीवस्तुपाल! ध्रुवम्, पातालाद्बलिमुद्दिधीर्षुरसकृन्मार्गं भवान्मार्गति ॥ ३ ॥

तदैव कृष्णनगरीयकविकमलादित्येन भङ्ग्यन्तरमुक्तम्—

For Private And Personal

लक्ष्मीं चलां त्यागफलां चकार, साऽर्थिश्रिता कीर्त्तिमसूत नन्दिनीम्।
साऽपीच्छया क्रीडति विष्टपाग्रतस्तद्वार्त्तयाऽसौ त्रपते यतो महान्॥ ४॥

तेषां कवीनां भूरि दानं दत्तम्।

अथ कदाचन मन्त्रिणा श्रुतं यथा–"रैवतकासन्नं गच्छतां लोकानां पार्श्वतो भरटकाः पूर्वनरेन्द्रदत्तं करमुद्ग्राहयन्ति। पोट्टलिकेभ्यः कणमाणकमेकं १ कूपकात्कर्ष एकः। एवं उपद्रूयते लोकः।" तत आयतिदर्शिना सचिवेन ते भरटकाः कुहाडीनामानं ग्रामं दत्त्वा तं करमुद्ग्राहयन्तो निषिद्धाः। अङ्केवालियाख्यो ग्रामस्तु ऋषभनेमियात्रिकाणां क्षीणधनानां स्वगृहाप्तियोग्यपाथेयद्रम्मपदे दत्तः। शत्रुञ्जयरैवतकतल्लहट्टिकानगरयोः सुखासनानि कृत्वा मुक्तानि अन्धज्वरितादीनां यात्रिकाणां तीर्थारोहणार्थम्। तदुत्पाटकनराणां तु ग्रासपदे शालिक्षेत्राणि प्रतिष्ठितानि। तीर्थेषु सर्वेषु देवेभ्यो रत्नखचितानि हैमभूषणानि कारितानि। विदेशायातसूरिसुश्रूषार्थं सर्वदेशग्रामण्यो नियुक्ताः। कृतं लौकिकतीर्थकरणमपि स्वस्वामिरञ्जनार्थम्, न भक्त्या स्वयं तु सम्यग्दृष्टित्वात्। एवं तस्योपकाराः कियन्त्युच्यन्ते विवेकशिरोमणेः।

एकदा स्तम्भतीर्थपुरं गतो मन्त्री धवलक्ककात्। तत्र समुद्रतीरे यानपात्रात्तुरङ्गा उत्तरन्तः सन्ति। तदा सोमेश्वरः कवीन्द्रः आसन्नवर्त्ती। मन्त्रिणा समस्या पृष्टा–

"प्रावृट्काले पयोराशिः कस्माद् गर्जितवर्जितः ।"

सोमेश्वरः पूरयति स्म—

"अन्तः सुप्तजगन्नाथनिद्राभङ्गभयादिव ॥ १ ॥"

तुरङ्गमषोडशकमुचितदानेऽत्र दत्तम् । पुनः कदाचिन्मंत्रिणोक्तम्—"काकः किं वा क्रमेलकः ।" सोमेश्वरेण पूरितं पद्यम्—

येनागच्छन्ममाख्यातो येनानीतश्च मत्पतिः । प्रथमं सखि कः पूज्यः काकः किं वा क्रमेलकः ॥ २ ॥

अत्रापि षोडशसहस्रा द्रम्माणां दत्तिः । एवं लीला तस्य । एकदा वृद्धेभ्यः श्रुतमेवंविधम् ।

यथा—"प्राग्वाटवंशे श्रीविमलो दण्डनायकोऽभवत् । स चिरमर्बुदाधिपत्यमभुनक्, गुर्ज्जरेश्वरप्रसत्तेः । तस्य विमलस्य विमलमतेर्वाञ्छाद्वयमभूत् । पुत्रवाञ्छा प्रासादवाञ्छा च । तत्सिद्ध्यै स्वर्गात्रदेव्यां अम्बिकामुपवासत्रयेणाराराध । प्रत्यक्षीभूय सा प्राह—"वत्स ! वाञ्छां ब्रूहि ।" विमलो जगौ—"पुत्रेच्छा प्रासादनिष्पत्तीच्छा चाऽर्बुदशृङ्गे मे वर्त्तते ।" अम्बया प्रोक्तम्—"द्वे प्राप्ती न स्तः । एकां ब्रूहि ।" ततो भार्याश्रीदेव्या वचसा विमलेन संसारवृद्धिमात्रफलामसारां पुत्रेच्छां मुक्त्वा प्रासादेच्छैव सफलीकर्तुमिष्टा । अम्बयोक्तम्—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

सेत्स्यति तवेयम् । परं क्षणं प्रतीक्षस्व । यावताऽहं गिरिवरार्बुदाधिष्ठात्र्याः सख्याः श्रीमातुर्मतं गृह्णामि ।" इत्युक्त्वा गता देवी । तावद् विमलो ध्यानेन तस्थौ । श्रीमातृमतं लात्वा देव्यायाता अभाणीच—

पुष्पस्रग्दामरुचिरं, दृष्ट्वा गोमयगोमुखम् । प्रासादार्हं भुवं विन्द्याः, श्रीमातुर्भवनान्तिके ॥ १ ॥

तत्तथैव दृष्ट्वा चम्पकद्रुमसन्निधौ तीर्थमस्थापयत् । पैत्तलप्रतिमा तत्र महती विक्रमादित्यात् सहस्रोपरि-वर्षाणामष्टाशीतौ गतायां चतुर्भिः सूरिभिरादिनाथं प्रत्यतिष्ठिपत् । 'विमलवसतिः' इति प्रासादस्य नाम-दत्तं । तस्मिन् दृष्टे जन्म सफलं कथ्यते ।

एतत्कथाश्रवणान्मन्त्री दध्यौ "वयं चत्वारो भ्रातरोऽभूम । तन्मध्ये द्वौ स्तः । द्वौ तु मालदेवलूणिगाव-ल्पवयसौ दिवमगाताम् । मालदेवनाम्ना कीर्त्तनानि प्रागपि अकारिषत । किपन्त्यपि लूणिगश्रेयसे तु लूणि-गवसतिरर्बुदे कार्या" एतत्तेजःपालाय प्रकाशितम् । तेन विनीतेन सुतरां मेने । अथ तेजःपालो धवलक्क-कादर्बुदगिरिभूषणं चन्द्रावतीं पुरीं गत्वा धारावर्षराणकगृहमगात् । तेनात्यर्थं पूजितः । किं कार्यं आदिश्य-तामित्युक्तं च । मन्त्रिणोक्तम्–"अर्बुदशिखराग्रे प्रासादं कारयामहे । यदि यूयं साहाय्याः स्यात ।" धारा-वर्षेण भणितम्–"तव सेवकोऽस्मि । अहं सर्वकार्येषु धुरि योज्यः ।" ततो राष्ट्रिकगोष्ठिकादयो महादानै-र्वशीकृतास्तथा, यथा निष्पद्यमानचैत्योपरि प्रद्वेषं न भजन्ते । दानेन भूतानि वशीभवन्तीतिवचनात् । तत-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्चन्द्रावतीमहाजनमुख्यं श्रावकं चाम्पलनामानं गृहे गत्वाऽऽललाप–" वयं चैत्यमर्बुदे कारयामहे यदि पूजासान्निध्यं कुरुध्वे।" चाम्पलेनापि स्वस्य कुटुम्बान्तराणामपि देवपूजार्थं नित्यधनविता कृता। ततो मन्त्री आरासणं गत्वा चैत्यनिष्पत्तियोग्यं दलवाटकं निरवकाशयति। तद्युग्यैरहकलैश्चार्बुदोपत्यकामानीनयत्। अर्द्धक्रोशार्द्धक्रोशान्तरे हट्टानि मण्डापितानि। तत्र सर्वं लभ्यते। पशूनां नराणां क्षुदादि कृच्छ्रं माभूदिति कारणात्। उम्बरिणीपथेन प्रासादनिष्पत्तियोग्यं दलं द्विगुणमुपरि गिरेः प्रवेशयामास। पुनस्तां पद्यां विषमाश्वकार। यथा परचक्रप्रवेशो नो भवेत्। एवं सिद्धे पूर्वकर्माणि शोभनदेवं सूत्रधारमाहूय कर्मस्थाये न्ययुङ्क्त। ऊदलाख्यं आत्मशालकं उपरि स्थायिनमकरोत्। अर्थव्यये स्वैरितां च समादिशत्। एवं सूत्रं कृत्वा तेजःपालो धवलक्ककमागमत्। निष्पद्यते प्रासादः। श्रीनेमिबिम्बं कषोपलमयं सज्जीकृतं विद्यते। सूत्रधाराणां सप्तशती घटयति घाटम्। ते तु दुःशीलाः पुरः पुरोऽर्थं गृह्णन्ति। कार्यकाले पुनः याचन्ते। तत ऊदलो मन्त्रितेजःपालाय लिखति–" देव! द्रम्माः विनश्यन्ति। सूत्रधारा कर्म्मस्थायात् प्रथमं प्रथमं गृह्णन्ति।" ततस्तेजःपालेन कथापितम्–" द्रम्मा विनष्टा इति किं ब्रूषे ?। विनष्टाः किं कुथिताः ?। न तावत् कुथिताः। किन्तु मनुष्याणामुपकृताः। उपकृताश्चेद्विनष्टाः कथं कथ्यन्ते ?। माता मे वन्ध्येति वाक्यवत्परस्परं विरुद्धं ब्रूषे। तस्मात् तत्त्वमिदम्–सूत्रधाराणामिच्छाच्छेदो न कार्यः, देयमेवेति।" ततो दत्ते ऊदलः। तावन्नि-

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

ष्पन्नं यावद्गर्भगृहमध्ये श्रीनेमिनाथबिम्बं स्थापितम्। एतच्च कृतं श्रीतेजःपालाय विज्ञप्तम्। तुष्टौ द्वौ मन्त्रिणौ। श्रीवस्तुपालादेशात् तेजःपालोऽनुपमया सहानल्पपरिच्छेदोऽर्बुदगिरिं प्राप्तः। प्रासादं निष्पन्नप्रायं ददर्श तुतोष। स्नात्वा सद्वस्त्रप्रावरणः सपत्नीको मन्त्री नेमिं पूजयति स्म। अथ कायोत्सर्गे ध्यानेनोर्ध्व-स्तस्थौ चिरम्। क्षणार्द्धेनानुपमा पतिं तथास्थं मुक्त्वा प्रासादनिष्पत्तिकुतूहलेन बहिरागात्। तत्र सूत्रधारः शोभनदेवो मण्डपचतुःस्तम्भीं ऊर्ध्वयितुमुपक्रमते। तदा मन्त्रिण्या उक्तम्–"सूत्रधार! मम पश्यन्त्याश्चिरं बभूव। अद्यापि स्तम्भा नोत्तम्भ्यन्ते।" शोभनदेवेनोक्तम्–"स्वामिनि गिरिपरिसरोऽयम्। शीतं स्फारम्। प्रातर्घटनं विषमम्। मध्यान्हे गृहाय गम्यते। स्नायते। पच्यते। भुज्यते एवं विलम्बः स्यात्। अथ विलम्बात् किं भयम्?, श्रीमन्त्रिपादाश्चिरं राज्यमुपभुञ्जानाः सन्तीह तावत्।" ततोऽनुपमया जगदे–"सूत्रधार! चाटुमात्रमेतत्। कोऽपि क्षणः कीदृग्भवेत् को वेत्ति।" सूत्रधारो मौनं कृत्वा स्थितः। पत्नीवचनमाकर्ण्य सचिवेन्द्रो बहिर्निःसृत्य सूत्रधारमवोचत्–"अनुपमा किं वावदीति।" सूत्रधारो व्याहार्षीत्–"यद्देवेन अवधारितम्।" मन्त्री दयितामाह–"किं त्वयोक्तम्?।" अनुपमाह–"देव! वदन्त्यस्मि। कालस्य को विश्वासः। कापि कालवेला कीदृशी भवति। न सर्वदापि पुरुषाणां तेजस्तथा। यथा—

श्रियोर्वा स्वस्य वा नाशो येनावश्यं विनश्यति। श्रीसम्बन्धे बुधाः स्थैर्यबुद्धिं बध्नन्ति तत्र किं॥ १॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

वृद्धानाराधयन्तोऽपि तर्पयन्तोऽपि पूर्वजान् । पश्यन्तोऽपि गतश्रीकान् अहो मुह्यन्ति जन्तवः ॥ २ ॥
भूपभ्रूपल्लवप्रान्ते, निरालम्बाऽविलम्बनीम् । स्वल्पावस्थायिनीं लक्ष्मीं, मन्यन्ते मन्त्रिणो बुधाः ॥ ३ ॥
इति विपदितो मृत्युरितो व्याधिरितो जरा । जन्तवो हन्त पीड्यन्ते, चतुर्भिरपि सन्ततम् ॥ ४ ॥

एतत्तत्त्ववचः श्रुत्वा मन्त्रिवरः प्राह–"अयि ! कमलदलदीर्घलोचने ! त्वां विना कोऽन्यः एवं वक्तुं जानाति,

ताम्रपर्णीतटोत्पन्नैर्मौक्तिकैरिक्षुकुक्षिजैः । बधस्पर्द्धभरा वर्णाः, प्रसन्नाः स्वादवस्तव ॥ ५ ॥

गृहचिन्ताभरहरणं मतिवितरणमखिलपात्रसत्करणम् ।
किं किं न फलति कृतिनां गृहिणी गृहकल्पवल्लीव ॥ ६ ॥

राज्यस्वामिनि वद केनोपायेन शीघ्रं प्रासादा निष्पत्स्यन्ते ।" देव्याह–नाथ ! रात्रीयसूत्रधाराः पृथक् दिनीयसूत्रधाराः पृथक् व्यवस्थाप्यन्ते । कटाहिश्चटाप्यन्ते । अमृतानि भोज्यन्ते । सूत्रधाराणां च विश्रामलाभाद्रोगो न प्रभवति । एवं चैत्यसिद्धिः शीघ्रा । आयुर्यात्येव श्रीरस्थिरैव । यतः—

गृहीत इव केशेषु मृत्युना धर्ममाचरेत् । अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत् ॥ ७ ॥

For Private And Personal

"इत्यादि सरस्वतीवीणाक्वणितकोमलया गिरोक्त्वा निवृत्ता सुलक्षणा सा।" मन्त्रिणा सर्वदेवमकमस्थायेषु सैव रीतिः प्रारब्धाः। निष्पन्नं च सर्वं स्तोकैरेव दिनैः। गतो मन्त्री धवलकम्। दिनैः कतिपयैर्वर्द्धापनिकानर आयातः। देव! अर्बुदाद्रौ नेमिचैत्यं निष्पन्नम्। हृष्टौ द्वौ बान्धवौ। पुनः प्रासादप्रतिष्ठार्थं गतौ ससङ्घौ तत्र। तत्र च जालहुरपुरात् श्रीयशोवीरो नाम भाण्डागारिकः सरस्वतीकण्ठाभरणत्वेन ख्यातः। स आहूत आगात्। मिलिता वस्तुपालतेजःपालयशोवीरा एकत्र न्यायविक्रमविनया इव साक्षात्। चतुरशीतीराणाः। द्वादश मण्डलीकाः। चत्वारो महाधराः। चतुरशीतिर्महाजनाः। एवं सभा। तदा वस्तुपालेन यशोवीरः प्रोचे-" भाण्डागारिक! त्वं नृपउदयसिंहस्य मन्त्री। यौगन्धरायण इव वत्सराजस्य। तव स्तुतीः स्वस्थानस्थाः शृणुमः। यथा—

बिन्दवः श्रीयशोवीर! मध्यशून्या निरर्थकाः। सङ्ख्यावन्तो विधीयन्ते त्वयैकेन पुरस्कृता॥ १॥

यशोवीर! लिखत्याख्यां यावचन्द्रविधिस्तव। न माति भुवने तावदाद्यमप्यक्षरद्वयम्॥ २॥

अत एव नः सदा भवद्दर्शनरणरणकाक्रान्तमेव स्वान्तमासीत्। इदानीं चारुसम्पन्नं भवदीयसाङ्गत्यम्। तदपि विशेषतः श्रीमान्नेमिरद्दष्टौ।" ततो यशोवीरो व्याहरति—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रीमत्कर्णपरम्परागतभवत्कल्याणकीर्त्तिश्रुतेः, प्रीतानां भवदीयदर्शनविधावस्माकमुत्कं मनः ।
श्रुत्वा प्रत्यर्थिनी सदा ऋजुनया स्वालोकाविस्रम्भणी, दाक्षिण्यैकनिधानकेवलमियं दृष्टिः समुत्कण्ठते ॥१॥"

इत्याद्याः संकथाः प्रपथिरे । प्रासादबिम्बप्रतिष्ठोत्सवाः संवृत्ताः । श्रीवस्तुपालेन एकदा चैत्यस्य दूषण-भूषणानि पृष्टो यशोवीरः प्रोचे—" देव ! शोभनदेवः सूत्रधारः शोभनः । ततोऽपि न युक्तं एतदम्बा कीर्त्तिस्तम्भोपरिस्थिता एकामङ्गुलीमूर्ध्वीकृत्य वर्त्तमाना घटिता । स तु कर्मकर एव द्रव्यलोलुपः । अत्र तव मातुर्मूर्त्तिर्विलोक्यते । येन दाता दुर्लभः ।

शतेषु जायते शूरः सहस्रेषु च पण्डितः वक्ता शतसहस्रेषु दाता भवति वा न वा ॥ १ ॥

इत्यादि किमुच्यते । प्रासादः परमतमः । परं दोषा अपि सन्ति । प्रासादापेक्षया सोपानानि ह्रस्वानि १ स्तम्भे बिम्बान्याशातनाभाजनं स्युः २ द्वारप्रदेशे व्याघ्ररूपाणि पूजाऽल्पत्वाय स्युः ३ जिनपृष्ठे पूर्वजारोपणा त्पाश्चात्यानामृद्धिनाशो भविता ४ आकाशे जैनमुनिमूर्त्तिरोपणात्स्वत्परं दर्शनपूजाऽल्पत्वाय ५ मुद्गलोकृष्णा न मङ्गलाय ६ भारपदाः द्वादशहस्तप्रलम्बाः कालेन स कोऽप्येवंविधो न भविष्यति यः विनाशे ईदृशः प्रक्षे-पयिष्यति ७ ।" इत्यादि श्रुत्वा सत्यं मत्वा न चुकोप कोऽपि । भवितव्यतां चाप्रतिकारां निश्चिक्ये । विवि-

For Private And Personal

धदानैर्विक्रमादित्य इव प्रकाश्य महिमानं विसृज्य स्वस्थाने लोकं सपरिजनो धवलक्कं गत्वा प्रभुं नत्वा सुखं तस्थौ ।

इतश्च श्रीवीरधवलस्य द्वौ पुत्रौ स्तः। एको वीरमः। अपरो वीसलः। तत्र वीरमो यौवनस्थः शूरेषु रेखां प्राप्तः। यो वर्षाकालेऽकस्मादुपरि पतन्त्या विद्युत उद्देशेन कृपाणीमाकृषत्। स एकदा कचिदेकादशीपर्वणि धवलक्ककमध्ये तरुतलमगमत्। तत्र पर्वण्यसौ रीतिः–'वैष्णवैः सर्वैरष्टोत्तरशतं बदराणां वा आमलकानां द्रम्माणां वा मोक्तव्यं तरोरधः।' वीरमेनाऽष्टोत्तरं शतं द्रम्मा मुक्ताः। एकेन तु वणिजा तत्र स्थितेनाष्टोत्तरशत दुःकृता मुक्ता। वीरमेण तस्योपरि कृपाणिका कृष्टा। रे! असक्तः किमधिकं करोषीति वदन्नसौ वणिजं हन्तुमन्वधावत्। वणिग् नष्टो वीरधवलाध्यासितां सभामाविशत्। जातः कलकलः। ज्ञातं पारंपर्यं वीरधवलेन। वणिजि पश्यति वीरमो आकार्य हक्कितः–"का ते चर्चा। यद्ययं त्वदधिकं करोति। अस्माकं न्यायं न वेत्सि। दूरे भव पुनर्मद्दृष्टौ नागन्तव्यम्। वणिजो मम जङ्गमः कोशः। मयि जीवति सति केनाभिभूयन्ते?।" इत्युक्त्वा तं वीरमग्रामाख्ये आसन्नग्रामेऽतिष्ठिपत्। स तु कोणिककुमारवत् कंसवत् पितरि द्विष्टो जीवन्मृतंमन्योऽस्थात्। वीसलस्तु राणश्रीवीरधवलस्य वल्लभः श्रीवस्तुपालस्य च। अत्रान्तरे श्रीवीरधवलोऽचिकित्स्येन व्याधिना जग्रसे। तदा वीरमः स्वसहायैर्बलवान् भूत्वा राज्यार्थं राणकमिलनमिषेण धवलक्क-

मागात्। तदैव श्रीवस्तुपालेन तं दुराशयं ज्ञात्वा प्रत्युत्पन्नमतित्वादश्वगजहेमादिषु परमात्ममानुषैः परमो यत्नः कृतः। वीरमः प्रभवितुं न शशाक। धवलक्क एव स्वसौधे विपुलेऽवतस्थौ। दिनैस्त्रिभिर्वीरधवलो दिवं गतः। लोकः शोकसमुद्रे पतितः। बहुभिश्चिन्तारोहणं कृतम्। मन्त्री तु सपरिजनः काष्ठानि भक्षयन्नपरापरैर्मन्त्रिभिर्निषिद्धः। उक्तं च—"देव! त्वयि सति राणपादाः स्वयं जीवन्तीव लक्ष्यन्ते। त्वयि तु लोकान्तरिते परिपूर्णाः पिशुनानां मनोरथाः। याता गुर्ज्जरधरा इति ज्ञेयम्।" ततो न मृतो मन्त्री। उत्थापनदिने मन्त्री श्रीवस्तुपालः सभासमक्षं पठति—

आयान्ति यान्ति च परे ऋतवः क्रमेण सञ्जातमेतदृतुयुग्ममगत्वरं तु।
वीरेण वीरधवलेन विना जनानां वर्षा विलोचनयुगे हृदये निदाघः॥ १॥

अतीव निश्वस्य गताः सर्वेऽपि स्वस्थानं। ततश्च मृते वीरधवले तद्राज्यलिप्सुर्वीरमः सन्नह्य गृहान्निर्गमिष्यति यावता तावता श्रीवस्तुपालेन वीसलः कुमारो राज्ये विनिवेशितः। वीसलदेव इति नाम प्रख्यापितम्। सर्वराज्याङ्गेष्वाप्तनरैः रक्षा कारिता। स्वयं वीसलं गृहीत्वा साराऽश्वखुरपुटक्षुण्णक्षमापीठोच्छलदूरजःपुञ्जस्थगितव्योमा राजन्यकक्रूरकरवालशल्लभल्लाकिरणद्विगुणद्योतितरविकिरणो वीरमसम्मुखं ययौ। दारुणः समरो जज्ञे। वीरमः स्वस्य तेजसोऽनवकाशं मन्यमानो नंष्ट्वा श्वसुरेण राजकुलेन उदयसिंहेनाधिष्ठितं जाल-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

हुरपुरं प्रति अचालीत् । मन्त्री तस्याशयं दक्षतया ज्ञात्वा षोडश योजनिकान्नरानुदयसिंहान्तिके प्रैषीत् आ-ख्यापयत् । यथा-" अमुं राजद्विष्टकारकं जामातृसम्बन्धेन यदि स्वान्तिके स्थापयिष्यसि । तदा ते न राज्यं न जीवितं च । हन्याश्चैनम् । " ततो यदा वीरमो जाबालिपुरोद्यानं प्राप्तस्तदा विश्राम्यन्नगरक्षिकाः सुत्तारय-न्नलसायमान उदयसिंहनियुक्तैर्धनुर्द्धरैः शरैः शतमितैर्जर्जरश्चालनीयप्रायकायः कृतः मृतस्तत्र । तस्य शिरो वीसलदेवाय प्रहितं उदयसिंहेन । तदनु जातं निष्कण्टकं वीसलदेवराज्यम् । यावन्मात्रं वीरधवलेन साधितं तावन्मात्रान्न किमपि न्यूनमासीत् । केवलं लब्धप्रसरेण वीसलेन श्रीवस्तुपालो लघुनया दृष्टः ।

पुरुषः सम्पदामग्रमारोहति यथा यथा । गुरूनपि लघुत्वेन स पश्यति तथा तथा ॥ १ ॥

राज्ञा षृद्धनगरीयनागडनामा विप्रः प्रधानीकृतः । मन्त्रिणोः पुनर्लघुश्रीकरणमात्रं दत्तम् । अस्मिन् प्रस्तावे एकः समराकनामा प्रतीहारो राज्ञोऽस्ति । स प्रकृत्या नीचः पूर्वमन्यायं कुर्वाणो मन्त्रिश्रीवस्तुपालेन पीडितोऽभूत् । स लब्धावकाश उपराजं ब्रूते-"देव ! अनयोः पार्श्वेऽनन्तं धनमास्ते तद्याच्यताम् ।" कृतघ्नेन राज्ञा ताचाहूयावादीत् " अर्थो दीयताम् । " ताभ्यामुक्तम्-" अर्थः शत्रुञ्जयाद्रिषु व्ययितत्वान्नास्ति नः पार्श्वे । " राज्ञोक्तम्-" तर्हि दिव्यं दीयताम् । " मन्त्रिभ्यामभिहितम्-" यद्दिव्यं भवद्भ्यो रोचते तदादिश्यताम् । " राज्ञा घटसर्प्पः पुरस्कृतः । लवणप्रसादो तदा जीवन्नभूत् । स निषेधयति तदकृत्यम् । नतु तद्वचनं राजा शृणोति अभिनवदर्प्पवशात् । तदा सोमेश्वरेणोक्तं काव्यमेकं वीसलं प्रति—

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

मासान्मांसलपाटलापरिमलव्यालोलरोलम्बतः प्राप्य प्रोढिमिमां समीरमहर्ती हन्त त्वया किं कृतम् ।
सूर्याचन्द्रमसौ निरस्ततमसौ दूरं तिरस्कृत्य यत् पादस्पर्शसहं विहायसि रजः स्थाने तयोः स्थापितम् ॥१॥
निवर्त्तितं दिव्यं राज्ञा ।

अथ कदाचिद् धवलक्कके मन्त्रिणि वसति सति पौषधशाला एका आस्ते । तस्या उपरितनं पुञ्जकं क्षुल्लकोऽधः क्षिपन्नासीत् । तस्याज्ञानात् स पुञ्जको वीसलदेवमातुलस्य सिंहनाम्नो यानाधिरूढस्याधो रथ्यायां गच्छतः शिरसि पतितः । क्रुद्धः सः मध्ये आगत्य क्षुल्लकं दीर्घया तर्जनकेन पृष्टे दृढमाहत्य रे मां जेठुआकं सिंहनामानं राजमातुलं न जानासीति वदन् स्वगृहे गतः । तं वृत्तान्तं मध्याह्ने मन्त्रिवस्तुपालं भोजनारम्भे उत्क्षिप्तप्रथमकवलं आगत्य रुदन्नुद्घाटितपृष्ठोऽभिजिज्ञपत् क्षुल्लकः । मन्त्रिणाऽभुक्तेनैव उत्थाय क्षुल्लकः सन्धार्य प्रस्थापितः, शालायां प्रेषितश्च । तदनु स्वयं स्वकीयः परिग्रहो भाषितः– "भोः क्षात्रियाः ! स कोऽप्यस्ति युष्मासु मध्ये यो मम मनोदाहमुपशमयति ।" तन्मध्ये एकेन राजपुत्रेण भूणपालाख्येनोक्तम्– "देव ! ममादेशं देहि । अहं तु प्राणदानेऽपि तव प्रसादानां नाऽनृणीभवामः ।" स एकान्ते नीत्वा मन्त्रिणा छन्नं कर्णे प्रविश्य समादिष्टम्– "याहि जेठुआवंशस्य राजमातुलस्य सिंहस्य दक्षिणं पाणिं छित्त्वा मे ढौकय ।" स राजपुत्रस्तथेत्युक्त्वा एकाकी मध्याह्ने सिंहावासद्वारे तस्थौ । तावता राजकुलात् सिंह आगात् । राजपु-

For Private And Personal

त्रेणाग्रे भूत्वा प्रणिपत्य सिंहाय उक्तम्–" मन्त्रिणा श्रीवस्तुपालदेवेनाहं वः समीपं केनापि गूढकार्येण प्रेषितोऽस्मि। तेन इतो भूत्वा प्रसद्याऽवधार्यताम्।" इत्युक्ते स किञ्चिद्गत्वा पराङ्मुखो भूत्वा यावद् वार्त्तां श्रोतुं यतते तावन् मन्त्रिभृत्येन सिंहस्य करः स्वकरे कृत्य सहसा कंकलोहच्छुर्या छिन्नः। छिन्नं तं करं गृहीत्वा रे! वस्तुपालस्य भृत्योऽस्मि। पुनः श्वेताम्बरं परिभवेरिति वदंश्चरणबलेन पलाय्य भूणपालो मन्त्र्यन्तिकमगमत्, करमदीदृशत्। मन्त्रिणा श्लाघेऽसौ। स करः स्वसौधाऽग्रे बद्धः। स्वमानुषाणि परमाप्तनरगृहे मुक्तानि। आत्मीयपरिग्रहो भाषितः–"यस्य जीविताशा स स्वगृहं यातु जीवतु चिरम्। अस्माभिर्बलवता सह वैरमुपार्जितम्। मरणं करस्थमेव जीविते सन्देहः।" तैः सर्वैरप्युक्तम्–"देवेन सह मरणं जीवितं च। स्थिताः स्मो वयं। एतदर्थे निश्चयो ज्ञातव्यः।" ततो गोपुराणि दत्त्वा गृहं नरैः स्वावृत्तं कृत्वा स्वयं स्वसौधोपरि सज्जीभूय तस्थौ निषङ्गी कवची धनुष्मान्। ततः सिंहस्यापि परिच्छदो मिलितो बान्धवादिर्भूयान्। तैः सर्वैरभाणि–" गत्वा वस्तुपालं सपुत्रपशुबान्धवं हनिष्यामः इति प्रतिजज्ञे।" चलितं जेठ्ठआकसैन्यम्। यावद्राजमन्दिराग्रे आयातं कलकलायमानं तत्। तावदेकेन ज्यायसोक्तम्–" एवंविधं व्यतिकरं यदि राजा विज्ञप्यते तदा वरम्। माऽस्मत्सहसाकारित्वे तस्य कोपोऽभूत्।" ततो विज्ञप्तं राज्ञे। राज्ञा वार्त्तां ज्ञात्वा विमृश्य भणितम्–" अनपराधे केषामपि वस्तुपालो न पीडयति किञ्चित्। युष्माभिरन्याय्यं कृतं

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

भावि।" तैरुक्तम्–"मन्त्रिणो गुरुःपीडितः।" राजा प्राह–"यदीत्थं कृतं तस्मात्तिष्ठतामत्रैव। वयं स्वयं करिष्यामो यदुचितम्।" ततः सोमेश्वरदेवः पृष्टः–"हे गुरो! किमत्र युक्तं स्यात्।" गुरुणोक्तम्–"मां तत्पार्श्वे प्रहिणुत। आयतिपथ्यं करिष्ये।" प्रहितः सः। प्राप्तो मन्त्रिसौधेयद्वारम्। प्राप्तो मन्त्र्यनुज्ञया मन्त्रिपार्श्वं पुरोहित आह–"मन्त्रिन्! किमेतदल्पे कार्ये कियत्कृतं भवद्भिः। जेट्ठअका मिलिताः सन्ति। राजापि तद्भागिनेयः। तेन क्रोधः शम्यताम्। येन सन्धिं कारयामि।" अथ मन्त्रीशः प्राह–"मरणात् किं भयं?।

जिते च लभ्यते लक्ष्मीर्मृते चापि सुराङ्गना क्षणविध्वंसिनी काया, का चिन्ता मरणे रणे॥ १॥

परं गुरुपरिभवो दुःसहः। अथ किं व्यापृतं जग्धं पीतं दत्तं गृहीतं विलसितं यथा तथा यदा तदा मर्त्तव्यमेव। इदमेकं मरणमित्थं भवतु।

जीवितैकफलमाघमार्जितम् लुण्टितं पुरत एव यद् यशः।
ते शरीरकपलालपालनं कुर्वते बत कथं मनस्विनः॥ १॥"

इत्यादि गीर्भिर्मृतिकृतनिश्चयं मन्त्रिणं ज्ञात्वा गुरुर्गत्वा राजानमूचे–"राजेन्द्र! म्रियत एवाऽत्र झगटके मन्त्री। स अग्रेऽपि शुद्धशूरः तेषु तेषु स्थानेषु जयश्रीवरो जातः। तत्र वक्तुं न पार्यते। अपि च तृणं

For Private And Personal

शूरस्य जीवितामिति वचनात्। ईदृशो योधः क्वचिद्विषमे कार्येऽग्रे धृत्वा घात्यते नैवं वृथा। बहुधा भवतामुपकारी। अन्यच्च स किं प्रभुर्यो जीर्णभृत्यानां द्वित्रान्नपराधान्न सहते। अस्मदादीनामपि मनसि देवस्य कीदृशी आशा भाविनी।" इत्यादि दृढं मृदुसारं निगद्य हस्ते कृतो राजा। यदुक्तम्

वल्लीनरिन्दचित्तं वक्खाणं पाणियं च महिलाओ। तत्थय वचंति सया जत्थय धुत्तेहिं निज्जंति ॥ १ ॥

राजा प्रोवाच–" मन्त्री धीरां दत्त्वा सम्मान्य समानीयताम्।" गतो गुरुस्तत्र। राज्ञोक्तमुक्त्वा नीतो मन्त्री। परं सन्नद्धबद्ध एव मिलितः। राजा विविधतदुपकृतिस्मृत्या आर्द्रनयनमनसा पितृवदुपशामितो मन्त्री। मातुलाः पादयोर्लगापिताः। स मन्त्रिच्छेदितः सिंहहस्तो लोके दर्शितः। बहुराजलोकसमक्षं शब्दः प्रलापितः–" यो मन्त्रिदेवगुरुहन्ता तस्य प्राणान् हनिष्यामः।" इत्युक्त्वा ।जिनमतस्य मन्त्रिणश्च गौरवमवीवृधद्वीसलदेवः। एवं काले गच्छति विक्रमादित्यात् १२९८ वर्षं प्राप्तम्। श्रीवस्तुपालो ज्वररुक् क्लेशेन पीडितः तदा तेजःपालं सपुत्रपौत्रं च जयन्तसिंहमभाषत–" वत्स! श्रीनरचन्द्रसूरिभिर्मल्लधारिभिः संवत्त १२८७ वर्षे भाद्रपदवदि १० दिने तेषां देवगमनसमये वयमेवमुक्ताः– मन्त्रिन्! भवतां १२९८ वर्षे स्वर्गारोहो भविष्यति।" तेषां वचांसि च न चलन्ति गीःसिद्धिसम्पन्नत्वात्। ततो वयं श्रीशत्रुञ्जयं गमिष्याम एव।

गुरुर्भिषग् युगादीशप्रणिधानं रसायनम्। सर्वभूतदयापथ्यं सन्तु मे भवरुग्भिदे ॥ १ ॥

लब्धाः श्रियः सुखं स्पृष्टं मुखं दृष्टं तनूरुहाम्। पूजितं दर्शनं जैनं न मृत्योर्भयमस्ति मे ॥ २ ॥"

कुटुम्बेन तन्मानितम्। शत्रुञ्जयगमनसामग्री निष्पन्ना। वीसलदेवो मन्त्रिणा साश्रुलोचनः समापृष्टः मुत्कलापितश्च कतिपयपदानि सम्प्रेषणायायातः। ततो नागडप्रधानगृहं मन्त्री स्वयमगात्। तेनाऽऽसनादिभिः सत्कृत्य पृष्टो कार्यविशेषं मन्त्री बभाषे–"वयं भवान्तरशुद्धाय विमलगिरिं प्रति प्रतिष्ठामहे। भवद्भिर्जैन-मुनयोऽमी ऋजवः सम्यग्रक्षणीयाः क्लिष्टलोकात्। यतः—

गौर्जराणामिदं राज्यं वनराजात् प्रभृत्यपि। स्थापितं जैनमन्त्रैस्तु तद्द्वेषी नैव नन्दति ॥ १ ॥

इति ज्ञातव्यम्। मन्त्रिनागडेनोक्तम्–"श्वेताम्बरान् भक्त्या गौरवयिष्यामि। चिन्ता एषा न कार्या। स्वस्त्यस्तु वः।" इति तद्वचसा समतुषत्। अथ चचाल वस्तुपालः। अङ्केवालिआग्रामं यावत्प्राप। तत्र शरीरं बाढमसहं दृष्ट्वा तस्थौ। तत्र सहायाताः सूरयो निर्यामणां कुर्वन्ति। मन्त्रीश्वरोऽपि समाना सर्वं शृणोति, श्रद्दधाति च। अनशनं प्रतिपद्य यामे मते स्वयं भणति—

न कृतं सुकृतं किञ्चित्, सतां स्मरणोचितम्। मनोरथैकसाराणामेवमेव गतं वयः ॥ १ ॥

यन्मयोपार्जितं पुण्यं जिनशासनसेवया। जिनशासनसेवैव तेन मेऽस्तु भवे भवे ॥ २ ॥

For Private And Personal

या रागिणि विरागिण्यः स्त्रियस्ताः कामयेत कः । तामहं कामये मुक्तिं या विरागिणि रागिणी ॥३॥

शास्त्राभ्यासो जिनपतिनुतिः सङ्गतिः सर्वदाऽऽर्यैः, सद्वृत्तानां गुणगणकथा दोषवादे च मौनम् ।
सर्वस्यापि प्रियहितवचो भावना चात्मतत्त्वे, सम्पद्यन्तां मम भवभवे यावदाप्तोपवर्गः ॥ ४ ॥

इति भणन्नेवास्तमितो जैनशासनगगनमण्डनमृगाङ्कः श्रीवस्तुपालः । तदा निग्रन्थैरपि तारपूत्कारमरोदि । का कथा सोदरादीनाम् । मन्त्रिणि दिवं गते श्रीवर्द्धमानसूरयो वैराग्यादाम्बिलवर्द्धमानतपः कर्त्तुं प्रारेभुः । मृत्वा शंखेश्वराधिष्ठायकतया जाताः । तैर्मन्त्रिणो गतिर्विलोकिता, परं न ज्ञाता । ततो महाविदेहे गत्वा श्रीसीमन्धरो नत्वा पृष्टः । स्वाम्याह—“ अत्रैव विदेहे पुष्कलावत्यां पुण्डरीकिण्यां पुरि कुरुचन्द्रराजा संजातः । स तृतीये भवे सेत्स्यति । अनुपमदेजीवस्तु अत्रैव श्रेष्ठिसुताऽष्टवार्षिकी मया दीक्षिता पूर्वकोट्यायुः । प्रान्ते केवलं मोक्षश्च । ” सा एषा साध्वी व्यन्तरस्य दर्शिता । तदनु तेन व्यन्तरेणात्रागत्य तयोर्गतिः प्रकटिता । तत्र तेजःपालो विलपति—

आल्हादं कुमुदाकरस्य जलधेर्वृद्धिः सुधास्यन्दिभिः, प्रद्योतैर्नितरां चकोरवनितानेत्राम्बुजप्रीणनम् ।
एतत्सर्वमनादरादहृदयोऽनादृत्य राहुर्हहा, कष्टं चन्द्रमसं ललाटतिलकं त्रैलोक्यलक्ष्म्याः पपौ ॥ १ ॥

जयन्तसिंहो वदति—

खद्योतमात्रतरला गगनान्तरालमुच्चावचाः कति न दन्तुरयंति ताराः ।
एकेन तेन रजनीपतिना विनाऽद्य सर्वाः दिशो मलिनमाननमुद्वहन्ति ॥ २ ॥

कवयः प्राहुः—

मन्ये मन्दधियां विधे ! त्वमवधिर्वैराय सेवार्थिनां, यद्वैरोचनसातवाहनबलिश्वेताजभोजादयः ।
कल्पान्तं चिरजीविनो न विहितास्ते विश्वजीवातवो, मार्कण्डध्रुवलोमशाश्च मुनयः तृप्ताः प्रभूतायुषः ॥३॥

लोकास्तु वदन्ति—

किं कुर्मः कमुपालभेमहि किमु ध्यायाम कं वा स्तुमः कस्याग्रे स्वमुखं स्वदुःखमलिनं सन्दर्शयामोऽधुना ।
शुष्कः कल्पतरुर्यदङ्गणगताश्चिन्तामणिश्चाजरन् क्षीणा कामगवी च कामकलशो भग्नो हहा ! दैवतः ॥ ४ ॥

ततस्तेजःपालजयन्तसिंहाभ्यां मन्त्रिदेहस्य शत्रुञ्जयैकदेशे संस्कारः कृतः । संस्कारभूम्यासन्नः स्वर्गारोहणनामा प्रासादो नमिविनमियुतऋषभसनाथः कारितः । मन्त्रिण्यौ ललितादेवी सोषू अनशनेन मम्रतुः । श्रीतेजःपालस्त्वनुपमासहितो मध्यमव्यापारभोगभाग् लेशतोऽपि तथैव दानं तन्वानः १३०८वर्षे द्यामगमत् ॥

ततः श्रीजयन्तसिंहोऽपि परलोकमभजत् । श्रीअनुपमापि तपसा स्वर्गमसाधयदिति भद्रम् । एतयोश्च श्रीवस्तुपालतेजःपालयोर्धर्मस्थानसङ्ख्यां कर्त्तुं क ईश्वरः । परं गुरुमुखश्रुतं किञ्चिल्लिख्यते–" लक्षमेकं सपादं जिनबिम्बानां विधापितम् । अष्टादश कोट्यः षण्णवतिर्लक्षाः श्रीशत्रुञ्जयतीर्थे द्रविणं व्ययितम् । द्वादश कोट्योऽशीतिलक्षाः श्रीउज्जयन्ते । द्वादशकोट्यस्त्रिपंचाशल्लक्षाः अर्बुदगिरिशिखरे लूणिगवसत्याम् । नवशतानि चतुरशीतिश्च पौषधशालाः कारिताः । पञ्चशतानि दन्तमयसिंहासनानां कारापणम् । सूरीणां प्रत्येकमुपवेशनार्थमर्प्पणम् । पञ्चशतानि पञ्चोत्तराणि समवसरणानां जादरमयानां कारणं श्रीकल्पवाचनाक्षणे मण्डनार्थम् । ब्रह्मशालाः सप्तशतानि । सप्तशतानि सत्रागाराणाम् । सप्तशती तपस्विकापालिकमठानाम् । तेषां सर्वेषां भोजननिर्वापादि दानं कृतं । पञ्चविंशतिशतानि हरिहरब्रह्मादिमहेश्वरायतनानाम् । त्रयोदशशतानि चतुरुत्तराणि शिखरबद्धजैनप्रासादानाम् । त्रयोविंशतिःशतानि जीर्णचैत्योद्धाराणाम् अष्टादश कोटिव्ययेन सरस्वतीभाण्डागाराणां त्रयाणां स्थानत्रये करणं धवलक्कस्तम्भतीर्थपत्तनादौ । पञ्चशती ब्राह्मणानां नित्यं वेदपाठं कारयति स्म । तेषां गृहमानुषाणां निर्वाहकरणम् । वर्षमध्ये सङ्घपूजात्रितयं सर्वदर्शनिनाम् । पञ्चदशशती श्रमणानां नित्यं गृहे विहरति स्म । बटुककाटिककार्यटिकानां सहस्रं समधिकं प्रत्यहमभुक्त । त्रयोदशयात्राः सङ्घपतीभूय कारिताः लोकानां । तत्र प्रथमयात्रायां चत्वारि सहस्राणि पञ्चशतानि शकटा-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

नां सशय्यापालकानाम्। सप्तशती सुखासनानाम्, अष्टादशशती वाहिनीनाम्। एकोनविंशतिशतानि श्रीकरीणाम्। एकविंशतिः शतानि श्वेताम्बराणाम्। एकादशशती दिगम्बराणाम्। चत्वारि शतानि सार्द्धानि जैनगायनानाम्। त्रयस्त्रिंशच्छती बन्दिजनानाम्। चतुःसहस्रतुरगाः। द्विसहस्रोष्ट्राः। चतुश्चत्वारिंशदधिकशतं देवार्योः। ससलक्षमनुष्याः। इदं प्रथमयात्राप्रमाणम्। अग्रेतना तदधिका ज्ञेया। तथा चतुरशीतिस्तडागाः सुबद्धाः। चतुः शती चतुःषष्ठ्यधिका वापीनाम्। पाषाणमयानि द्वात्रिंशद् दुर्गाणि। चतुः षष्टिर्मशीतयः। एवं लौकिकमपि कृतं मनो विनापि। तथा दन्तमयजैनरथानां चतुर्विंशतिः। विंशतिशतं शाकघटितानां। एकविंशत्याचार्यपदानि कारितानि। सरस्वतीकण्ठाभरणादीनि चतुर्विंशतिबिरुदानि भाषितानि कविजनैः। श्रीवस्तुपालस्य दक्षिणस्यां दिशि श्रीपर्वतं यावत्, उत्तरस्यां केदारपर्वतं यावत्, पूर्वस्यां वाणारसीं यावत्, पश्चिमायां पञ्चनदं यावत्, तयोः कीर्त्तनानि श्रूयन्ते। सर्वाग्रेण त्रीणि कोटिशतानि चतुर्दशलक्षा अष्टादशसहस्राणि अष्टशतानि द्रव्यव्ययः पुण्यस्थाने। त्रिषष्टिवारान् सङ्ग्रामे जैत्रपदं गृहीतम्। अष्टादश वर्षाणि तयोर्व्यापृतिः॥"

इति श्रीवस्तुपालप्रबन्धः॥

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

श्रीप्रश्नवाहनकुले कोटिकनामनि गणे जगद्विदिते श्रीमध्यमशाखायां हर्षपुरीयाभिधे गच्छे ॥ १ ॥
मलधारिबिरुदविदितश्रीअभयोपपदसूरिसन्ताने श्रीतिलकसूरिशिष्यः सूरिः श्रीराजशेखरो जयति ॥२॥
तेनायं मृदुगद्यैर्मुग्धो मुग्धावबोधकामेन । रचितः प्रबन्धकोशो जयताज्जिनपतिमतं यावत् ॥ ३ ॥
तथा कट्टारवीरदुस्साधवंशमुकुटो नृपौघगीतगुणः । बब्बूलीपूरकारिताजिनपतिसदनोच्छलत्कीर्त्तिः ॥४॥
बप्पकसाधोस्तनयो गणदेवोऽजनि सपादलक्षभुवि । तद्भूनूनकनामा तत्पुत्रः साढको दृढधीः ॥ ५ ॥
तत्सूनुः सामन्तस्तत्कुलतिलकोऽभवज्जगत्सिंहः दुर्भिक्षदुःखदलनः श्रीमहमदसाहिगौरवितः ॥ ६ ॥
तज्जो जयति सिरिभवः षट्दर्शनपोषणो महणसिंहः ढिल्ल्यां स्वदत्तवसतौ ग्रन्थमिमं कारयामास ॥७॥
शरगगनमनुमिताब्दे(१४०५)ज्येष्ठामूलीयधवलसप्तम्याम् निष्पन्नमिदं शास्त्रं श्रोत्रध्येत्रोः सुखं तन्यात् ॥

इति चतुर्विंशतिप्रबन्धाः सम्पूर्णाः ॥

[श्रीमत्तपागच्छे पं० सागरधर्मगणयः तच्छिष्यपं० कुलसारगणयस्तेनैषा प्रतिः सम्पूर्णीकृता स्वपरोपकारार्थम् ॥ मणूंद्रगामे लिखिता, एषा प्रतिर्वाच्यमानाविचलकालं नन्दतात्]

For Private And Personal

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailashsagarsuri Gyanmandir

For Private And Personal